SHADDARŚANA-SAMUCHCHAYA

BY

HARIBHADRA

WITH

GUṆARATNA'S COMMENTARY
TARKARAHASYA-DIPIKĀ.

EDITED BY

LUIGI SUALI, PH.D.

OF

BOLOGNA.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY 57, PARK STREET.
1905.

PRELIMINARY NOTICE.

—o—

In preparing this edition I have made use of the following material:—

I. For the text of the sūtras of Haribhadra alone.

A.—This MS. contains the sūtras and an avacûrṇi—3 folios. The text, in the middle of the pages, has 11 lines, × 47 akṣaras.

G.—MS. of the Library of the Deccan College. See R. G. Bhandarkar's Report on the search for Sanskrit Manuscripts in the Bombay Presidency during the years 1884-85, 1885-86 and 1886-87, No. 1387—3 folios. Text with avacûrṇi. Text: 10—13 lines × 42-49 akṣaras. The avacûrṇi is in both these MS. the same, but I have not found the name of the author. The age of the MS. in not easy to determine, but A seems to be older than G.

D.—MS. of the Library of the Deccan College. See Bhandarkar, loc. cit. No. 1386—24 f. × 17 l. × 52 akṣ. This MS. contains the text of Haribhadra with a commentary that is but an abstract of the commentary of Guṇaratnasûri. No date.

E.—An old MS. of 27 fol. × 15 l. × 58 akṣ. It contains, fol. 1-25^{a}, the sūtras of Haribhadra and the same commentary as D.

E^{1}.—The folios 25^{a}—27 of the MS. E. containing Haribhadra's text only.

II. For the sūtras of Haribhadra and the commentary of Guṇaratna:—

B.—An old and carefully written MS. in the Library of the University of Berlin. See A. Weber Verzeichniss der Sanskrit-und Prâkrit Handschriften, etc.

II vol., p. 180—182, No. 1610 (=MS. or fol. 741). I first used a beautiful photograph of this MS. taken by Professor Count F. L. Pullé, and afterwards compared doubtful passages of it with the original. B is the best and oldest of my MSS.; together with Y it forms the basis of the present edition—85 f. × 17 l. × 49 akshara. No date.

Y.—A good and old MS. 64 fol. × 19 l. × 65 aksh Belonging to Professor Hermann Jacobi. No date.

P.—A modern MS. 63 f. × 18 l. × 62—69 aksh. Samvat 1956.

K.—Fol. 98 × 15 l. × 53 aksh. This MS. bears no date, but it seems to be old.

The MSS. A, E, P and K have been procured and kindly lent me by Vakil Keshavlal Premchand B.A. LL.B., of Ahmedabad. I have much pleasure in publicly aknowledging my indebtedness to him for his unselfish endeavours in the interest of this work. My best thanks are due, besides, to the authorities of the Berlin Library for lending me MS. B, and especially to my teacher Professor Dr. Hermann Jacobi, who not only lent me his MS. and afforded me an opportunity of comparing the above mentioned MSS. of the Deccan College Library, but also, by his advice and assistance, most effectually aided me in preparing the text of this edition.

LUIGI SUALI.

Bonn a/Rh., 20th May, 1905.

प्रथमो ऽधिकारः।

जयति विजितरागः केवलालोकशाली
सुरपतिकृतसेवः श्रीमहावीरदेवः।
यदसमसमयाब्धेश्चारुगाम्भीर्यभाजः
सकलनयसमूहा बिन्दुभावं भजन्ते ॥ १॥
श्रीवीरः स जिनः श्रिये भवतु यत्स्याद्वाददावानले
भस्मीभूतकुतर्ककाष्ठनिकरे तृष्यन्ति सर्वेऽप्यहो।
संगीतिव्यवहारलुब्धतिकरानिष्टाविरोधप्रभा-
बाधासंभवसंकरप्रभृतयो दोषाः परैः रोपिताः ॥ २॥
वाग्देवी संविदे नः स्यात्सदा या सर्वदेहिनाम्।
चिन्तितार्थान् पिपर्त्तीह कल्पवल्लीव सेविता ॥ ३॥
नत्वा निजगुरून् भक्त्या षड्दर्शनसमुच्चये।
टीकां संक्षेपतो कुर्वे स्वान्योपकृतिहेतवे ॥ ४॥

दृश्यते हि जगति गरीयश्चित्तवतां महतां परोपकारसंपादनमेव सर्वोत्तमा स्वार्थसंपत्तिरिति मत्वा परोपकारैकप्रवृत्तिसार-स्वतुर्दशशतसंख्यशास्त्रविरचनाजनितजगज्जन्तूपकारः श्रीजिन-शासनप्रभावनाप्रभाताविर्भावनभास्करो याकिनीमहत्तराधर्मसूनु-नवबोधलब्धबोधिबन्धुरो भगवान् श्रीहरिभद्रसूरिः षड्दर्शनी

वाच्यस्वरूपं जिज्ञासूनां तत्तदीयग्रन्थविस्तरावधारणशक्तिविकलानां सकलानां विनेयानामनुग्रहविधित्सया स्वल्पग्रन्थं महार्थं सद्भूतनामान्वयं षड्दर्शनसमुच्चयं शास्त्रं प्रारभमाणः शास्त्रारम्भे मङ्गलाभिधेययोः साक्षाद्भिधानाय संबन्धप्रयोजनयोश्च संसूचनाय प्रथमं श्लोकमेनमाह ॥

सद्दर्शनं जिनं नत्वा वीरं स्याद्वाददेशकम् ।
सर्वदर्शनवाच्योऽर्थः संक्षेपेण निगद्यते ॥ १ ॥

सत् प्रशस्तविद्यमानं क्षायिकज्ञानापेक्षया प्रशस्तं वा दर्शनमुपलब्धिर्ज्ञानं केवलाख्यं यस्य, स सद्दर्शनः । अथवा सत्प्रशस्तं दर्शनं केवलदर्शनं तदव्यभिचारित्वात्केवलज्ञानं च यस्य, स सद्दर्शनः, सर्वज्ञ सर्वदर्शी चेत्यर्थः, तम् । अनेन विशेषणेन श्रीवर्धमानस्य भगवतो ज्ञानातिशयमाविरभीवत् । अथवा सदर्चितं सकलनरासुरामरेन्द्रादिभिरभ्यर्चितं दर्शनं मतं यस्य, स सद्दर्शनस्तम् । अनेन च तदीयदर्शनस्य त्रिभुवनपूज्यतामभिदधानः श्रीवर्धमानस्य त्रिभुवनविभोः सुतरां त्रिभुवनपूज्यतां व्यनक्तीति पूजातिशयं प्राचीकटत् । तथा जयति रागद्वेषादिशत्रूनिति जिनस्तम् । अनेनापायापगमातिशयमुदबीभवत् ॥

तथा स्यात्कथंचित्सर्वदर्शनसंमतस्याद्भूतवस्त्वंशानां मिथः सापेक्षतया वदनं स्याद्वादः । सदसन्नित्यानित्यसामान्यविशेषाभिलाप्यानभिलाप्योभयात्मानेकान्त इत्यर्थः ॥ ननु कथं सर्वदर्शनानां परस्परविरुद्धभाषिणामभीष्टा वस्त्वंशाः सद्भूताः

संभवेयुः येषां मिथःसापेक्षतया स्याद्वादः सत्यवादः स्यादिति चेत् । उच्यते । यद्यपि दर्शनानि निजनिजमतभेदेन परस्परं विरोधं भजन्ते, तथापि तैरुच्यमानाः सन्ति तेऽपि वस्त्वंशा ये मिथःसापेक्षाः सन्तः समीचीनतामञ्चन्ति । तथाहि । सौगतैरनित्यत्वं, सांख्यैर्नित्यत्वं, नैयायिकैर्वैशेषिकैश्च परस्परविविक्ते नित्यानित्यत्वे सदसत्त्वे सामान्यविशेषौ च, मीमांसकैः स्याच्छब्दवर्जं भिन्नाभिन्ने नित्यानित्यत्वे सदसदंशौ सामान्यविशेषौ शब्दस्य नित्यत्वं च, कैश्चित्कालस्वभावनियतिकर्मपुरुषादीति जगत्कारणानि, शब्दब्रह्मज्ञानाद्वैतवादिभिश्च शब्दब्रह्मज्ञानाद्वैतानि चेत्यादयो ये ये वस्त्वंशाः परैरङ्गीक्रियन्ते, ते सर्वेऽपि सापेक्षाः सन्तः परमार्थसत्यतां प्रतिपद्यन्ते निरपेक्षास्त्वन्योन्येन निरस्यमाना नभोनलिनायन्त इत्यलं विस्तरेण ॥

स्याद्वादस्य देशकः सम्यग्वक्ता स्याद्वाददेशकस्तम् । अनेन वचनातिशयमचकथत् । तदेवं चत्वारोऽतिशयाः प्राप्तस्तुता साक्षादाचचक्षिरे । तेषां हेतुहेतुमद्भाव एवं भाव्यः । यत एव निःशेषदोषशत्रुजेता, तत एव सर्वज्ञः । यत एव सर्वज्ञस्तत एव सद्भूतार्थवादी । यत एव सद्भूतार्थवादी, तत एव त्रिभुवनाभ्यर्च्य इति । एवमतिशयचतुष्टयीप्रवरं वीरं महावीरं वर्तमानतीर्थाधिपतिं श्रीवर्धमानापराभिधानं नत्वा मनसा तदतिशयचिन्तनेन वाचा तदुच्चारणेन कायेन भूमौ शिरोलगनेन च प्रणिधायेत्यर्थः । एतेनादिमं मङ्गलमभिदधौ । मध्यमङ्गलं तु "जिनेन्द्रो देवता तत्र रागद्वेषविवर्जित" इत्यादिना

जिनमतकीर्तनेन कीर्तयिष्यति । अन्यमङ्गलं पुनरभिधेय-तात्पर्यार्थः पर्यालोच्यः सुबुद्धिभिरित्यत्र सुबुद्धिशब्दसंशब्दनेन वक्ष्यति । तस्य त्रिविधस्यापि फलमिदम् ।

तं मंगलमाईए मज्झे पज्जंतए य सत्थस्स ।
पढमं सत्थस्साविग्घपारगमणाए निद्दिट्ठं ॥
तस्सेवाविग्घत्थं मज्झिमयं अंतिमं च तस्सेव ।
अव्वोच्छित्तिनिमित्तं सिस्सपसिस्सादवंसस्स ॥

वीरं नत्वेत्युक्तं, तत्र क्त्वाप्रत्ययस्योत्तरक्रियासापेक्षत्वान्निगद्यत इति क्रियापदमत्र संबन्धनीयम् । को निगद्यते । सर्व दर्शनवाच्योऽर्थः । सर्वाणि मूलभेदापेक्षया समस्तानि यानि दर्शनानि बौद्धादीनि तैस्तेषां वा वाच्योऽभिधेयोऽर्थादेव तत्त्वप्रमाणादिलक्षणः संक्षेपेण समासेन निगद्यते ऽभिधीयते । मयेत्यनुक्तमप्यर्थाद् गम्यते । एतेन साक्षादभिधेयमभ्यधात् ॥

संबन्धप्रयोजने तु सामर्थ्यादवसेये । सर्वदर्शनवक्तव्यदेव-तत्त्वादिज्ञानमुपेयं, इदं शास्त्रं तस्योपायः, एवमुपायोपेयलक्षणः संबन्धः सूचितो द्रष्टव्यः । प्रयोजनं तु द्वेधा, कर्तुः श्रोतुश्च । द्वयमपि द्वेधा, अनन्तरं परंपरं च । कर्तुरनन्तरं प्रयोजनं सत्त्वानुग्रहः । श्रोतुरनन्तरं सर्वदर्शनाभिमतदेवतत्त्वप्रमाणादि-ज्ञानम् । द्वयोरपि परंपरं पुनर्हेयोपादेयदर्शनानि ज्ञात्वा हेयान्यपहायोपादेयं चोपादाय परंपरयानन्तचतुष्टयात्मिका सिद्धिरिति ॥ नन्वयं शास्त्रकारः सर्वदर्शनसंबन्धीनि शास्त्राणि सम्यक्परिज्ञायैव परोपकाराय प्रस्तुतं शास्त्रं दृब्धवान्, तत्कथ-

मनेनैवेदं नाभिदधे अमुकममुकं दर्शनं हेयममुकं चोपादेयमिति चेत् । उच्यते । इह सर्वदर्शनान्यभिधेयतया प्रक्रान्तानि, तानि माध्यस्थ्येनैवाभिदधानोऽचौचितीं नातिक्रामति । इदमिदं हेयमिदं चोपादेयमिति ब्रुवाणस्तु प्रत्युत सतां सर्वदर्शनानां चानादेयवचनो वचनीयतामश्नुते ॥ नन्वेवं तर्ह्यस्याचार्यस्य न परोपकारार्था प्रवृत्तिः । कुत एवं भाषसे । नन्वेष दर्शयामि । ये केचन मादृशाः श्रोतारः स्वयमल्पबुद्धित्वेन हेयोपादेयदर्शनानां विभागं न जानीयुस्तेषां सर्वदर्शनसतत्त्वं निशम्य प्रत्युतैवं बुद्धिर्भवेत् । सर्वदर्शनानि तावन्मिथोविरुद्धाभिधायीनि । तेषु च कतरत्परमार्थसदिति न परिच्छिद्यते । तत्किमेतैर्दर्शनैर्दुर्ज्ञानैः प्रयोजनम् । यदेव हि स्वस्मै रोचते तदेवानुष्ठेयमिति । एवंविधास्त्वविभागज्ञा अस्मिन्काले भूयांसोऽनुभूयन्ते । तदेवं शास्त्रकारस्य सूरेरुपकाराय प्रवृत्तस्य प्रत्युत प्रभूतानामपकारायापि प्रवृत्तिः प्रबभूव, ततश्च लाभमिच्छतो मूलहानिरजनिष्टेति चेत् । न, शास्त्रकारात्सर्वोपकारायैव प्रवृत्तात्कस्याप्यपकारासिद्धेः, विशेषणद्वारेण हेयोपादेयविभागस्यापि कतिपयसद्धृदयहृदयसंवेद्यस्य संसूचनात् । तथाहि । सद्दर्शनं जिनं नत्वा । सद्विद्यमाने सत्ये च प्रशस्तार्चितसाधुष्वित्यनेकार्थनाममालावचनात् । सत्सत्यं न पुनरसत्यं दर्शनं मतं यस्य तम् । जिनमिति विशेष्यम् । चतुर्विंशतेरपि जिनानामेकतरं रागादिशत्रुजयात्सान्वयनामानं जिनं वीतरागं नत्वा । एतेन पदद्वयेन चतुर्विंशतेरपि जिनाना-

मन्योन्यं मतभेदो नास्तीति सूचितम् । तर्हि श्वेताम्बरदिगम्बराणां कथं मिथो मतभेद इति चेत् । उच्यते । मूलतोऽमीषां मिथो न भेदः किंतु पाश्चात्य एवेति ॥ कीदृशं जिनम् । अवीरम् । आः स्वयंभूः, अः कृष्णः, उरीश्वरः । आ, अ, उ इति
5 स्वरत्रययोगे ओरिति सिद्धम् । तानीरयति तन्मतापासनेन प्रेरयतीत्यचिप्रत्ययेऽवीरम् । सृष्ट्यादिकर्तृब्रह्मकृष्णेश्वरदेवताभिमतमतानां निरासकमित्यर्थः ॥

तथा स्याद्वाददेशकम् । स्याद्वादं द्यन्ति च्छिन्दते "क्वचिड्ड" इति डप्रत्यये स्याद्वाददास्तत्तदसद्भूतविरोधादिदूषणोद्घोषणैः
10 स्याद्वादस्य च्छेदिन इत्यर्थः । तेषां ईं लक्ष्मीं महिमानं वाश्यति तत्तदीयमतापासनेन तनूकरोति यत्तत्स्याद्वाददेशम् । कै गै रै शब्दे । कै कायतीति "क्वचिड्ड" इति डे कं वचनम् । स्याद्वाददेशं कं वचनं यस्य तम् । अनेन विशेषणेन प्रागुक्तानामशेषाणां बौद्धादीनां संभवैतिह्यप्रमाणवादिचरकप्रमुखाणां
15 च मतानामुच्छेदकारि वचनमित्यर्थः । जिनं नत्वा मया सर्वदर्शनवाच्योऽर्थो निगद्यत इत्युक्तं ग्रन्थकृता । अत्र च नमनक्रिया प्राक्कालसंबन्धिनी त्वाप्रत्ययस्य प्राक्कालवाचकत्वात्, निगदनक्रिया तु वर्तमानजा । ते चैकेनैव ग्रन्थकृता क्रियमाणे नानुपपन्ने, अपरथा सकलव्यवहारोच्छेदप्रसङ्गात् । न चैवं
20 भिन्नकालयोः क्रिययोरेककर्तृकता बौद्धमते संभवति, तेन क्षणिकवस्त्वभ्युपगमात् ॥

ततः कश्चिद्बौद्धमतस्य प्रस्तुतग्रन्थस्यादावुक्तत्वेनोपादेयतां

मन्येत्। तन्निवारणाय प्रागुक्तविशेषणसंगृहीतमपि बौद्धमत-
निरसनं पुनरिह सूचितं द्रष्टव्यम्। एतेषां परदर्शनानां निर-
सनप्रकारो ग्रन्थान्तराद्वसेयः। तदेवं जिनस्य विशेषद्वारेण
सत्यदर्शनतां सर्वपरदर्शनजेतृवचनतां चाभिदधताखिलान्य-
दर्शनानां हेयता जैनदर्शनस्योपादेयता सूचिता मन्तव्या। 5
ततो नास्माद्ग्रन्थकारात्सत्यासत्यदर्शनविभागानभिज्ञानामपकारः
कश्चन संभवतीति, तद्विभागस्यापि व्यञ्जितत्वात्॥ तत्रापरः
कश्चिदाह। ननु येषां सत्यासत्यमतविभागाविर्भावके
ग्रन्थकारवचसि सम्यगाश्रद्धा न भविष्यति, तेषां का वार्तेति।
उच्यते। येषामाश्रद्धा न भाविनी, ते द्वेधा। एके रागद्वेषा- 10
भावेन मध्यस्थचेतसः, अन्ये पुना रागद्वेषादिकालुष्यकलुषितत्वा-
द्दुर्बोधचेतसः। ये दुर्बोधचेतसस्तेषां सर्वज्ञेनापि सत्यासत्य-
विभागप्रतीतिः कर्तुं दुःशका, किं पुनरपरेणेति तानवगणय्य
मध्यस्थचेतस उद्दिश्य विशेषणवृत्त्या सत्यासत्यमतविभागज्ञान-
स्योपायं प्राह। सद्दर्शनमिति। वीरं कथं भूतम्। सद्दर्शनम्। 15
सन्तः साधवो मध्यस्थचेतस इति यावत्, तेषां दर्शनं
ज्ञानमर्थात्सत्यासत्यमतविभागज्ञानं यथावदाप्तत्वपरीक्षाक्षमत्वेन
यस्माद्वीरात्स सद्दर्शनस्तम्। एतेन श्रीवीरस्य यथावदाप्तत्वा-
दिस्वरूपमेव परीक्षणीयमिति सूचितम्। अथवा सतां
साधूनां दर्शनं तत्त्वार्थश्रद्धानलक्षणं यस्मात्स सद्दर्शनः। अथवा 20
सन्तो विद्यमाना जीवादयः पदार्थास्तेषां दर्शनं यथावद-
वलोकनं यस्माद्वीरात्स सद्दर्शनस्तम्। कुत एवंविधम्। यतः

स्याद्वादद्वेषकं, प्रागुक्तस्याद्वादभाषकम् । एवंविधमपि कुत इत्याह । यतो जिनं रागद्वेषादिजयनशीलम् । जिनो हि वीतरागत्वादसत्यं न भाषते, तत्कारणाभावादिति भावः । शेषश्लोकव्याख्यानं प्राग्वत् ॥ एवं चाचैवमुक्तं भवति । ये हि श्रीवीरस्य यथावदाप्तत्वादिपरीक्षां विधास्यन्ते स्याद्वादं च तत्प्रणीतं मध्यस्थतया सम्यगवलोक्य पश्चात्परमतान्यप्यालोकयिष्यन्ते, ते सत्यासत्यदर्शनविभागमपि स्वयमेवावभोत्स्यन्ते । किमस्मद्वचनस्याख्याकरणाकरणेनेति । एतेन ग्रन्थकृता सर्वथाचार्येण माध्यस्थ्यमेव दर्शितं द्रष्टव्यं, सत्यासत्यदर्शनविभागपरिज्ञानोपायश्च हितबुद्ध्याचाभिहितोऽवगन्तव्यः, पुरातनैरपीत्थमेव सत्यासत्यदर्शनविभागस्य करणात् । तदुक्तं पूज्यश्रीहरिभद्रसूरिभिरेव लोकतत्त्वनिर्णये ।

बन्धुर्न नः स भगवान् रिपवोऽपि नान्ये
साक्षान्न दृष्टचर एकतरोऽपि चैषाम् ।
श्रुत्वा वचः सुचरितं च पृथग्विशेषं
वीरं गुणातिशयलोलतया श्रिताः स्मः ॥ १ ॥
पक्षपातो न मे वीरे न द्वेषः कपिलादिषु ।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः ॥ २ ॥

प्रभुश्रीहेमसूरिभिरप्युक्तं वीरस्तुतौ ।

न श्रद्धयैव त्वयि पक्षपातो न द्वेषमात्रादरुचिः परेषु ।
यथावदाप्तत्वपरीक्षया तु त्वामेव वीर प्रभुमाश्रिताः स्मः ॥ १ ॥

इति ॥

नन्वत्र सर्वदर्शनवाच्योऽर्थो वक्तुं प्रक्रान्तः, स च संख्यातिक्रान्तः। तत्कथं स्वल्पीयसानेन प्रस्तुतशास्त्रेण सोऽभिधातुं शक्यो, जैनादन्यदर्शनानां परसमयापरनामधेयानामसंख्यातत्वात्। तदुक्तं सम्मतिसूत्रे श्रीसिद्धसेनदिवाकरेण

जावइया वयणपहा तावइया चेव हुंति नयवाया। जावइया नयवाया तावइया चेव परसमया ॥ १ ॥

व्याख्या ॥ अनन्तधर्मात्मकस्य वस्तुनो य एकदेशोऽन्यदेशनिरपेक्षस्य यदवधारणं सोऽपरिशुद्धो नयः। स एव च वचनमार्ग उच्यते। एवं चानन्तधर्मात्मकस्य सर्वस्य वस्तुन एकदेशानामितरांशनिरपेक्षाणां यावन्तोऽवधारणप्रकाराः संभवन्ति, तावन्तो नया अपरिशुद्धा भवन्ति। ते च वचनमार्गा इत्युच्यन्ते॥ ततोऽयं गाथार्थः। सर्वस्मिन् वस्तुनि यावन्तो यावत्संख्या वचनपथा वचनानामन्योन्यैकदेशवाचकानां शब्दानां मार्गा अवधारणप्रकारा भवन्ति, तावन्त एव भवन्ति नयवादाः, नयानां तत्तदेकदेशावधारणप्रकाराणां वादाः प्रतिपादकाः शब्दप्रकाराः। यावन्तो नयवादा एकैकांशावधारणवाचकशब्दप्रकाराः, तावन्त एव परसमया परदर्शनानि भवन्ति, स्वेच्छाप्रकल्पितविकल्पनिबन्धनत्वात्परसमयानां विकल्पानां चासंख्यत्वात्। अयं भावः। यावन्तो जने तत्तदपरापरवस्त्वेकदेशानामवधारणप्रतिपादकाः शब्दप्रकारा भवेयुस्तावन्त एव परसमया भवन्ति। ततस्तेषामपरिमितत्वमेव स्वकल्पनाशिल्पिघटितविकल्पानामनियतत्वात् तदुत्थप्रवादानामपि तत्संख्या-

परिमाणत्वादिति । तदेवं गणनातिगाः परसमया भवन्ति । अथवा सूचकृदाख्ये द्वितीयेऽङ्गे परप्रवादुकानां त्रीणि शतानि त्रिषष्ट्यधिकानि परिसंख्यायन्ते । तदर्थसंग्रहगाथेयं ।

असिदसयं किरियाणं अकिरियवाईण होइ चुलसीई ।
अन्नाणिअ सत्तट्ठी वेणइयाणं च बत्तीसं ॥ १ ॥

अस्या व्याख्या ॥ अशीत्यधिकं शतम् । किरियाणंति क्रियावादिनाम् ॥ तत्र क्रियां जीवाद्यस्तित्वं वदन्तीत्येवंशीलाः क्रियावादिनः, मरीचिकुमारकपिलोलूकमाठरप्रभृतयः । ते पुनरमुनोपायेनाशीत्यधिकशतसंख्या विज्ञेयाः । जीवाजीवास्रवबन्धसंवरनिर्जरापुण्यापुण्यमोक्षरूपान्नव पदार्थान् परिपाट्या पङ्क्तिकादौ विरचय्य जीवपदार्थस्याधः स्वपरभेदावुपन्यसनीयौ । तयोरधो नित्यानित्यभेदौ, तयोरप्यधः कालेश्वरात्मनियतिस्वभावभेदाः पञ्च न्यसनीयाः । ततश्चैवं विकल्पाः कर्तव्याः । तद्यथा ॥

अस्ति जीवः स्वतो नित्यः कालत इत्येको विकल्पः । अस्य च विकल्पस्यायमर्थः । विद्यते खल्वयमात्मा स्वेन रूपेण नित्यश्च कालतः कालवादिनो मते । कालवादिनश्च नाम ते मन्तव्या ये कालकृतमेव जगत्सर्वं मन्यन्ते । तथा च ते प्राहुः । न कालमन्तरेण चम्पकाशोकसहकारादिवनस्पतिकुसुमोद्गमफलबन्धादयो हिमकणानुषक्तशीतप्रपातनक्षत्रगर्भाधानवर्षादयो वर्तुविभागसंपादिता बालकुमारयौवनवलिपलितागमादयो वावस्थाविशेषा घटन्ते, प्रतिनियतकालविभागत एव तेषा-

मुपलभ्यमानत्वात्। अन्यथा सर्वमव्यवस्थया भवेत्। न चैतेदृष्टमिष्टं वा। अपि च। मुद्गपक्तिरपि न कालमन्तरेण लोके भवन्ती दृश्यते। किं तु कालक्रमेण। अन्यथा स्थाली-न्धनादिसामग्रीसंपर्कसंभवे प्रथमसमयेऽपि तस्या भावो भवेत्। न च भवति। तस्माद्यत्कृतकं तत्सर्वं कालकृतमिति। तथा चोक्तम्। 5

न कालव्यतिरेकेण गर्भबालशुभादिकम्।
यत्किंचिज्जायते लोके तदसौ कारणं किल ॥ १ ॥
किं च कालादृते नैव मुद्गपक्तिरपीष्यते।
स्थाल्यादिसंनिधानेऽपि ततः कालादसौ मता ॥ २ ॥
कालाभावे च गर्भादि सर्वं स्यादव्यवस्थया। 10
परेष्टहेतुसद्भावमात्रादेव तदुद्भवात् ॥ ३ ॥
कालः पचति भूतानि कालः संहरते प्रजाः।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ ४ ॥

अत्र परेष्टहेतुसद्भावमात्रादिति पराभिमतवनितापुरुष-संयोगादिरूपहेतुसद्भावमात्रादेव तदुद्भवादिति गर्भाद्युद्भव- 15 प्रसङ्गात्। तथा कालः पचति, परिपाकं नयति परिणतिं नयति भूतानि पृथिव्यादीनि। तथा कालः संहरते प्रजाः, पूर्वपर्यायात्प्रच्याव्य पर्यायान्तरेण प्रजा लोकान्स्थापयति। तथा कालः सुप्तेषु जागर्ति, काल एव सुप्तं जनमापदो रक्षतीति भावः। तस्माद् हि स्फुटं दुरतिक्रमोऽपाकर्तुमशक्यः 20 काल इति ॥

उक्तेनैव प्रकारेण द्वितीयोऽपि विकल्पो नवरं कालवादिन

इति वक्तव्ये ईश्वरवादिन इति वक्तव्यम्। तद्यथा। अस्ति जीवः स्वतो नित्यः ईश्वरतः। ईश्वरवादिनश्च सर्वं जगदीश्वरकृतं मन्यन्ते। ईश्वरं च सहसिद्धज्ञानवैराग्यधर्मैश्वर्यरूपचतुष्टयं प्राणिनां च स्वर्गापवर्गयोः प्रेरकमिति। तदुक्तम्।

ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः।
ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ॥ १ ॥
अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥२॥ इत्यादि।

तृतीयो विकल्प आत्मवादिनाम्। आत्मवादिनो नाम पुरुष एवेदं सर्वमित्यादि प्रतिपन्नाः ॥

चतुर्थो विकल्पो नियतिवादिनाम्। ते ह्येवमाहुः। नियतिर्नाम तत्त्वान्तरमस्ति यद्ग्रादेते भवाः सर्वेऽपि नियतेनैव रूपेण प्रादुर्भावमश्नुवते, नान्यथा। तथाहि। यद्यदा यतो भवति तत्तदा तत एव नियतेनैव रूपेण भवदुपलभ्यते। अन्यथा कार्यकारणव्यवस्था प्रतिनियतरूपव्यवस्था च न भवेत्, नियामकाभावात्। तत एवं कार्यनैयत्यतः प्रतीयमानामेनां नियतिं को नाम प्रमाणपथकुशलो बाधितुं क्षमते। मा प्रापदन्यत्रापि प्रमाणपथव्याघातप्रसङ्गः। तथा चोक्तम्

नियतेनैव रूपेण सर्वे भावा भवन्ति यत्।
ततो नियतिजा ह्येते तत्स्वरूपानुवेधतः ॥ १ ॥
यद्यदैव यतो यावत्तत्तदैव ततस्तथा।
नियतं जायते न्यायात् क एनां बाधितुं क्षमः ॥ २ ॥

पञ्चमो विकल्पः स्वभाववादिनाम्। स्वभाववादिनो ह्येवमाहुः। इह वस्तुनः स्वत एव परिणतिः स्वभावः। सर्वे भावाः स्वभाववशादुपजायन्ते। तथाहि। मृदः कुम्भो भवति न पटादिः। तन्तुभ्योऽपि पट उपजायते न घटादिः। एतच्च प्रतिनियतं भवनं न तथा स्वभावतामन्तरेण घटाशंटङ्कमाटीकते। तस्मात्सकलमिदं स्वभावकृतमवसेयम्। तथा चाहुः।

कः कण्टकानां प्रकरोति तैक्ष्ण्यं
विचित्रभावं मृगपक्षिणां च।
स्वभावतः सर्वमिदं प्रवृत्तं न
कामचारोऽस्ति कुतः प्रयत्नः ॥ १ ॥

वृथाः कण्टकस्तीक्ष्ण ऋजुरेकश्च कुत्रचित्।
फलं च वर्तुलं तस्मा वद केन विनिर्मितम् ॥२॥ इत्यादि।

अपि च। आस्तामन्यत्कार्यजातमिह मुद्गपक्तिरपि न स्वभावमन्तरेण भवितुमर्हति। तथाहि। स्थालीन्धनकालादि सामग्रीसंभवेऽपि न कंकदुकमुद्गानां पक्तिरुपलभ्यते। तस्माद्यद्भावे न भवति तत्तदन्वयव्यतिरेकानुविधायि तत्कृतमिति। स्वभावकृता मुद्गपक्तिरप्येष्टव्या। ततः सकलमेवेदं वस्तुजातं स्वभावहेतुकमवसेयमिति ॥

तदेवं स्वत इति पदेन लब्धाः पञ्च विकल्पाः। एवं च परत इत्यनेनापि पञ्च लभ्यन्ते। परत इति परेभ्यो व्यावृत्तेन रूपेणात्मा विद्यते। यतः प्रसिद्धमेतत्। सर्वपदार्थानां परपदार्थस्वरूपापेक्षया स्वरूपपरिच्छेदो यथा दीर्घत्वाद्यपेक्षया

दुःखत्वादिपरिच्छेदः । एवमात्मनि सुखादीन्समीक्ष्य तद्व्यतिरिक्तबुद्धिः प्रवर्तते । अतो यदात्मनः स्वरूपं तत्परत एवावधार्यते, न स्वत इति । एवं नित्यत्वापरित्यागेन दश विकल्पा लब्धाः । एवमनित्यपदेनापि सर्वेऽपि मिलिता विंशतिः । एते च जीवपदार्थेन लब्धाः । एवमजीवादिष्वष्टसु पदार्थेषु प्रत्येकं विंशतिर्विंशतिर्विकल्पा लभ्यन्ते । ततो विंशतिर्नवगुणिता शतमशीत्युत्तरं क्रियावादिनां भवति ॥

तथा न कस्यचित्प्रतिक्षणमवस्थितस्य पदार्थस्य क्रिया संभवति, उत्पत्त्यनन्तरमेव विनाशादित्येवं ये वदन्ति ते अक्रियावादिन आत्मादिनास्तित्ववादिन इत्यर्थः । ते च कोक्कुल काण्ठेविद्धिरोमकसुगतप्रमुखाः । तथा चाऽऽहुरेके ।

क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया ।
भूतिर्येषां क्रिया सैव कारणं सैव चोच्यते ॥ १ ॥

एतेषां चतुरशीतिर्भवति । सा चामुनोपायेन द्रष्टव्या । पुण्यापुण्यवर्जितशेषजीवाजीवादिपदार्थसप्तकन्यासः । तस्य चाधः प्रत्येकं स्वपरविकल्पोपादानम् । असत्त्वादात्मनो नित्यानित्यविकल्पौ न स्तः । कालादीनां पञ्चानामधस्तात्षष्ठी यदृच्छा न्यस्यते । इह यदृच्छावादिनः सर्वेऽप्यक्रियावादिनस्ततः प्राग्यदृच्छा नोपन्यस्ता । तत एवं विकल्पाभिलापः । नास्ति जीवः स्वतः कालत इत्येको विकल्पः । अयं भावः । इह पदार्थानां लक्षणतः सत्ता निश्चीयते कार्यतो वा । न चात्मनस्तादृगस्ति लक्षणं, येन तत्सत्तां प्रतिपद्येमहि । नापि

कार्यमणूनामिव मशकोदुम्बरादि संभवति। अतो नास्त्यात्मेति। एवमीश्वरादिवादिभिरपि यदृच्छापर्यन्तैर्विकल्पा वाच्या। सर्वेऽपि मिलिताः षड्विकल्पा। अमीषां च विकल्पानामर्थः प्राग्वद्भावनीयः। नवरं यदृच्छात इति यदृच्छावादिनां मते। यदृच्छा ह्यनभिसंधिपूर्विकार्यप्राप्तिः॥ अथ के ते यदृच्छावादिनः। उच्यते। इह ये भावानां संतानापेक्षया न प्रतिनियतं कार्यकारणभावमिच्छन्ति, किं तु यदृच्छया, ते यदृच्छावादिनः, ते ह्येवमाहुः। न खलु प्रतिनियतो वस्तुनां कार्यकारणभावस्तथा प्रमाणेनाग्रहणात्। तथाहि। शालूकादपि जायते शालूको। गोमयादपि जायते शालूकः। वह्नेरपि जायते वह्निररणिकाष्ठादपि। धूमादपि जायते धूमोऽग्नीन्धनसंपर्कादपि। कन्दादपि जायते कन्दली बीजादपि। वटादयो बीजादुपजायन्ते शाखैकदेशादपि। गोधूमबीजादपि जायन्ते गोधूमा वंशबीजादपि। ततो न प्रतिनियतः क्वचिदपि कार्यकारणभाव इति। यदृच्छातः क्वचित्किंचिद्भवतीति प्रतिपत्तव्यम्। न खल्वन्यथा वस्तुसद्भावं पश्यन्तोऽन्यथात्मानं प्रेक्षावन्तः परिक्लेशयन्ति। यदुक्तम्।

अतर्कितोपस्थितमेव सर्वं
चित्रं जनानां सुखदुःखजातम्।
काकस्य तालेन यथाभिघातो
न बुद्धिपूर्वोऽस्ति वृथाभिमानः॥ १॥

इत्यादि। दृष्टमेव सर्वं जातिजरामरणादिकं लोके काक-

ताभ्यामिति। तथा च स्वतः षड्विकल्पा लभ्यास्तथा नास्ति परतः काल इत्येवमपि षड्विकल्पा लभ्यन्ते। सर्वेऽपि मिलिता द्वादश विकल्पा जीवपदेन लभ्याः। एवमजीवादिष्वपि षट्सु पदार्थेषु प्रत्येकं द्वादश विकल्पा लभ्यन्ते। ततो द्वादशभिः सप्त गुणिताश्चतुरशीतिर्भवन्त्यक्रियावादिनां विकल्पाः॥

तथा कुत्सितं ज्ञानमज्ञानं तदेषामस्तीत्यज्ञानिकाः। ततोऽनेकस्वरादिति मत्वर्थीय ठकप्रत्ययः। अथवाज्ञानेन चरन्तीत्यज्ञानिकाः, असंचिन्त्यकृतकर्मबन्धवैफल्यादिप्रतिपत्तिलक्षणाः साकल्यसात्यमुग्रिमौदपिप्फलादबादरायणजैमिनिवसुप्रभृतयः। ते ह्येवं ब्रुवते। न ज्ञानं श्रेयः, तस्मिन् सति विरुद्धप्ररूपणायां विवादयोगतश्चित्तकालुष्यादिभावतो दीर्घतरसंसारप्रवृत्तेः। यदा पुनर ज्ञानमश्रीयते तदा नाहंकारसंभवो नापि परस्योपरि चित्तकालुष्यभावः, ततो न बन्धसंभवः। अपि च। यः संचिन्त्य क्रियते कर्मबन्धः स दारुणविपाकोऽत एवावश्यवेद्यस्तस्य तीव्राध्यवसायतो निष्पन्नत्वात्। यस्तु मनोव्यापारमन्तरेण कायवाक्कर्मवृत्तिमात्रतो विधीयते, न तत्र मनसोऽभिनिवेशस्ततो नासावावश्यं वेद्यो नापि तस्य दारुणो विपाकः। केवलमतिशुष्कसुधापङ्कधवलितभित्तिगतरजोमल इव स कर्मसङ्गः स्वत एव शुभाध्यवसायपवनविद्योभितोऽपयाति। मनसोऽभिनिवेशाभावश्चाज्ञानाभ्युपगमेसमुपजायते, ज्ञाने सत्यभिनिवेशसंभवात्। तस्माद्ज्ञानमेव मुमुक्षुणा

मुक्तिपथप्रवृत्तेनाभ्युपगन्तव्यं, न ज्ञानमिति ॥ अन्यच्च । भवेद्युक्तो ज्ञानस्याभ्युपगमो, यदि ज्ञानस्य निश्चयः कर्तुं पार्यते । यावता स एव न पार्यते । तथाहि । सर्वेऽपि दर्शनिनः परस्परं भिन्नमेव ज्ञानं प्रतिपन्नाः । ततो न निश्चयः कर्तुं शक्यते, किमिदं सम्यगुतेदमिति । अथ यत्सकलवस्तुस्तोमसाक्षात्कारिभगवद्वर्धमानोपदेशादुपजायते ज्ञानं तत्सम्यगेतरत्, असर्वज्ञमूलत्वादिति चेत् । सत्यमेतत्, किं तु स एव सकलवस्तुस्तोमसाक्षात्कारी, न तु सौगतादिसंमतः सुगतादिरिति कथं प्रतीयते, तद्ग्राहकप्रमाणाभावादिति तदवस्थः संशयः । ननु यस्य दिवः समागत्य देवाः पूजादिकं कृतवन्तः, स एव वर्धमानः सर्वज्ञो, न शेषाः सुगतादय इति चेन्न, वर्धमानस्य चिरातीतत्वेनेदानीं तद्भावग्राहकप्रमाणाभावात् । संप्रदायादवसीयत इति चेत् । ननु सोऽपि संप्रदायो धूर्तपुरुषप्रवर्तितः किं वा सत्यपुरुषप्रवर्तित इति कथमवगन्तव्यं, प्रमाणाभावात् । न चाप्रमाणकं वयं प्रतिपत्तुं क्षमाः । मा प्रापदतिप्रसङ्गः । अन्यच्च । मायाविनः स्वयमसर्वज्ञा अपि जगति स्वस्य सर्वज्ञभावं प्रचिकटयिषवस्तथाविधेन्द्रजालवशाद्दर्शयन्ति देवानितस्ततः संचरतः स्वस्य पूजादिकं कुर्वतः । ततो देवागमदर्शनादपि कथं तस्य सर्वज्ञत्वनिश्चयः । तथा चाह जैन एव स्तुतिकारः समन्तभद्रः ।

देवागमनभोयानचामरादिविभूतयः ।
मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान् ॥ १ ॥

भवतु वा वर्धमानस्वामी सर्वज्ञस्तथापि तस्य सत्कोऽयमा-

चाराङ्गादिक उपदेशः, न पुनः केनापि धूर्तेन स्वयं विरचय्य प्रवर्तित इति कथमवसेयं, अतीन्द्रिये विषये प्रमाणाभावात्। भवतु वा तस्यैवायमुपदेशस्तथापि तस्यायमर्थो नान्य इति न शक्यं प्रत्येतुं, नानार्था हि शब्दा लोके प्रवर्तन्ते, तथादर्शनात्। ततोऽन्यथाप्यर्थसंभावनायां कथं विवक्षितार्थे निश्चयः। छद्मस्थेन हि परचेतोवृत्तेरप्रत्यक्षत्वात् कथमिदं ज्ञायते "एष सर्वज्ञस्याभिप्रायोऽनेन चाभिप्रायेणायं शब्दः प्रयुक्तो नाभिप्रायान्तरेण" इति। तदेवं दीर्घतरसंसारकारणत्वात् सम्यग्निश्चयाभावाच्च न ज्ञानं श्रेयः, किं लज्ञानसेवेति स्थितम्॥

ते चाज्ञानिकाः सप्तषष्टिसंख्या अमुनोपायेन प्रतिपत्तव्याः। इह जीवाजीवादीन् पदार्थान्कश्चित्पटकादौ व्यवस्थाप्य पर्यन्त उत्पत्तिः स्थाप्यते। तेषां च जीवादीनां नवानां प्रत्येकमधः सप्त सप्तादयो न्यस्यन्ते। तद्यथा। सत्त्वं १, असत्त्वं २, सदसत्त्वं ३, अवाच्यत्वं ४, सदवाच्यत्वं ५, असदवाच्यत्वं ६, सदसदवाच्यत्वं ७ चेति। तत्र सत्त्वं स्वरूपेण विद्यमानत्वम्। १। असत्त्वं पररूपेणाविद्यमानत्वम्। २। सदसत्त्वं स्वरूपपररूपाभ्यां विद्यमानाविद्यमानत्वम्। ३। तथा तदेव सत्त्वमसत्त्वं च यदा युगपदेकेन शब्देन वक्तुमिष्यते तदा तद्वाचकः शब्दः कोऽपि न विद्यत इत्यवाच्यत्वम्। ४। यदा त्वेको भागः सत्त्वपरस्यावाच्यो युगपद्विवक्ष्यते तदा सदवाच्यत्वम्। ५। यदा त्वेको भागोऽसत्त्वपरस्यावाच्यस्तदाऽसदवाच्यत्वम्। ६। यदा त्वेको भागः सत्त्वपरस्यासत्त्वपरतरस्यावाच्यस्तदा सदसद्-

वाच्यत्वमिति । ७ । न चैतेभ्यः सप्तभ्यो विकल्पेभ्यो ऽन्यो विकल्पः संभवति, सर्वस्यैतेष्वेवान्तर्भावात् । ततः सप्त विकल्पा उपन्यस्ताः । सप्त च विकल्पा नवभिर्गुणिता जातास्त्रिषष्टिः ॥ उत्पत्तेश्चत्वार एवाद्या विकल्पाः । तद्यथा । सत्त्वमसत्त्वं सदसत्त्वमवाच्यत्वं चेति । शेषविकल्पत्रयं त्वुत्पन्नुत्तरकालं पदार्थावयवापेक्षमतोऽत्रासंभवीति नोक्तम् । एते चत्वारो विकल्पास्त्रिषष्टिमध्ये प्रक्षीप्यन्ते ततः सप्तषष्टिर्भवन्ति । ततः को जानाति जीवः सन्नित्येको विकल्पः । न कश्चिदपि जानाति, तद्ग्राहकप्रमाणाभावादिति भावः । ज्ञातेन वा किं तेन प्रयोजनं, ज्ञातस्याभिनिवेशहेतुतया परलोकप्रतिपन्थित्वात् । एवमसदादयोऽपि विकल्पा भावनीयाः । उत्पत्तिरपि किं सतोऽसतः सदसतोऽवाच्यस्य वेति को जानाति, ज्ञातेन वा न किंचिदपि प्रयोजनमिति ॥

तथा विनयेन चरन्तीति वैनयिकाः, वसिष्ठपराशरवाल्मीकिव्यासेलापुत्रसत्यदत्तप्रभृतयः । एते चानवधृतलिङ्गाचारशास्त्रा विनयप्रतिपत्तिलक्षणा वेदितव्याः । ते च द्वात्रिंशत्संख्या अमुनोपायेन द्रष्टव्याः । सुरनृपतियतिस्थविराधममातृपितृरूपेष्वष्टसु स्थानेषु कायेन मनसा वाचा दानेन च देशकालोपपन्नेन विनयः कार्य इति चत्वारः कायादयः स्थाप्यन्ते । चत्वारश्चाष्टभिर्गुणिता जाता द्वात्रिंशत् ॥

एवमेतानि त्रीणि शतानि त्रिषष्ट्यधिकानि परदर्शनानां भवन्ति ॥

अथवा लोकस्वरूपेऽप्यनेके वादिनोऽनेकधा विप्रवदन्ति। तद्यथा। केचिन्नारीश्वरजं जगन्निगदन्ति। परे सोमाग्निसंभवम्। वैशेषिका द्रव्यगुणादिषड्विकल्पम्। केचित्काश्यपकृतम्। परे दक्षप्रजापतीयम्। केचिद् ब्रह्मादित्रयैकमूर्तिसृष्टम्। वैष्णवा विष्णुमयम्। पौराणिका विष्णुनाभिपद्मजब्रह्मजनितमाण्डजम्। त एव केचिदण्डम्। ब्रह्मणा वर्णादिभिः सृष्टम्। केचित्कालकृतम्। परे चित्याद्यष्टमूर्तीश्वरकृतम्। अन्ये ब्रह्मणो मुखादिभ्यो ब्राह्मणादिजन्मकम्। सांख्याः प्रकृतिभवम्। शाक्या विज्ञप्तिमात्रम्। अन्य एकजीवात्मकम्। केचिदनेकजीवात्मकम्। परे पुरातनकर्मकृतम्। अन्ये स्वभावजम्। केचिदचरजातभूतोद्भूतम्। केचिदण्डप्रभवम्। आश्रमी स्वहेतुकम्। पूरणो नियतिजनितम्। पराशरः परिणामप्रभवम्। केचिद्यादृच्छिकम्। नैकवादिनोऽनेकस्वरूपम्। तुरुष्का गोस्वामिनामैकदिव्यपुरुषप्रभवम्। इत्याद्योऽनेकवादिनो विद्यन्ते। एषां स्वरूपं लोकतत्त्वनिर्णयात् हारिभद्रादवसातव्यम्। एवं सर्वगतादिजीवस्वरूपे ज्योतिश्चक्रादिचारस्वरूपे च नैके विप्रतिपद्यन्ते। तथा बौद्धानामष्टादशनिकायभेदा वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकादिभेदा वा वर्तन्ते। जैमिनेश्च शिष्यकृता बहवो भेदा।

ओंकेकः कारिकां वेत्ति तन्त्रं वेत्ति प्रभाकरः।
वामनस्तूभयं वेत्ति न किंचिदपि रेवणः॥ १॥

अपरेऽपि बह्वदकुटीचरहंसपरमहंसभाट्टप्रभाकरादयो-

ऽनेकेऽन्तर्भेदाः। सांख्यानां चरकादयो भेदाः। अन्येषामपि सर्वदर्शनानां देवतत्त्वप्रमाणमुक्तिप्रभृतिस्वरूपविषये तत्तदनेकशिष्यसंतानकृतास्तत्तद्ग्रन्थकारकृता वा मतभेदा बहवो विद्यन्ते। तदेवमनेकानि दर्शनानि लोकेऽभिधीयन्ते॥ तानि च सर्वाणि देवतातत्त्वप्रमाणादिभेदेनाचाल्पीयसा प्रस्तुतग्रन्थेनाभिधातुमशक्यानि; तत्कथमचार्येणसर्वदर्शनवाच्योऽर्थो निगद्यत इत्येवं गदितुमशक्योऽर्थो वक्तुं प्रत्यज्ञायि, गगनाङ्गुलप्रमितिरिव पारावारोभयतटसिकताकणगणनमिवात्यन्तं दुःशक्योऽयमर्थः प्रारब्ध इति चेत्। सत्यमेतद्यद्यवान्तरतन्त्रभेदापेक्षया वक्तुमेषोऽर्थः प्रक्रान्तः स्यात्। यावता तु मूलभेदापेक्षयैव यानि सर्वाणि दर्शनानि तेषामेव वाच्योऽत्र वक्तव्यतया प्रतिज्ञातोऽस्ति नोत्तरभेदापेक्षया, ततो न कश्चन दोषः। सर्वशब्दं च व्याचक्षाणैरस्माभिः पुराप्ययमर्थो दर्शित एव, परं विस्मरणशीलेन भवता विस्मारित इति॥

एनमेवार्थं ग्रन्थकारोऽपि साक्षादाह

दर्शनानि षडेवात्र मूलभेदव्यपेक्षया।
देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः॥ २॥

अत्र प्रस्तुतेऽस्मिन्ग्रन्थे दर्शनानि षडेव मूलभेदव्यपेक्षया मूलभेदापेक्षया मनीषिभिर्मेधाविभिर्ज्ञातव्यानि। न पुनरवान्तरतन्त्रभेदापेक्षयाधिकानि परमार्थतस्तेषामेष्वेवान्तर्भावात्। षडेवेति सावधारणं पदम्। केन हेतुना मूलभेदानां षोढात्व-

मित्याशंक्याह । देवतातत्त्वभेदेनेति । देवा एव देवताः, स्वार्थेऽत्र तल्प्रत्ययः । तत्त्वानि प्रमाणैरुपपन्नाः । परमार्थसन्तोऽर्थाः । द्वन्द्वे देवतातत्त्वानि, तेषां भेदेन पार्थक्येन । ततोऽयमत्रार्थः । देवतातत्त्वभेदेन यतो दर्शनानां षडेव मूलभेदा भवेयुस्ततः षडेवात्र दर्शनानि वक्ष्यन्ते, न पुनरुत्तरभेदापेक्षयाधिकानीति । एतेन प्राक्तनश्लोके सर्वशब्दग्रहणेऽपि षडेवात्र दर्शनानि वक्तुं प्रतिज्ञातानि सन्तीति ज्ञापितं द्रष्टव्यम् ॥

अथ षण्णां दर्शनानां नामान्याह

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो ॥ ३ ॥

बुद्धाः सुगताख्ये च सप्त भवन्ति । विपश्यी १ शिखी २ विश्वभूः ३ ककुच्छन्दः ४ काञ्चनः ५ काश्यपः ६ शाक्यसिंहश्चेति ७। तेषामिदं दर्शनं बौद्धम् ॥ न्यायं न्यायतर्कमत्रपादर्षिप्रणीतं ग्रन्थं विदन्त्यधीयते वेति नैयायिकास्तेषामिदं दर्शनं नैयायिकम् ॥ संख्यां प्रकृतिप्रभृतितत्त्वपञ्चविंशतिरूपां विदन्त्यधीयते वा सांख्याः । यद्वा तालव्यादिरपि शांख्यध्वनिरस्तीति वृद्धाम्नायः । तत्र शंखनामा कश्चिदाद्यः पुरुषविशेषस्तस्यापत्यं पौत्रादिरिति गर्गादित्वात् यञ्प्रत्यये शांख्यास्तेषामिदं दर्शनं सांख्यं शांख्यं वा ॥ जिना ऋषभाद्यश्चतुर्विंशतिरर्हन्तस्तेषामिदं दर्शनं जैनम् । एतेन चतुर्विंशतेरपि जिनानामेकमेव दर्शनमजनिष्ट, न पुनस्तेषां मिथो मतभेदः

कोऽप्यासीदित्यावेदितं भवति ॥ नित्यद्रव्यवृत्तयोऽन्त्या विशेषा एव। वैशेषिकं, विनयादिभ्य इति स्वार्थ इकण्। तद्वैशेषिकं विदन्त्यधीयते वा, तद्वेत्त्यधीत, इत्यणि वैशेषिकास्तेषामिदं वैशेषिकम् ॥ जैमिनिराद्यः पुरुषविशेषस्तस्येदं मतं जैमिनीयं मीमांसकापरनामकम् ॥

तथाशब्दश्चकारश्चात्र समुच्चयार्थौ। एवमन्यत्राप्यवसेयम्। अमूनि षडपि दर्शनानां नामानि। अहो इति शिष्यामन्त्रणे। आमन्त्रणं च शिष्याणां चित्तव्यासङ्गत्याजनेन शास्त्रश्रवणायाभिमुखीकरणार्थमत्रोपन्यस्तम् ॥

[अथ बौद्धमतम्]।

अथ यथोद्देशस्तथा निर्देश इति न्यायादादौ बौद्धमतमाचष्टे।

तत्र बौद्धमते तावद्देवता सुगतः किल।
चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥ ४ ॥

तत्रशब्दो निर्धारणार्थः, तावच्छब्दोऽवधारणे। तेषु दर्शनेष्वपराणि तावत्तिष्ठन्तु, बौद्धमतमेव प्रथमं निर्धार्योच्यत इत्यर्थः। अत्र चादौ बौद्धदर्शनोपलक्षणार्थं मुग्धशिष्यानुग्रहाय बौद्धानां लिङ्गवेषाचारादिस्वरूपं प्रदर्श्यते। चमरो मौण्ड्यं

वृत्तिः कमण्डलुश्च लिङ्गम् । धातुरक्तमाशुल्कं परिधानं वेषः । शौचक्रिया बक्की ।

मृद्वी शय्या प्रातरुत्थाय पेया भक्तं मध्ये पानकं चापराह्णे ।
द्राक्षाखण्डं शर्करा चार्धरात्रे मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः ॥ १ ॥

मणुन्नं भोयणं भुच्चा मणुन्नं सयणासणं ।
मणुन्नंमि अगारंमि मणुन्नं झायए मुणी ॥ २ ॥

भिक्षायां पात्रे पतितं सर्वं शुद्धमिति मन्वाना मांसमपि भुञ्जते । ब्रह्मचर्यादिस्वकीयक्रियायां च भग्नं दृढतमा भवन्ति । इत्यादिराचारः । धर्मबुद्धसङ्घरूपं रत्नत्रयम् । तारादेवी शासने विघ्ननाशिनी । विपश्यादयः सप्त बुद्धाः कण्ठे रेखात्रयाङ्किताः सर्वज्ञा देवाः । बुद्धस्तु सुगतो धर्मधातुरित्यादीनि तन्नामानि । भिक्षुसौगतशाक्यशौद्धोदनिसुततथागतशून्यवादिनामानो बौद्धाः । तेषां शौद्धोदनिधर्मोत्तरार्चटधर्मकीर्तिप्रज्ञाकरदिग्नागप्रमुखा ग्रन्थकारा गुरवः ॥

अथ प्रस्तुतश्लोकोऽग्रतो व्याख्यायते । बौद्धमते बौद्धदर्शने सुगतो बुद्धो देवता देवः । किलेत्याप्तप्रवादे । कीदृशः सः । चतुर्णामित्यादि । आराद्दूराद्याताः सर्वहेयधर्मेभ्य इत्यार्याः । पृषोदरादित्वाद्रूपनिष्पत्तिः । सतां साधूनां पदार्थानां वा यथासंभवं मुक्तिप्रापकत्वेन यथावस्थितवस्तुरूपचिन्तनेन च हितानि सत्यानि । अथवा सद्भ्यो हितानि सत्यानि । आर्याणां सत्यानि आर्यसत्यानि तेषामार्यसत्यानामित्यर्थः । चतुर्णां दुःखादीनां दुःखसमुदयमार्गनिरोधलक्षणानां तत्त्वानां

प्ररूपको देशकः ॥ तच्च दुःखफलभूताः पञ्चोपादानस्कन्धा विज्ञानाद्यो वक्ष्यमाणाः । त एव तृष्णासहाया हेतुभूताः । समुदयः समुदेति स्कन्धपञ्चकलक्षणं दुःखमस्मादिति व्युत्पत्तितः । निरोधहेतुनैरात्म्याद्याकारश्चित्तविशेषो मार्गः । मार्गण् अन्वेषणे, मार्ग्यतेऽन्विष्यते याच्यते निरोधार्थिभिरिति चुरादिणिजन्तत्वेनाप्रत्ययः । निःक्लेशावस्था चित्तस्य निरोधः । निरुध्यते रागद्वेषोपहतचित्तलक्षणः संसारोऽनेनेति करणे घञि, मुक्तिरित्यर्थः । दुःखादीनामित्यत्रादिशब्दोऽनेकार्थोऽपि व्यवस्थार्थो मन्तव्यः । यदुक्तम्

सामीप्ये च व्यवस्थायां प्रकारेऽवयवे तथा ।
चतुर्ष्वर्थेषु मेधावी आदिशब्दं तु लक्षयेत् ॥ १ ॥

तत्रादिशब्दः सामीप्ये यथा ग्रामादौ घोष इति, व्यवस्थायां यथा ब्राह्मणादयो वर्णा इति, प्रकारे यथा आत्मा देवदत्तादय इति देवदत्तसदृशा आत्मा इत्यर्थः, अवयवे यथा स्तम्भादयो गृहा इति । अत्र तु व्यवस्थार्थः संगच्छते । दुःखमादि प्रथमं येषां तानि तथा तेषामिति बहुव्रीहिः ॥

अथ दुःखतत्त्वं व्याचिख्यासुराह ।

दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥ ५ ॥

दुःखं दुःखतत्त्वं किमित्याह । संसरन्ति स्थानात्स्थानान्तरं भवाद्भवान्तरं वा गच्छन्तीत्येवंशीलाः संसारिणः स्कन्धाः ।

सचेतना अचेतना वा परमाणुप्रचयविशेषाः। ते च स्कन्धाः पञ्च प्रकीर्तिताः। वाक्यस्य सावधारणत्वात्पञ्चैवाख्याताः। न त्वपरः कश्चिदात्माख्यः स्कन्धोऽस्तीति। के ते स्कन्धा इत्याह। विज्ञानमित्यादि। विज्ञानस्कन्धः, वेदनास्कन्धः, संज्ञास्कन्धः, संस्कारस्कन्धः, रूपस्कन्धश्च। एवशब्दः पूरणार्थे, चशब्दः समुच्चये। तत्र रूपविज्ञानं रसविज्ञानमित्यादि निर्विकल्पकं विज्ञानं विशिष्टज्ञानं विज्ञानस्कन्धः। निर्विकल्पकं च ज्ञानमेवंरूपमवसेयम्।

अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकं।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥ १ ॥ इति ॥

सुखा दुःखा अदुःखसुखा चेति वेदना वेदनास्कन्धः। वेदना हि पूर्वकृतकर्मविपाकतो जायते। तथा च सुगतः कदाचिच्छिन्नचामटाद्यमानः कण्टकेन चरणे विद्धः प्राह।

इत एकनवते कल्पे शक्त्या मे पुरुषो हतः।
तत्कर्मणो विपाकेन पादे विद्धोऽस्मि भिक्षवः ॥ इति ॥

संज्ञानिमित्तोद्ग्रहणात्मकः प्रत्ययः संज्ञास्कन्धः। तत्र संज्ञा गौरित्यादिका। गोत्वादिकं च तत्प्रतिपत्तिनिमित्तम्। तयोरुद्ग्रहणा योजना, तदात्मकः प्रत्ययो नामजात्यादियोजनात्मकं सविकल्पकं ज्ञानं संज्ञास्कन्ध इत्यर्थः॥ पुण्यापुण्यादिधर्मसमुदायः संस्कारस्कन्धः, यस्य संस्कारस्य प्रबोधात्पूर्वानुभूते विषये स्मरणादि समुत्पद्यते॥ पृथिवीधात्वादयो रूपादयश्च रूपस्कन्धः। न चैतेभ्यो विज्ञानादिभ्यो व्यतिरिक्तः कश्चनात्माख्यः

पदार्थः सुखदुःखेच्छाद्वेषज्ञानाधारभूतोऽध्यक्षेणावसीयते। नाप्यनुमानेन, तदव्यभिचारिलिङ्गग्रहणाभावात्। न च प्रत्यक्षानुमानव्यतिरिक्तमर्थाविसंवादि प्रमाणान्तरमस्तीति। ते च पञ्च स्कन्धाः क्षणमात्रावस्थायिन एव वेदितव्याः, न पुनर्नित्याः कियत्कालावस्थायिनो वा। एतच्च क्षणिकाः सर्वसंस्कारा इत्यत्र दर्शयिष्यते॥ दुःखतत्त्वं पञ्चभेदतथाभिधायाथ दुःखतत्त्वस्य कारणभूतं समुदयतत्त्वं व्याख्याति।

समुदेति यतो लोके रागादीनां गणोऽखिलः।
आत्मात्मीयभावाख्यः समुदयः स उदाहृतः॥ ६॥

यतो यस्मात्समुदयाल्लोके लोकमध्ये रागादीनां रागद्वेषादिदोषाणां गणः समवायोऽखिलः समस्तः समुदेति समुद्भवति। कीदृशो गण इत्याह। आत्मात्मीयभावाख्यः। आत्मा स्वं, आत्मीयः स्वकीयः, तयोर्भावस्तत्त्वम्। आत्मात्मीयभावः अयमात्मा अयं चात्मीय इत्येवं संबन्ध इत्यर्थः। उपलक्षणत्वादयं परोऽयं च परकीय इत्यादि संबन्धो द्रष्टव्यः। स एवाख्या नाम यस्य स आत्मात्मीयभावाख्यः। अयं भावः। आत्मात्मीयसंबन्धेन परपरकीयादिसंबन्धेन वा यतो रागद्वेषादयः समुद्भवन्ति, समुदयो नाम तत्त्वम्। बौद्धमत उदाहृतः कथितः। अत्रोत्तरार्धे सप्तनवाक्षरपादद्वये छन्दोन्तरसङ्गावाच्छन्दोभङ्गदोषो न चिन्त्यः, आर्षत्वात्प्रस्तुतग्रन्थस्य॥

अथ दुःखसमुदयतत्त्वयोः संसारनिमित्तयोर्विपक्षभूते मार्ग-निरोधतत्त्वे प्रपञ्चयन्नाह ।

क्षणिकाः सर्वसंस्कारा इत्येवं वासना यका ।
स मार्ग इह विज्ञेयो निरोधो मोक्ष उच्यते ॥ ७ ॥

परमनिकृष्टः कालः क्षणः । तत्र भवाः क्षणिकाः क्षणमात्रावस्थितय इत्यर्थः । सर्वे च ते संस्काराश्च पदार्थाः सर्वसंस्काराः क्षणविनश्वराः सर्वे पदार्था इत्यर्थः ॥ तथा च बौद्धा अभिदधति । स्वकारणेभ्यः पदार्थ उत्पद्यमानः किं विनश्वरस्वभाव उत्पद्यते ऽविनश्वरस्वभावो वा । यद्यविनश्वरस्वभावः, तदा तद्व्यापिकायाः क्रमयौगपद्याभ्यामर्थक्रियाया अभावात्पदार्थस्यापि व्याप्यस्याभावः प्रसजति । तथाहि । यदेवार्थक्रियाकारि तदेव परमार्थसदिति । स च नित्योऽर्थोऽर्थक्रियायां प्रवर्तमानः क्रमेण वा प्रवर्तेत यौगपद्येन वा । न तावत्क्रमेण, यतो ह्येकस्य अर्थक्रियायाः करणकाले तस्यापरार्थक्रियायाः करणस्वभावो विद्यते न वा । यदि विद्यते, कुतः क्रमेण करोति । अथ सहकार्यपेक्षया इति चेत्, तेन सहकारिणा तस्य नित्यस्य कश्चिदतिशयः क्रियते न वा । यदि क्रियते, तदा किं पूर्वस्वभावपरित्यागेन क्रियते ऽपरित्यागेन वा । यदि परित्यागेन, ततो ऽतादवस्थ्यापत्तेरनित्यत्वम् । अथ पूर्वस्वभावापरित्यागेन, ततस्तस्य नित्यस्य तत्कृतोपकाराभावात्किं सहकार्यपेक्षया कर्तव्यम् । अथाकिंचित्करा ऽपि सहकारी तेन विशिष्टकार्यार्थमपेक्षते । यतः ।

अपेक्ष्यते परः कश्चिद्यदि कुर्वीत किंचन ।
यदकिंचित्करं वस्तु किं केनचिदपेक्ष्यते ॥ १ ॥

अथ तस्य प्रथमार्थक्रियाकरणकाले ऽपरार्थक्रियाकरणस्वभावो न विद्यते । तथा च सति स्पष्टैव नित्यताहानिः । अथासौ नित्यो ऽर्थो यौगपद्येनार्थक्रियां कुर्यात् । तथा सति प्रथमक्षण एवाशेषार्थक्रियाणां करणाद्द्वितीयक्षणे तस्याकर्तृत्वं स्यात् । तथा च सैवानित्यतापत्तिः ॥ अथ तस्य तत्स्वभावत्वात् ता एवार्थक्रिया भूयो भूयो द्वितीयादिक्षणेष्वपि कुर्यात्, तदसांप्रतं कृतस्य करणाभावादिति । किं च द्वितीयादिक्षणसाध्या अपूर्वसार्थाः प्रथमक्षण एव प्राप्नुवन्ति, तस्य तत्स्वभावत्वात्, अतत्स्वभावे च तस्यानित्यत्वप्राप्तिरिति । तदेवं नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरहान्न स्वकारणेभ्यो नित्यस्योत्पाद इति ॥ अथ विनश्वरस्वभावः समुत्पद्यते । तथा च सति विघ्नाभावादायातमस्मदुक्तमशेषपदार्थजातस्य क्षणिकत्वम् । तथा चोक्तम् ।

जातिरेव हि भावानां विनाशे हेतुरिष्यते ।
यो जातश्च न च ध्वस्तो नश्येत्यस्यात्स केन वा ॥ १ ॥

नन्वनित्यत्वे सत्यपि यस्य घटादिकस्य यदैव मुद्गरादिसामग्रीसाकल्यं तदैव तद्विनश्वरमाकल्पते न पुनः प्रतिक्षणं, ततो विनाशकारणापेक्षाणामनित्यानामपि पदार्थानां न क्षणिकत्वमिति । तदेतदनुपाधितगुरोर्वचः, यतो मुद्गरादिसन्निधाने सति यो ऽस्य घटादिकस्याव्यवस्थायां विनाशस्वभावः स स्वभावस्तस्यैवोत्पत्तिसमये विद्यते न वा । विद्यते चेत्, आपतितं तर्हि

तदुत्पत्तिसमनन्तरमेव विनश्वरत्वम्। अथ न विद्यते स स्वभाव उत्पत्तिसमये, तर्हि कथं पश्चात्स भवेत्। अथेदृग्र एव तस्य स्वभावो यदुत कियन्तमपि कालं स्थित्वा तेन विनंष्टव्यमिति चेत्, तर्हि मुद्गरादिसन्निधाने ऽपेष एव तस्य स्वभावः स्यात्। ततो भूयो ऽपि तेन तावत्कालं स्थेयम्। एवं च मुद्गरादिघातग्रतपाते ऽपि न विनाग्रो भवेत्। जातं कल्पान्तस्थायित्वं घटादेः। तथा च जगद्व्यवहारव्यवस्था विलोपपातकपङ्किलता। इत्यभ्युपेयमनिच्छुनापि क्षणक्षयित्वं पदार्थानाम्। प्रयोगस्त्वेवम्। यद्विनश्वरस्वभावं तदुत्पत्तिसमये ऽपि तत्स्वरूपं, यथान्त्यक्षणवर्तिघटस्य स्वरूपम्। विनश्वरस्वभावं च रूपरसादिकमुदयत आरभ्येति स्वभावहेतुः। तदेवं विनाग्रहेतोरकिंचित्करत्वात्। स्वहेतुत एव पदार्थानामनित्यानामेवोत्पत्तेः क्षणिकत्वमवस्थितमिति। ननु यदि क्षणक्षयिणो भावाः, कथं तर्हि स एवायमिति ज्ञानम्। उच्यते। निरन्तरमदृग्रापरापरक्षणनिरीक्षणचैतन्योदयादविद्यानुबन्धाच्च पूर्वक्षणप्रलयकाल एव दीपकलिकायां दीपकलिकान्तरमिव तत्सदृग्रमपरं क्षणान्तरमुदयते। तेन समानाकारज्ञानपरंपरापरिचयचिरतरपरिणामान्निरन्तरोदयाच्च पूर्वक्षणानामत्यन्तोच्छेदे ऽपि स एवायमित्यध्यवसायः प्रसभं प्रादुर्भवति। दृश्यते च यथालूनपुनरुत्पन्नेषु नखकेशकलापादिषु स एवायमिति प्रतीतिः, तथेहापि किं न संभाव्यते स्वजनेन। तस्मात्सिद्धमिदं यत्सत्तत्क्षणिकमिति। अत एव युक्तियुक्तमेतत् क्षणिकाः सर्वसंस्कारा इति॥ अथ।

प्रस्तुतं प्रस्तूयते। क्षणिकाः सर्वसंस्कारा इत्यत्र इतिशब्दात्प्रकारार्थात् नास्त्यात्मा कश्चन, किं तु ज्ञानक्षणसंताना एव सन्तीत्यादिकमत्र गृह्यते। ततो ऽयमर्थः। क्षणिकाः सर्वे पदार्थाः, नास्त्यात्मेत्याद्याकारा एवमीदृशी यका, स्वार्थे कप्रत्यये, या वासना पूर्वज्ञानजनिता तदुत्तरज्ञाने शक्तिः क्षणपरंपराप्राप्ता मानसी प्रतीतिरित्यर्थः॥ स मार्गो नामार्यसत्यं, इह बौद्धमते, विज्ञयो ऽवगन्तव्यः। सर्वपदार्थक्षणिकत्वनैरात्म्याद्याकारश्चित्तविशेषो मार्ग इत्यर्थः। स च निरोधस्य कारणं द्रष्टव्यः॥ अथ चतुर्थमार्यसत्यमाह। निरोधो निरोधनामकं तत्त्वं, मोक्षो ऽपवर्गः, उच्यते ऽभिधीयते। चित्तस्य निःक्लेशावस्थारूपो निरोधो मुक्तिर्निगद्यत इत्यर्थः। एतानि दुःखादीन्यार्यसत्यानि चत्वारि यानि ग्रन्थकृताचानन्तरमेवोक्तानि सौत्रान्तिकमतेनैवेति विज्ञेयम्। वैभाषिकादिभेदनिर्देशं विना सामान्यतो बौद्धमतेन तु द्वादशैव ये पदार्था भवन्ति तानपि संप्रति विवक्षुः श्लोकमेनमाह।

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्।
धर्मायतनमेतानि द्वादशायतनानि च॥ ८॥

पञ्चसंख्यानीन्द्रियाणि श्रोत्रचक्षुर्घ्राणरसनस्पर्शनरूपाणि। शब्दाद्याः शब्दरूपरसगन्धस्पर्शा पञ्च विषया इन्द्रियगोचराः। मानसं चित्तं यस्य शब्दायतनमिति नामान्तरम्। धर्माः सुखदुःखादयस्तेषामायतनं गृहं शरीरमित्यर्थः। एतान्यनन्तरो-

क्तानि द्वादशसंख्यानि आयतनानि आयतनसंज्ञानि तत्त्वानि, चः समुच्चये, न केवलं प्राग्युक्तानि चत्वारि दुःखादीन्येव किं त्वेतानि द्वादशायतनानि च भवन्ति। एतानि चायतनानि क्षणिकानि ज्ञातव्यानि। यतो बौद्धा अत्रैवमभिदधते। अर्थक्रियालक्षणं सत्त्वं प्राग्युक्तन्यायेनाक्षणिकान्निवर्तमानं क्षणिकेष्वेवावतिष्ठते। तथा च सति सुलभं क्षणिकत्वानुमानं यत्सत्तत्क्षणिकं, यथा प्रदीपकलिकादि। सन्ति च द्वादशायतनानीति। अनेन चानुमानेन द्वादशायतनव्यतिरिक्तस्यापरस्यार्थस्याभावात्, द्वादशस्वायतनेष्वेव क्षणिकत्वं व्यवस्थितं भवतीति॥

तदेवं सौत्रान्तिकमतेन चत्वारि दुःखादीनि तत्त्वानि सामान्यतो बौद्धमतेन चायतनरूपाणि द्वादश तत्त्वानि प्रतिपाद्य संप्रति प्रमाणस्य विशेषलक्षणमत्राभिधानीयम्। तच्च सामान्यलक्षणाविनाभावीति प्रथमं प्रमाणस्य सामान्यलक्षणमुच्यते। प्रमाणमविसंवादि ज्ञानमिति। अविसंवादकं ज्ञानं प्रमाणम्। अविसंवादकत्वं चार्थप्रापकत्वेन व्याप्तमर्थाप्रापकस्याविसंवादित्वाभावात्, केशोण्डुकज्ञानवत्। अर्थप्रापकत्वं च प्रवर्तकत्वेन व्याप्ति, अप्रवर्तकस्यार्थाप्रापकत्वात्। तद्वदेव प्रवर्तकत्वमपि विषयोपदर्शकत्वेन व्याप्तम्। न हि ज्ञानं हस्ते गृहीत्वा पुरुषं प्रवर्तयति, स्वविषयं तूपदर्शयत्प्रवर्तकमुच्यते प्रापकं चेति। स्वविषयोपदर्शकत्वव्यतिरेकेण नान्यत्प्रापकत्वम्। तच्च शक्तिरूपम्। उक्तं च "प्रापणशक्तिः प्रामाण्यं तदेव च प्रापकत्वम्" इति॥

स्वविषयोपदर्शके च प्रत्यक्षानुमाने एव, न ज्ञानान्तरम्। अतस्ते एव लक्षणार्हे, तयोश्च द्वयोरप्यविसंवादकत्वमस्ति लक्षणम्। प्रत्यक्षेण ह्यर्थक्रियासाधकं वस्तु दृष्टतयावगतं सत्प्रदर्शितं भवति, अनुमानेन तु दृष्टलिङ्गाव्यभिचारितयाध्यवसितं सत्प्रदर्शितं भवतीत्यनयोः स्वविषयप्रदर्शकत्वमेव प्रापकत्वम्। यद्यपि च प्रत्यक्षस्य क्षणो ग्राह्यः स च निवृत्तत्वान्न प्राप्यते, तथापि तत्संतानो ऽध्यवसेयः। प्रवृत्तौ प्राप्यत इति, संतानविषयं प्रदर्शितार्थप्रापकत्वमध्यक्षस्य प्रामाण्यम्। अनुमानस्य तु लिङ्गदर्शने विकल्प्यः स्वाकारो ग्राह्यो न बाह्यो ऽर्थः। प्राप्यस्तु बाह्यः। स्वाकाराभेदेनाध्यवसित इति। तद्विषयमस्यापि प्रदर्शितार्थप्रापकत्वं प्रामाण्यम्। तदुक्तम् "न ह्याभासमर्थं परिच्छिद्य प्रवर्तमानो ऽर्थक्रियायां विसंवाद्यते" इति। प्राप्यमाणं च वस्तु नियतदेशकालाकारं प्राप्यत इति तथाभूतवस्तुप्रदर्शकयोः प्रत्यक्षानुमानयोरेव प्रामाण्यं, न ज्ञानान्तरस्य। तेन पीतशङ्खादिग्राहिज्ञानानामपि प्रापकत्वात्प्रामाण्यप्रसक्तिर्न भवति, तेषां प्रदर्शितार्थाप्रापकत्वात्। यद्देशकालाकारं हि वस्तु तैः प्रदर्शितं, न तत्तथा प्राप्यते। यच्च यथा प्राप्यते, न तैस्तत्तथा प्रदर्शितं, देशादिभेदेन वस्तुभेदस्य निश्चितत्वादिति न तेषां प्रदर्शितार्थप्रापकता। ततो न प्रामाण्यमपि॥ नापि प्रमाणद्वयव्यतिरिक्तं शब्दादिकं प्रदर्शितार्थाप्रापकत्वेन प्रमाणं, तत्प्रदर्शितस्य देशाद्यनियतस्यार्थस्यासत्त्वेन प्राप्तुमशक्तेः। तत्प्रदर्शितार्थस्यानियतत्वं च

साचात्पारंपर्येण वा प्रतिपाद्यादेरर्थानुपपत्तेः। ततः स्थितं प्रदर्शितार्थप्रापणशक्तिस्वभावमविसंवादकत्वं प्रामाण्यं द्वयोरेव, प्रापणशक्तिश्च प्रमाणस्यार्थाविनाभावनिमित्तदर्शनपृष्ठभाविना विकल्पेन निश्चीयते। तथाहि। प्रत्यक्षं दर्शनापरनामकं यतो ऽर्थादुत्पन्नं तद्दर्शकमात्मानं स्वानुरूपावसायोत्पादनाच्चिन्वदर्थाविनाभावित्वं प्रापणशक्तिनिमित्तं प्रामाण्यं स्वतो निश्चिनोतीत्युच्यते, न पुनर्ज्ञानान्तरं तन्निश्चायकमपेक्षते ऽर्थानुभूताविव। ततो ऽविसंवादकत्वमेव प्रमाणलक्षणं युक्तम्। अथ प्रमाणस्य विशेषलक्षणं विवक्षुः प्रथमं प्रमाणसंख्यां नियमयन्नाह।

प्रमाणे द्वे च विज्ञेये तथा सौगतदर्शने।
प्रत्यक्षमनुमानं च सम्यग्ज्ञानं द्विधा यतः॥ ९॥

तथाशब्दः प्रगुक्ततत्त्वापेक्षया समुच्चये, चशब्दो ऽवधारणे। ततो ऽयमर्थः। सौगतदर्शने द्वे एव प्रमाणे विज्ञेये, न पुनरेकं त्रीणि चत्वारि पञ्च षड्वा प्रमाणानि। एतेन चार्वाकसांख्यादिपरिकल्पितं प्रमाणसंख्यान्तरं बौद्धा न मन्यन्त इत्यावेदितं भवति। ते द्वे के प्रमाणे इत्याह। प्रत्यक्षमनुमानं च। कुतो द्वे एव प्रमाणे इत्याह। सम्यग् अविपरीतं विसंवादरहितमिति यावत् ज्ञानं यतो हेतोर्द्विधा। सर्वं वाक्यं सावधारणमिति न्यायाद्द्विधैव न त्वेकधा त्रिधा वेति। अत्र केचिदाहुः। यथाच द्विधेत्युक्ते हि द्विधैव न त्वेकधा त्रिधा वेत्येवमन्ययोगव्यवच्छेदः। तथा चैत्रो धनुर्धर इत्यादिष्वपि चैत्रस्य धनुर्धर-

त्वमेव स्यान्न तु शौर्यौदार्यधैर्यादयः। तदयुक्तं यतः सर्वं वाक्यं सावधारणमिति न्याये ऽप्यागृङ्कितस्यैव व्यवच्छेदः। परार्थं हि वाक्यमभिधीयते। यदेव च परेण व्यामोहादागृङ्कितं तस्यैव व्यवच्छेदः। चैत्रो धनुर्धर इत्यादौ च चैत्रस्य धनुर्धरत्वायोग एव परैरागृङ्कित इति तस्यैव व्यवच्छेदो नान्यधर्मस्य। इह चार्वाकसांख्यादय एकैकधर्ममनेकधा च सम्यग्ज्ञानमाहुः, अतो नियतद्वैविध्यप्रदर्शनेन एकत्वबहुत्वे सम्यग्ज्ञानस्य प्रतिक्षिपति। एवं चायमेवकारो विशेषणेन विशेष्येण क्रियया च सह भाव्यमाणः क्रमेणायोगान्ययोगात्यन्तायोगव्यवच्छेदकारित्वात्त्रिधा भवति। यद्विनश्यः।

अयोगं योगमपरैरत्यन्तायोगमेव च।
व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेचकः ॥१॥

निपात एवकारः, व्यतिरेचको निवर्तकः।

विशेषणविशेष्याभ्यां क्रियया यः सहोदितः।
विवक्षातो ऽप्रयोगे ऽपि तस्यार्थो ऽयं प्रतीयते ॥२॥

व्यवच्छेदफलं वाक्यं यतश्चैत्रो धनुर्धरः।
पार्थो धनुर्धरो नीलं सरोजमिति वा यथा ॥३॥

सम्यग्ज्ञानस्य च द्वैविध्यं प्रत्यक्षपरोक्षविषयद्वैविध्यादवसेयम्। यतो ऽत्र प्रत्यक्षविषयादन्यः सर्वो ऽपि परोक्षो विषयः। ततो विषयद्वैविध्यात्तद्ग्रहके सम्यग्ज्ञाने ऽपि द्वे एव भवतो न न्यूनाधिके। तत्र यत्परोक्षार्थविषयं सम्यग्ज्ञानं, तत्स्वसाध्येन धर्मिणा च संबद्धादन्यतः सकाशात्सामान्येना-

कारेण परोक्षार्थस्य प्रतिपत्तिरूपं, ततस्तदनुमाने ऽन्तर्भूतमिति। प्रत्यक्षानुमानलक्षणे द्वे एव प्रमाणे। तथाहि। न परोक्षो ऽर्थः साक्षात्प्रमाणेन प्रतीयते, तस्यापरोक्षत्वप्रसक्तेः। विकल्पमात्रस्य च स्वतन्त्रस्य राज्यादिविकल्पवदप्रमाणत्वात्, परोक्षार्थप्रतिबद्धस्यावश्यतया तदव्यभिचाराभावात्। न च स्वसाध्येन विनाभूतो ऽर्थः परोक्षार्थस्य गमको, ऽतिप्रसक्तेः। धर्मिणा चासंबद्धस्यापि गमकत्वे प्रत्यासत्तिविप्रकर्षाभावात् स सर्वत्र प्रतिपत्तिहेतुर्भवेत्। ततो यदेवंविधार्थप्रतिपत्तिनिबन्धनं प्रमाणं तदनुमानमेव, तस्यैवंलक्षणत्वात्। तथा च प्रयोगः। यत्प्रत्यक्षं प्रमाणं तदनुमानान्तर्भूतं, यथा लिङ्गबलभावि। अप्रत्यक्षप्रमाणं च शाब्दादिकं प्रमाणान्तरत्वेनाभ्युपगम्यमानमिति स्वभावहेतुः। यच्च यत्रान्तर्भूतं तस्य न ततो बहिर्भावः, यथा प्रसिद्धान्तर्भवस्य क्वचित्कस्यापि। अन्तर्भूतं चेदम्। प्रत्यक्षादन्यत्प्रमाणमनुमानमिति स्वभावविरुद्धोपलब्धिः, अन्तर्भावबहिर्भावयोः परस्परपरिहारस्थितलक्षणतया विरोधात्। आह परः। भवतु परोक्षविषयस्य प्रमाणस्यानुमाने ऽन्तर्भावः। अर्थान्तरविषयस्य च शाब्दादेस्तस्यान्तर्भावो न युक्त इति चेत्, प्रत्यक्षपरोक्षाभ्यामन्यस्य प्रमेयस्यार्थस्याभावात्, प्रमेयरहितस्य च प्रमाणस्य प्रामाण्यासंभवात्। प्रमीयते ऽनेनार्थ इति प्रमाणमिति व्युत्पत्त्या, सप्रमेयस्यैव तस्य प्रमाणत्वव्यवस्थितेः। तथाहि। यदविद्यमानप्रमेयं न तत्प्रमाणं, यथा केशोण्डुकादिज्ञानम्। अविद्यमानप्रमेयं च

प्रमाणद्वयातिरिक्तविषयतयाभ्युपगम्यमानं प्रमाणान्तरमिति कारणानुपलब्धिः, प्रमेयस्य साक्षात्पारंपर्येण वा प्रमाणं प्रति कारणत्वात्। तदुक्तम्। "नाननुकृतान्वयव्यतिरेकं कारणं नाकारणं विषयः" इति। प्रत्यक्षपरोक्षातिरिक्तं प्रमेयान्तरं नास्तीति चाध्यक्षेणैव प्रतिपाद्यते। अध्यक्षं हि पुरःस्थितार्थसामर्थ्यादुपजायमानं तदात्मनियतप्रतिभासावभासादेव तस्यार्थस्य प्रत्यक्षव्यवहारकारणं भवति। तदन्यार्थात्मनां च तस्य व्यवच्छिन्दानमन्यत्परोक्षमर्थजातं सकलं राश्यन्तरत्वेन व्यवस्थापयत्तृतीयप्रकाराभावं च साधयति, अध्यक्षेणाप्रतीयमानस्य सकलस्यार्थजातस्यान्यत्वेन परोक्षतया व्यवस्थापनात्। अन्यथा तस्य तदन्यार्थरूपताव्यवच्छेदे स्वीयरूपतयापि परिच्छेदो न भवेदिति न किंचित्प्रत्यक्षेणावगतं भवेत्। प्रतिनियतस्वरूपता हि भावानां प्रमाणतो व्यवस्थिता। अन्यथा सर्वस्य सर्वथोपलम्भादिप्रसङ्गतः प्रतिनियतव्यवहारोच्छेदप्रसक्तिर्भवेत्। प्रतिनियतस्वरूपता चेन्न प्रत्यक्षावगता किमन्यद्रूपं तेन तस्यावगतमिति पदार्थस्वरूपावभासिनाध्यक्षेण प्रमेयान्तराभावः प्रतिपादित एव। अनुमानतोऽपि तदभावः प्रतीयत एव, अन्योन्यव्यवच्छेदरूपाणामितरप्रकारव्यवच्छेदेन तदितरप्रकारव्यवस्थापनात्। प्रयोगश्चात्र। यत्र यत्प्रकारव्यवच्छेदेन तदितरप्रकारव्यवस्था, न तत्र प्रकारान्तरसंभवः। तद्यथा पीतादौ नीलप्रकारव्यवच्छेदेनानीलप्रकारव्यवस्थायाम्। अस्ति च प्रत्यक्षपरोक्षयोरन्यतरप्रकारव्यवच्छेदेनेतरप्रकारव्यवस्था व्यवच्छिद्य-

मानप्रकाराविषयीक्रियते सर्वस्मिन्प्रमेय इति विरुद्धोपलब्धिः, तदतत्प्रकारयोः परस्परपरिहारस्थितिलक्षणत्वात् । अतः प्रमेयान्तराभावान्न प्रमाणान्तरभावः । उक्तं च ।

न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य संभवः ।
तस्मात्प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते ॥१॥ इति ॥

अत्र शाब्दोपमानार्थापत्त्यभावादिप्रमाणान्तराणां निराकरणं प्रत्यक्षानुमानयोरन्तर्भावनं वा यथा भवति तथा प्रमाणसमुच्चयादिबौद्धग्रन्थेभ्यः संमत्यादिग्रन्थेभ्यो वावगन्तव्यम् । ग्रन्थगौरवभयात्तु नोच्यते । ततः स्थितमेतत्, प्रत्यक्षानुमाने द्वे एव प्रमाणे इति ।

अथ प्रत्यक्षलक्षणमाह

प्रत्यक्षं कल्पनापोढमभ्रान्तं तत्र बुध्यताम् ।
चिरूपाल्लिङ्गतो लिङ्गिज्ञानं त्वनुमानसंज्ञितम् ॥१०॥

तत्र तयोः प्रत्यक्षानुमानयोर्मध्ये प्रत्यक्षं बुध्यतां ज्ञायताम् । तत्र प्रतिगतमक्षमिन्द्रियं प्रत्यक्षम् । कीदृशम् । कल्पनापोढम् । शब्दसंसर्गवती प्रतीतिः कल्पना । कल्पना अपोढा अपेता यस्मात्तत्कल्पनापोढम् । ननु बहुव्रीहौ निष्ठान्तं पूर्वं निपतति । ततो ऽपोढकल्पनमिति स्यात् । न वाहिताग्न्यादिष्विति वा वचनात्, आहिताग्न्यादेश्चाकृतिगणत्वान्न पूर्वनिपातः । कल्पनया वापोढं रहितं कल्पनापोढम् । नामजात्यादिकल्पनारहितमित्यर्थः । तत्र नामकल्पना यथा डित्थ इति । जाति-

कल्पना यथा गौरिति । आदिशब्दाद्गुणक्रियाद्रव्यपरिग्रहः । तत्र गुणकल्पना यथा शुक्ल इति । क्रियाकल्पना यथा पाचक इति । द्रव्यकल्पना यथा दण्डी भूस्थो वेति । आभिः कल्पनाभी रहितं शब्दरहितस्वलक्षणजन्मत्वात्प्रत्यक्षस्य । उक्तं च । न ह्यर्थे शब्दाः सन्ति तदात्मानो वा, येन तस्मिन् प्रतिभासमाने प्रतिभासेरन्नित्यादि । एतेन स्थिरस्थूलघटपटादिबाह्यवस्तुग्राहिणः सविकल्पकज्ञानस्य प्रत्यक्षतां निरस्यति । पुनः कीदृशं प्रत्यक्षम् । अभ्रान्तम् । अतस्मिंस्तद्ग्रहो भ्रान्तिरिति वचनात् । नासद्भूतवस्तुग्राहकं, किं तु यथावत्परस्परविविक्तक्षणक्षयिपरमाणुलक्षणस्वलक्षणपरिच्छेदकम् । अनेन निर्विकल्पकानां भ्रान्ततैमिरिकादिज्ञानानां प्रत्यक्षतां प्रतिक्षिपति ॥ इदं च चतुर्धा । इन्द्रियज्ञानं, मानसं, स्वसंवेदनं, योगिज्ञानं च ॥ तत्र चक्षुरादीन्द्रियपञ्चकाश्रयेणोत्पन्नं बाह्यरूपादिपञ्चविषयालम्बनं ज्ञानमिन्द्रियप्रत्यक्षम् ॥ स्वविषयानन्तरं विषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययसंज्ञकेन जनितं मनोविज्ञानं मानसम् । स्वविषयस्य घटादेरिन्द्रियज्ञानविषयस्यानन्तरो विषयो द्वितीयः क्षणः, तेन सहकारिणा सह मिलित्वा इन्द्रियज्ञानेनोपादानेन समनन्तरप्रत्ययसंज्ञकेन यज्जनितं मनोविज्ञानं तन्मानसम् । समनन्तरप्रत्ययविशेषणेन योगिज्ञानस्य मानसत्वप्रसङ्गो निरस्तः । समनन्तरप्रत्ययशब्दः स्वसंतानवर्तिन्युपादाने ज्ञाने रूढ्या प्रसिद्धः । ततो भिन्नसंतानवर्तियोगिज्ञानमपेक्ष्य पृथग्जनचित्तानां समनन्तरत्वप-

देशो नास्ति ॥ सर्वचित्तचैतानामात्मसंवेदनं स्वसंवेदनम् । चित्तं वस्तुमात्रग्राहकं ज्ञानम् । चित्ते भवास्त्वेता वस्तुविशेषरूपग्राहकाः सुखदुःखोपेक्षालक्षणाः । तेषामात्मा येन वेद्यते तत्स्वसंवेदनमिति ॥ भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानम् । भूतार्थः प्रमाणोपपन्नार्थः । भावना पुनः पुनस्त्वेतस्मिन् समारोपः । भूतार्थभावनाप्रकर्षपर्यन्ताज्जातं योगिज्ञानम् ॥

ननु यदि क्षणक्षयिणः परमाणव एव तात्त्विकास्तर्हि किंनिमित्तोऽयं घटपटप्रकटस्थकुटादिस्थूलार्थप्रतिभास इति चेत् । निरालम्बन एवायमनादिवितथवासनाप्रवर्तितस्थूलार्थावभासो निर्विषयत्वादाकाशकेशवत्स्वप्नज्ञानवदेति । यदुक्तम् ।

बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते ।
वासनाक्लुठितं चित्तमर्थाभासे प्रवर्तते ॥१॥ इति ॥
नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते ॥२॥ इति च ॥

ननु प्रत्यक्षेण क्षणक्षयिपरमाणुस्वरूपं स्वलक्षणं कथं संवेद्यत इति चेत् । उच्यते । प्रत्यक्षं हि वर्तमानमेव सन्निहितं वस्तुनो रूपं प्रत्येति, न पुनर्भाविभूतं, तदसन्निहितत्वात्तस्य । तर्हि प्रत्यक्षानन्तरं नीलरूपतानिर्णयवत्क्षणक्षयनिर्णयः कुतो नोत्पद्यत इति चेत् । उच्यते । तदैव स्मृतिः पूर्वदेशकालदशासंबन्धितां वस्तुनोऽध्यवस्यन्ती क्षणक्षयनिर्णयमुत्पद्यमानं निवारयति । अत एव सौगतैरिदमभिधीयते । दर्शनेन क्षणिकाक्षणिकत्वसाधारणस्यार्थस्य विषयीकरणात्, कुतश्चिद्भ्रमनिमित्तादक्षणिकत्वारोपे

ऽपि न दर्शनमक्षणिकत्वे प्रमाणं, किं तु प्रत्युताप्रमाणं, विपरीताध्यवसायाक्रान्तत्वात्। क्षणिकत्वे ऽपि न तत्प्रमाणं, अनुरूपाध्यवसायाजननात्। नीलरूपे तु तथाविधनिश्चयकरणात्प्रमाणमिति। ततो युक्तमुक्तं निर्विकल्पकमभ्रान्तं च प्रत्यक्षमिति। अत्र "अभ्रान्तं" इति विशेषणग्रहणादनुमाने च तद्ग्रहणादनुमानं भ्रान्तमित्यावेद्यति। तथाहि। भ्रान्तमनुमानं, सामान्यप्रतिभासित्वात्, सामान्यस्य च बहिः स्वलक्षणे व्यतिरेकाव्यतिरेकविकल्पाभ्यामपाक्रियमाणतयायोगात्, सामान्यस्य स्वलक्षणरूपतयानुमाने विकल्पनात्। अतस्मिन्न स्वलक्षणे तद्ग्रहस्य स्वलक्षणतया परिच्छेदस्य भ्रान्तिलक्षणत्वात्। प्रामाण्यं पुनः प्रणालिकया बहिः स्वलक्षणबलायातत्वादनुमानस्य। तथाहि। नार्थं विना तादात्म्यतदुत्पत्तिरूपसंबन्धप्रतिबद्धलिङ्गसद्भावो, न तद्विना तद्विषयं ज्ञानं, न तज्ज्ञानमन्तरेण प्रागवधारितसंबन्धस्मरणं, तदस्मरणे नानुमानमित्यर्थाव्यभिचारित्वाद्भ्रान्तमपि प्रमाणमिति संगीर्यते।। तदुक्तम्।

अतस्मिंस्तद्ग्रहो भ्रान्तिरपि संधानतः प्रमा। इति॥

अमुमेवार्थं दृष्टान्तपूर्वकं निश्चये धर्मकीर्तिरकीर्तयत्। यथा।

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।
मिथ्याज्ञानाविशेषे ऽपि विशेषो ऽर्थक्रियां प्रति॥१॥
यथा तथा यथार्थत्वेऽप्यनुमानं तदा तयोः।
अर्थक्रियानुरोधेन प्रमाणत्वं व्यवस्थितम्॥२॥ इति॥

तथानुमानलक्षणमाह। "त्रिरूपाल्लिङ्गतो लिङ्गिज्ञानं त्वनु

मानसंज्ञितं" इत्यादि। त्रीणि रूपाणि पक्षधर्मत्वादीनि यस्य, तत्त्रिरूपं, त्रिस्वभावमित्यर्थः। तस्मात्त्रिरूपाल्लिङ्गाद्धेतोः सम्यगवगताल्लिङ्गिनः परोक्षस्य वस्तुनो यज्ज्ञानं, तदनुमानसंज्ञितं प्रमाणम्। अनु पश्चाल्लिङ्गग्रहणादनन्तरं परोक्षस्य वस्तुनो मानं ज्ञानमनुमानमिति ह्यनुमानशब्दस्यार्थः॥ अत्र श्लोके चरमपादस्य नवाक्षरत्वे ऽप्यार्षत्वान्न दोषः॥ इदमत्र तत्त्वम्। यथा जने क्षत्रादिलिङ्गैर्दृष्टैर्लिङ्गी राजा निश्चीयते, तथा त्रिरूपेण लिङ्गेन धूमादिना क्वचिदुपलब्धेन परोक्षः पदार्थो लिङ्गी वह्न्यादिरत्र यदिज्ञायते। इदं च लिङ्गात्लिङ्गिज्ञानमनुमानमभिधीयते॥ तच्च द्वेधा, स्वार्थं परार्थं च। यदा च त्रिरूपाल्लिङ्गात् स्वयं लिङ्गिनं साध्यं प्रतिपद्यते, तदा स्वार्थमनुमानम्। यदा तु परं प्रति साध्यस्य प्रतिपत्तये त्रिरूपहेत्वभिधानं, तदा परार्थमनुमानमिति। "लिङ्गिज्ञानं तु" इति। अत्र तुशब्दो विशेषणार्थं इदं विशिनष्टि। अत्र यत्त्रिरूपं लिङ्गं लिङ्गिनो गमकमुक्तं, तल्लिङ्गमनुपलब्धिस्वभावकार्यभेदात्त्रिधैव भवतीति॥ तत्रानुपलब्धिश्चतुर्धा वर्ण्यते मूलभेदापेक्षया। तद्यथा। विरुद्धोपलब्धिः, विरुद्धकार्योपलब्धिः, कारणानुपलब्धिः, स्वभावानुपलब्धिश्च। विरुद्धोपलब्धिर्यथा नात्र शीतस्पर्शो ऽग्नेः। विरुद्धकार्योपलब्धिर्यथा नात्र शीतस्पर्शो धूमात्। कारणानुपलब्धिर्यथा नात्र धूमो ऽग्न्यभावात्। स्वभावानुपलब्धिर्यथा नात्र धूम उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः। शेषास्तु सप्ताप्यनुपलब्धयो धर्मबिन्दुप्रभृतिशास्त्रप्रतिपादिता

एष्वेव चतुर्षु भेदेष्वन्तर्भवन्तीति प्रतिभेदरूपत्वाच्च पृथगभिहिताः ॥

स्वभावहेतुर्यथा वृक्षोऽयं शिंशपात्वात् । कार्यहेतुर्यथा अग्निरत्र धूमात् । एषु चानुपलब्ध्यादिषु त्रिषु हेतुषु तादात्म्यतदुत्पत्तिसंबन्धबलादविनाभावो विद्यते, आद्यान्त्ययोरनुपलब्ध्योः स्वभावहेतोश्च तादात्म्यभावात्, मध्ययोरनुपलब्ध्योः कार्यहेतोश्च तदुत्पत्तिसङ्गावात् । अविनाभावश्च तादात्म्यतदुत्पत्तिभ्यामेव व्याप्तः । तादात्म्यतदुत्पत्ती चानुपलब्धिस्वभावकार्येष्वेव विद्येते, नान्यत्र । ततस्तादात्म्यतदुत्पत्तिप्रतिबन्धविकलानामनुपलब्धिस्वभावकार्यव्यतिरिक्तानामर्थानां सर्वेषां हेत्वाभासतैव प्रत्येतव्या । तेन संयोग्यादिका वैशेषिकादिकल्पिता हेतवो न भवन्ति, व्यभिचारस्य संभवात् । कारणात्कार्यानुमानं तु व्यभिचारित्वेनैव नाभ्युपगम्यते । यदपि रसतः समानसमयस्य रूपादेरनुमानं सौगतैरभ्युपगतं, यदपि समग्रेण हेतुना कार्योत्पादानुमानं च, ते अपि स्वभावानुमानतयाभ्युपेते । तथाहि । ईदृग्रूपान्तरोत्पादसमर्थः प्राक्तनो रूपक्षणः, ईदृग्रसजनकत्वात्, पूर्वोपलब्धरूपवदिति रूपान्तरोत्पादरूपसामर्थ्यानुमानम् । योग्येयं प्रतिबन्धविकला बीजादिसामग्री स्वकार्योत्पादने समग्रत्वात्, पूर्वदृष्टबीजादिसामग्रीवदिति योग्यतानुमानम् । अतः स्वभावहेतुप्रभावे एवैते, न पुनः कारणात्कार्यानुमान इति ॥

अथानुपलब्ध्यादिभेदेन त्रिविधस्यापि लिङ्गस्य यानि त्रीणि रूपाणि भवन्ति, तान्येवाह

रूपाणि पक्षधर्मत्वं सपक्षे विद्यमानता।
विपक्षे नास्तिता हेतोरेवं चीणि विभाव्यताम् ॥ ११ ॥

साध्यधर्मविशिष्टो धर्मी पक्षः, तस्य धर्मः पक्षधर्मः, तद्भावः पक्षधर्मत्वम्। पक्षशब्देन चात्र केवलो धर्म्येवाभिधीयते, अवयवे समुदायोपचारात्। यदि पुनर्मुख्य एव साध्यधर्मविशिष्टो धर्मी पक्षो गृह्येत, तदानुमानं व्यर्थमेव स्यात्, साध्यस्यापि धर्मिवत्सिद्धत्वात्। ततश्च पक्षधर्मत्वं पक्षे धर्मिणि हेतोः सद्भावः। स च प्रत्यक्षतो ऽनुमानतो वा प्रतीयते। तत्र प्रत्यक्षतः कस्मिंश्चित्प्रदेशे धूमस्य दर्शनम्। अनुमानतश्च शब्दे कृतकत्वस्य निश्चयः। इदमेकं रूपम्॥ तथा समानः पक्षः सपक्षः, तस्मिन्सपक्षे दृष्टान्ते विद्यमानता हेतोरस्तित्वं सामान्येन भाव इत्यर्थः। इदं द्वितीयं रूपं, अस्य च "अन्वयः" इति द्वितीयमभिधानम्॥ तथा विरुद्धः पक्षो विपक्षः साध्यसाधनरहितः, तस्मिन्विपक्षे नास्तिता हेतोरेकान्तेनासत्त्वम्। इदं तृतीयं रूपम्, अस्य च "व्यतिरेक" इति द्वितीयमभिधानम्॥ एतानि पक्षधर्मत्वसपक्षसत्त्वविपक्षासत्त्वलक्षणानि हेतोर्लिङ्गस्य चीणि रूपाणि॥ एवंशब्दस्य इतिशब्दार्थत्वादिति विभाव्यतां हृदयेन सम्यगवगम्यताम्॥ तत्र हेतोर्यदि पक्षधर्मत्वं रूपं न स्यात्, तदा महानसादौ दृष्टो धूमो ऽन्यत्र पर्वतादौ वह्निं गमयेत्। न चैवं गमयति। ततः पक्षधर्मत्वं रूपम्॥ तथा यदि सपक्षसत्त्वं रूपं न स्यात्, तदा साध्यसाधनयोरगृहीतप्रतिबन्धस्यापि

पुंसो धूमो दृष्टमात्रो धनंजयं ज्ञापयेत्। न चैवं ज्ञापयति। अतः सपक्षसत्त्वं रूपम्॥ तथा यदि विपक्षासत्त्वं रूपं न स्यात्, तदा धूमः साध्यरहिते विपक्षे जलादावपि वह्निमनुमापयेत्। न चैवमनुमापयति। तेन विपक्षासत्त्वं रूपम्॥ अथवा। अनित्यः शब्दः, काकस्य कार्ष्ण्यवत्। अत्र न पक्षधर्मः। अनित्यः शब्दः, श्रावणत्वात्। अत्र सपक्षविपक्षाभावादेव न सपक्षसत्त्वविपक्षासत्त्वे। अनित्यः शब्दः, प्रमेयत्वात्, पटवत्। लोहलेख्यं वज्रं, पार्थिवत्वात्, द्रुमादिवत्। सलोमा मण्डूकः, उत्प्लुत्योत्प्लुत्यगमनात्, हरिणवत्। निर्लोमा वा हरिणः, उत्प्लुत्योत्प्लुत्यगमनात्, मण्डूकवत्। एष्वनित्यत्वादिसाध्यविपर्यये ऽपि हेतूनां वर्तनान्न विपक्षासत्त्वम्॥ तत एतानि त्रीणि समुदितानि रूपाणि यस्य हेतोर्भवन्ति, स एव हेतुः स्वसाध्यस्य गमको भवति, नापरः। नन्वेवंलक्षणा हेतवः कति भवन्तीति चेत्। ननूक्तं पुरापि एतल्लक्षणा अनुपलब्धिस्वभावकार्याख्यास्त्रय एव हेतव इति। एषामुदाहरणानि प्रागेवोपदर्शितानि, तथापि पुनः स्वभावहेतूदाह्रियते। सर्वं क्षणिकमिति पक्षः। सत्त्वादिति हेतुः। अयं हेतुः सर्वस्मिन्वर्तत इति पक्षधर्मत्वम्। यत्सत्तत्क्षणिकं यथा विद्युदादीति सपक्षसत्त्वम्। यत्क्षणिकं न भवति, तत्सदपि न भवति, यथा खपुष्पम्। अत्र क्षणिकविपक्षे नित्ये क्रमयौगपद्याभ्यामर्थक्रियालक्षणस्य सत्त्वस्यानुपपत्तितो नित्यात्सत्त्वस्य व्यावृत्तिरिति विपक्षासत्त्वम्। सर्वमित्युपनयः, सत्त्वात्सर्वं क्षणिकमिति निगमनम्। एवमन्यहेतुष्वपि ज्ञेयम्।

यद्यपि व्याप्त्युपेतं पक्षधर्मतोपसंहाररूपं सौगतैरनुमानमाख्यायि, तथापि मन्दमतीन्व्युत्पादयितुं पञ्चावयवानुमानदर्शनमप्यदुष्टमिति। अयमत्र श्लोकद्वयस्य तात्पर्यार्थः। पक्षधर्मान्वयव्यतिरेकलक्षणरूपत्रयोपलक्षितानि त्रीण्येव लिङ्गानि अनुपलब्धिः, स्वभावः, कार्यं चेति॥

अत्रानुक्तोऽपि विशेषः कश्चन लिख्यते। तच्च प्रमाणादभिन्नमर्थाधिगम एव प्रमाणस्य फलम्। तर्कप्रत्यभिज्ञयोरप्रामाण्यं, परस्परविनिर्लुठितक्षणक्षयिपरमाणुलक्षणानि स्वलक्षणानि, प्रमाणगोचरस्तात्त्विकः। वासनारूपं कर्मपर्याया एव सन्ति न द्रव्यम्। वस्तुनि केवलं स्वसत्त्वमेव न पुनः परासत्त्वमिति सामान्येन बौद्धमतम्॥

अथवा वैभाषिक-सौत्रान्तिक-यौगाचार-माध्यमिक-भेदाच्चतुर्धा बौद्धा भवन्ति॥ तत्रार्यसमितीयापरनामकमतमदः। चतुःक्षणिकं वस्तु। जातिर्जनयति। स्थितिः स्थापयति। जरा जर्जरयति। विनाशो विनाशयति। तथात्मापि तथाविध एव पुद्गलस्कन्धावभिधीयते। निराकारो बोधोऽर्थसहभाव्येकसामग्यधीनस्तत्रार्थे प्रमाणमिति॥

सौत्रान्तिकमतं पुनरिदम्। रूपवेदनाविज्ञानसंज्ञासंस्काराः सर्वशरीरिणामेते पञ्च स्कन्धा विद्यन्ते, न पुनरात्मा। त एव हि परलोकगामिनः। तथा च तत्सिद्धान्तः। पञ्चेमानि भिक्षवः संज्ञामात्रं प्रतिज्ञामात्रं संवृतिमात्रं व्यवहारमात्रम्। कतमानि पञ्च। अतीतोऽध्वा, अनागतोऽध्वा, सहेतुको विनाशः, आकाशं,

पुद्गल इति । अत्र पुद्गलशब्देन परपरिकल्पितो नित्यत्वव्यापकत्वादिधर्मक आत्मेति । बाह्यो ऽर्थो नित्यमप्रत्यक्ष एव ज्ञानाकारान्यथानुपपत्त्या तु सत्त्ववगम्यते । साकारो बोधः प्रमाणम् । तथा क्षणिकाः सर्वसंस्काराः । स्वलक्षणं परमार्थः यदाऽऽत्मादिनः । प्रतिक्षणं विशरारवो रूपरसगन्धस्पर्शपरमाणवो ज्ञानं चेत्येव तत्त्वमिति । अन्यापोहः शब्दार्थः । तदुत्पत्तितदाकारताभ्यामर्थपरिच्छेदः । नैरात्म्यभावनातो ज्ञानसंतानोच्छेदो मोक्ष इति ॥

यौगाचारमतं त्विदम् । विज्ञानमात्रमिदं भुवनम् । नास्ति बाह्यो ऽर्थः, ज्ञानाद्वैतस्यैव तात्त्विकत्वात् । अनेके ज्ञानसंतानाः । साकारो बोधः प्रमाणम् । वासनापरिपाकतो नीलपीतादिप्रतिभासाः । आलयविज्ञानं हि सर्ववासनाधारभूतम् । आलयविज्ञानविशुद्धिरेवापवर्ग इति ॥

माध्यमिकदर्शने तु शून्यमिदं, स्वप्नोपमः प्रमाणप्रमेययोः प्रतिभासः । मुक्तिस्तु शून्यतादृष्टेः । तदर्थं शेषभावना इति । केचित्तु माध्यमिकाः स्वस्थं ज्ञानमाहुः । तदुक्तम् ।

अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणोच्यते
प्रत्यक्षो न हि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः ।
यौगाचारमतानुगैरभिमता साकारबुद्धिः परा
मन्यन्ते बत मध्यमाः कृतधियः स्वस्थां परां संविदम् ॥ इति ।

ज्ञानपारमिताद्या दश ग्रन्थाः । तर्कभाषा हेतुबिन्दुस्टीकार्चटतर्कनाम्नी प्रमाणवार्तिकं तत्त्वसंग्रहो न्यायबिन्दुः कमलशीलो न्यायप्रवेशकस्येत्यादयस्तद्ग्रन्था इति ॥

एवं बौद्धमतमभिधाय तदेव संक्षिप्योत्तरं चाभिसंधित्सुराह

बौद्धराद्धान्तवाच्यस्य संक्षेपोऽयं निवेदितः।
नैयायिकमतस्येतः कथ्यमानो निशम्यताम् ॥ १२ ॥

बौद्धराद्धान्तस्य सौगतसिद्धान्तस्य यद्वाच्यं तस्य संक्षेपोऽयमनन्तरोदितो निवेदितोऽभिहितः। नैयायिकमतस्य गौतमशासनस्य संक्षेपत ऊर्ध्वं कथ्यमानो निशम्यतां श्रूयताम् ॥

इति तपागणनभोंगणदिनमणिश्रीदेवसुन्दरसूरिशिष्यश्रीगुणरत्नसूरिविरचितायां तर्करहस्यदीपिकाभिधानायां षड्दर्शनसमुच्चयटीकायां बौद्धमतप्रकटनो नाम प्रथमोऽधिकारः ॥

अथ द्वितीयोऽधिकारः ।

अथादौ नैयायिकानां यौगपराभिधानानां लिङ्गादिव्यक्तिरुच्यते । ते च दण्डधराः, प्रौढकौपीनपरिधानाः, कम्बलिकाप्रावृता, जटाधारिणो, भस्मोद्धूलनपरा, यज्ञोपवीतिनो, जलाधारपात्रकराः । नीरसाहाराः प्रायो वनवासिनो द्रोर्मूले तुम्बकं बिभ्राणाः । कन्दमूलफलाग्नि आतिथ्यकर्मनिरताः सस्त्रीकाः, निस्त्रीकास्तेषूत्तमाः । ते च पञ्चाग्निसाधनपराः करे जटादौ च प्राणलिङ्गधराश्चापि भवन्ति । उत्तमां संयमावस्थां प्राप्तास्तु नग्ना भ्रमन्ति । एते प्रातर्दन्तपादादिशौचं विधाय शिवं ध्यायन्तो भस्मनाङ्गं चिह्नयन्ति स्पृशन्ति । यजमानो वन्दमानः कृताञ्जलिर्वक्ति "ओं नमः शिवाय" इति । गुरुस्तथैव "शिवाय नम" इति प्रतिवक्ति । ते च संसद्येवं वदन्ति ।

ग्रैवीं दीक्षां द्वादशाब्दीं सेवित्वा योऽपि मुञ्चति ।
दासो दासोऽपि भवति सो ऽपि निर्वाणमृच्छति ॥

तेषामीश्वरो देवः सर्वज्ञः सृष्टिसंहारादिकृत् । तस्य चाष्टाद्शावतारा अमी । नकुली १, श्रौष्यकौशिकः २, गार्ग्यः ३, मैत्री ४, अकौरुषः ५, ईशानः ६, पारगार्ग्यः ७, कपिलाण्डः ८, मनुष्यकः ९, कुशिकः १०, अत्रिः ११, पिङ्गलः १२, पुष्पकः १३, बृहदार्यः १४, अगस्तिः १५, संतानः १६, राशीकरः १७,

विद्यागुरुत्व १८। एते तेषां तीर्थगाः पूजनीयाः। एतेषां पूजाप्रणिधानविधिस्तु तदागमादवेदितव्यः। तेषां सर्वतीर्थेषु भरटा एव पूजकाः। देवानां नमस्कारो न सन्मुखैः कार्यः। तेषु ये निर्विकारास्ते स्वमीमांसागतमिदं पद्यं दर्शयन्ति।

न स्वर्धुनी न फणिनो न कपालदाम
नेन्दोः कला न गिरिजा न जटा न भस्म।
यचान्यदेव च न किंचिदुपास्महे त-
द्रूपं पुराणं मुनिभीलितमीश्वरस्य ॥१॥
स एव योगिनां सेव्यो सूर्वाचीनस्तु भोगभाक्।
स ध्यायमानो राज्यादिसुखलुब्धैर्निषेव्यते ॥२॥

उक्तं च तैः स्वयोगशास्त्रे।

वीतरागं स्मरन्योगी वीतरागत्वमश्नुते।
सरागं ध्यायतस्तस्य सरागत्वं तु निश्चितम् ॥३॥
येन येन हि भावेन युज्यते यन्त्रवाहकः।
तेन तन्मयतां याति विश्वरूपो मणिर्यथा ॥४॥ इति ॥

एतत्सर्वं लिङ्गवेषदेवादिस्वरूपं वैशेषिकमते ऽप्यवसातव्यं, यतो नैयायिकवैशेषिकाणां हि मिथः प्रमाणतत्त्वानां संख्याभेदे सत्यप्यन्योन्यं तत्त्वानामन्तर्भावने ऽप्यैक्यानेव भेदो जायते। तेनैतेषां प्रायो मततुल्यता उभये ऽप्येते तपस्विनो ऽभिधीयन्ते। ते च शैवादिभेदेन चतुर्धा भवन्ति। तदुक्तम्।

आधारभस्मकौपीनजटायज्ञोपवीतिनः।
स्वस्वाचारादिभेदेन चतुर्धा स्युस्तपस्विनः ॥१॥

शैवाः पाशुपतास्चैव महाव्रतधराश्च ये ।

तुर्याः कालमुखा मुख्या भेदा एते तपस्विनाम् ॥२॥

तेषामन्तर्भेदा भरटभक्कुरखैङ्गिकतापसादयो भवन्ति । भरटादीनां व्रतग्रहणे ब्राह्मणादिवर्णनियमो नास्ति । यस्य तु शिवे भक्तिः स व्रती भरटादिर्भवेत् । परं शास्त्रेषु नैयायिकाः सदा शिवभक्तत्वाच्छैवा इत्युच्यन्ते, वैशेषिकास्तु पाशुपता इति । तेन नैयायिकशासनं शैवमाख्यायते, वैशेषिकदर्शनं च पाशुपतमिति । इदं मया यथा श्रुतं यथा दृष्टं चाचाभिदधे । तत्तद्विशेषस्तु तद्ग्रन्थेभ्यो विज्ञेयः ॥

अथ पूर्वप्रतिज्ञातं नैयायिकमतसंक्षेपमेवाह ।

अक्षपादमते देवः सृष्टिसंहारकृच्छिवः ।
विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः ॥ १३ ॥

अक्षपादेनाद्येन गुरुणा यतः प्रणीतं नैयायिकमतस्य मूलसूत्रं, तेन नैयायिका आक्षपादा अभिधीयन्ते, तन्मतं चाक्षपादमतमिति । तस्मिन्नक्षपादमते शिवो महेश्वरः, सृष्टिस्थाचरस्य जगतो निर्माणं, संहारस्तद्विनाशः । तद्वे सृष्टिसंहारौ । तावसावचिन्त्यशक्तिमाहात्म्येन करोतीति सृष्टसंहारकृत् । केवलायाः सृष्टेः करणे निरन्तरोत्पाद्यमानोऽसंख्यः प्राणिगणो भुवनत्रये ऽपि न मायादिति सृष्टिवत्संहारस्यापि करणम् । अत्र प्रयोगमेवं शैवा व्याहरन्ति । भूभूधरसुधाकरदिनकरमकराकरादिकं बुद्धिमत्पूर्वकं, कार्यत्वात् । यद्यत्कार्यं तत्तद्बुद्धिमत्पूर्वकं, यथा घटः ।

कार्यं चेदं, तस्माद्बुद्धिमत्पूर्वकम्। यस्चास्य बुद्धिमान्स्रष्टा, स ईश्वर एवेत्यन्वयः। व्यतिरेके गगनम्। न चायमसिद्धो हेतुः, भूभूधरादीनां स्वस्वकारणकलापजन्यत्वेनावयवितया वा कार्यत्वस्य जगति सुप्रसिद्धत्वात्। नापि विरुद्धो ऽनैकान्तिको वा, विपक्षाद्व्यन्तं व्यावृत्तत्वात्। नापि कालात्ययापदिष्टः, प्रत्यक्षागमाबाध्यमानसाध्यधर्मधर्मिविषये हेतोः प्रवर्तनात्। नापि प्रकरणसमः, तत्प्रतिपन्थिपदार्थस्वरूपसमर्थनप्रथितप्रत्यनुमानोदयाभावात्॥ अथ निर्हेतात्मवदशरीरत्वादेव न संभवति सृष्टिसंहारकर्तेश्वर इति प्रत्यनुमानोदयात्कार्यं न प्रकरणसम इति चेत्। उच्यते। अत्र त्वदीयानुमाने साध्यमान ईश्वरो धर्मी त्वया प्रतीतो ऽप्रतीतो वाभिप्रेयते। अप्रतीतश्चेत्, तदा त्वत्परिकल्पितहेतोराश्रयासिद्धिदोषः प्रसज्येत। प्रतीतश्चेत्, तर्हि येन प्रमाणेन प्रतीतस्तेनैव स्वयमुद्भावितनिजतनुरपि किमिति नाभ्युपेयत इति कथमशरीरत्वम्। ततो न प्रकरणसमदोषता हेतोः, अतः साधूक्तं "सृष्टिसंहारकृच्छिव" इति। तथा विभुराकाशवत्सर्वजगद्व्यापकः। नियतैकस्थानवर्तित्वे ह्यनियतप्रदेशवर्तिनां पदार्थानां प्रतिनियतयथावच्चिर्माणानुपपत्तेः। न ह्येकस्थानस्थितः कुम्भकारो ऽपि दूरतरघटादिघटनायां व्याप्रियते। तस्माद्विभुः॥ तथा नित्यैकसर्वज्ञः। नित्यश्चासावेकश्च नित्यैकः स चासौ सर्वज्ञश्चेति विग्रहेणचयसमासः। तच नित्यो ऽप्रच्युतानुत्पन्नस्थिरैकरूपः कूटस्थः। ईश्वरस्य ह्यनित्यत्वे पराधीनोत्पत्तिसव्यपेक्षया कृतकत्वप्राप्तिः। स्वोत्पत्तावपेक्षितपर-

व्यापारो हि भावः कृतक दृश्यते । कृतकस्येज्जगत्कर्ता स्यात्, तदा तस्याप्यपरेण कर्त्रा भाव्यमनित्यत्वादेव । अपरस्यापि च कर्तुरन्येन कर्त्रा भवनीयमित्यनवस्थानदी दुस्तरा स्यात् । तस्मान्नित्य एवाभ्युपगमनीयः ॥ नित्यो ऽपि स एको ऽद्वितीयो मन्तव्यो, बहूनां हि जगत्कर्तृत्वस्वीकारे परस्परं पृथक्पृथगन्यान्यविसदृशमतिव्याप्तृतत्वेनैकैकपदार्थस्य विसदृशनिर्माणे सर्वमसमञ्जसमापद्येतेति युक्तं "एक" इति विशेषणम् ॥ एको ऽपि सर्वज्ञः सर्वपदार्थानां सामस्त्येन ज्ञाता, सर्वज्ञत्वाभावे हि विधित्सितपदार्थोपयोगिजगत्प्रसृमरविप्रकीर्णपरमाणुकणप्रचयसम्यक्त्वामयीमीलनाक्षमतया याथातथ्येन पदार्थानां निर्माणं दुर्घटं भवेत् । सर्वज्ञत्वे पुनः सकलप्राणिनां संमीलितसमुचितकारणकलापानुरूप्येण कार्यं वस्तु निर्मिमाणः स्वार्जितपुण्यपापानुमानेन च स्वर्गनरकयोः सुखदुःखोपभोगं ददानः सर्वथौचितीं नातिवर्तते । तथा चोक्तं तद्भक्तैः

ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ॥१॥
अज्ञो जन्तुरनीशो ऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥२॥

अथवा नित्यैकसर्वज्ञ इत्येकमेव विशेषणं व्याख्येयम् । नित्यं सदेको ऽद्वितीयः सर्वज्ञो नित्यैकसर्वज्ञः । एतेनादिसर्वज्ञमीश्वरमेकं विहायान्यः को ऽपि सर्वज्ञः कदापि न भवति । यत ईश्वरादन्येषां योगिनां ज्ञानान्यपरं सर्वमतीन्द्रियमर्थं जाना-

नान्यपि स्वात्मानं न जानते, ततस्ते कथं सर्वज्ञाः स्युरित्यावेदितं भवति । तथा नित्यबुद्धिसमाश्रयो नित्याया बुद्धेर्ज्ञानस्य स्थानं, क्षणिकबुद्धिमतो हि परायीनकार्यापेक्षेण मुख्यकर्तृत्वाभावादनीश्वरत्वप्रसक्तिरिति । ईदृग्विशेषणविशिष्टो नैयायिकमते शिवो देवः ॥

अथ तन्मते तत्त्वानि विवरिषुः प्रथमं तेषां संख्यां नामानि च समाख्याति ।

तत्त्वानि षोडशामुत्र प्रमाणादीनि तद्यथा ।
प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ॥ १४ ॥
दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवास्तर्कनिर्णयौ ।
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च ॥१५॥
जातयो निग्रहस्थानान्येषामेवं प्ररूपणा ।
अर्थोपलब्धिहेतुः स्यात्प्रमाणं तच्चतुर्विधम् ॥ १६ ॥

त्रिभिर्विशेषकम् ॥ व्याख्या ॥ अमुत्रास्मिन्प्रक्रान्ते नैयायिकमते प्रमाणादीनि प्रमाणप्रमेयप्रभृतीनि षोडश तत्त्वानि भवन्ति । तद्यथेत्युपदर्शने । "प्रमाणं च" इत्यादि । तत्र प्रमितिरुपलब्धिर्ज्ञानं येन जन्यते, तज्ज्ञानस्य जनकं कारणं प्रमाणम् । प्रमीयते ज्ञानं जन्यतेऽनेनेति प्रमाणमिति व्युत्पत्तेः । ज्ञानस्य च जनकं द्विविधम् । अचेतनं ज्ञानं च । तत्राचेतनमिन्द्रियतदर्थसन्निकर्षप्रदीपलिङ्गशब्दादिकं ज्ञानस्य कारणत्वात्प्रमाणं, ज्ञानान्तरजन्मनि यद्व्याप्रियते तदपि ज्ञानजनकत्वात्प्रमाणम् ।

ज्ञानस्याजनकं तु प्रमाणस्य फलं भवेत्त पुनः प्रमाणम् १ । प्रमेयं प्रमाणजन्यज्ञानेन ग्राह्यं वस्तु २ । दोलायमाना प्रतीतिः संशयः । चकारास्त्रयो ऽपि प्रमाणादीनामन्योन्यापेक्षया समुच्चयार्थाः ३ । प्रयोजनमभीष्टं साधनीयं फलम् ४ । दृष्टान्तो वादिप्रतिवादिसंमतं निदर्शनम् । अपिः समुच्चये ५ । अथशब्द आनन्तर्ये । सिद्धान्तः सर्वदर्शनशास्त्रसंमतप्रभृतिः ६ । अवयवाः पक्षादयो ऽनुमानस्याङ्गानि ७ । संदेहादूर्ध्वमन्वयधर्मचिन्तनं तर्कः स्थाणुरचाधुना संभवतीति ८ । स्थाणुरेवायमित्यवधारणं निर्णयः । द्वन्द्वे तर्कनिर्णयौ ।९ । गुरुणा समं तत्त्वनिर्णयार्थं वदनं वादः । १० । परेण समं जिगीषया जल्पनं जल्पः । ११ । अपरामृष्टवस्तुतत्त्वं मौखर्यमात्रं वितण्डा । १२ । हेतुवदाभासमाना हेत्वाभासा न सम्यग्घेतव इत्यर्थः १३ । परवचनविघातार्थविकल्पोपपादनानि च्छलानि १४ । जातयो ऽसम्यग्दूषणानि १५ । यैरुक्तैर्वक्ता निगृह्यते, तानि निग्रहस्थानानि १६ । इति । एषामनन्तरोक्तानां प्रमाणादीनामेवमित्थं प्ररूपणा स्वरूपप्रदर्शना भवति ॥ तत्रादौ प्रमाणस्य स्वरूपणां चिकीर्षुः प्रथमतस्तस्य सामान्यलक्षणं संख्यां च प्राह "अर्थापलब्धिहेतुः स्यात्प्रमाणम्" । अर्थस्य ग्राह्यस्य बाह्यस्य स्तम्भकुम्भाम्भोरुहादेरान्तरस्य च ज्ञानसुखादेरुपलब्धिर्ज्ञानमर्थापलब्धिः । व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायाच्चाव्यभिचारिण्यपदेश्या व्यवसयात्मिका चार्थोपलब्धिर्ग्राह्या, न तूपलब्धिमात्रम् । तस्या यो हेतुः कारणं स प्रमाणं स्याद्भवेत् ।

अर्थोपलब्धिस्तु प्रमाणस्य फलम्। अथमत्र भावः। अव्यभिचारादिविशेषणविशिष्टार्थोपलब्धिजनिका सामग्री तदेकदेशो वा चक्षुःप्रदीपज्ञानादिर्बोधरूपो ऽबोधरूपो वा साधकतमत्वात्प्रमाणम्। तज्जनकत्वं च तस्य प्रामाण्यम्। तज्जन्यार्थोपलब्धिः फलमिति। इन्द्रियजत्वलिङ्गजत्वादिविशेषणविशेषिता सैवोपलब्धिर्यतः स्यात्, तदेव प्रत्यक्षादिप्रमाणस्य विशेषणलक्षणं वक्ष्यते। केवलमत्राव्यपदेश्यमिति विशेषणं न शाब्दे संबन्धनीयं, तस्य शब्दजन्यत्वेन व्यपदेश्यत्वात्। अथ प्रमाणस्य भेदानाह "तच्चतुर्विधम्"। तत्प्रमाणं, चतुर्विधं चतुर्भेदम्॥

अथ तच्चातुर्विध्यमेवाह।

प्रत्यक्षमनुमानं चोपमानं शाब्दिकं तथा।
तत्रेन्द्रियार्थसंपर्कोत्पन्नमव्यभिचारि च॥ १७॥
व्यवसायात्मकं ज्ञानं व्यपदेशविवर्जितम्।
प्रत्यक्षमनुमानं तु तत्पूर्वं त्रिविधं भवेत्॥ १८॥
पूर्ववच्छेषवच्चैव दृष्टं सामान्यतस्तथा।
तच्चाद्यं कारणात्कार्यानुमानमिह गीयते॥ १९॥

प्रत्यक्षमध्यक्षं, अनुमानं लैङ्गिकं, चकारः समुच्चयार्थः, उपमानमुपमितिः, तथाशब्दस्य समुच्चयार्थत्वात् शाब्दिकं च शब्दे भवं शाब्दिकमागम इत्यर्थः॥

अथ प्रत्यक्षस्य लक्षणं लक्षयति। "तत्रेन्द्रियार्थ" इत्यादि। तत्रेति तेषु प्रमाणेषु प्रथमं प्रत्यक्षमुच्यते। अत्राखेदमत्रपादप्रणीतं

सूत्रम्। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति [१, १, ४]॥

इन्द्रियं चक्षुरादिमनःपर्यन्तं, तस्यार्थः परिच्छेद्य इन्द्रियार्थ इन्द्रियविषयभूतो ऽर्थो रूपादिः, रूपाद्यस्तदर्था इति वचनात्। तेन सन्निकर्षः प्रत्यासत्तिरिन्द्रियस्य प्राप्तिः संबन्ध इति यावत्। स च षोढा। इन्द्रियेण सार्धं द्रव्यस्य संयोग एव १। रूपादिगुणानां संयुक्तसमवाय एव द्रव्ये समवेतत्वात् २। रूपत्वादिषु गुणसमवेतेषु संयुक्तसमवेतसमवाय एव ३। शब्दे समवाय एवाकाशस्य श्रोत्रत्वेन व्यवस्थितत्वात्, शब्दस्य तद्गुणत्वेन तत्र समवेतत्वात् ४। शब्दत्वे समवेतसमवाय एव शब्दे समवेत्वात् ५। समवायाभावयोर्विशेषणविशेष्यभाव एव। उक्तरूपपञ्चविधसंबन्धसंबद्धेषु वस्तुषु समवायघटादिदृश्याभावयोर्विशेषणत्वं विशेष्यत्वं भवतीत्यर्थः। तद्यथा। तन्तवः पटसमवायवन्तः तन्तुषु पटसमवाय इति। घटशून्यं भूतलमिह भूतले घटो नास्तीति ६ षोढा सन्निकर्षः॥

अथ निकर्षग्रहणमेवास्तु सं-ग्रहणं व्यर्थम्। न, सं-शब्दग्रहणस्य सन्निकर्षषट्कप्रतिपादनार्थत्वात्। एतदेव सन्निकर्षषट्कं ज्ञानोत्पादे समर्थं कारणं, न संयुक्तसंयोगादिकमिति संग्रहणाल्लभ्यते। इन्द्रियार्थसन्निकर्षादुत्पन्नं जातम्। उत्पत्तिग्रहणं कारकत्वज्ञापकार्थम्। अत्रायं भावः। इन्द्रियं हि नैकत्वादर्थेन सह संबध्यते, इन्द्रियार्थसंबन्धाच्च ज्ञानमुत्पद्यते। यदुक्तम्।

आत्मा स्पृशति मनसा मन इन्द्रियेण
स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः ।
योगोऽयमेव मनसः किमगम्यमस्ति
यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा ॥

ज्ञानसंग्रहणं सुखादिनिवृत्त्यर्थं, सुखादीनामज्ञानरूपत्वात् । सुखाद्यो ह्याह्लादादिस्वभावा ग्राह्यतयानुभूयन्ते, ज्ञानं त्वर्थावगमस्वभावं ग्राहकतयानुभूयत इति ज्ञानसुखाद्योर्भेदोऽध्यक्षसिद्ध एव । अव्यपदेश्यं नामकल्पनारहितं, नामकल्पनायां हि शाब्दं स्यात् । अव्यपदेश्यपदग्रहणाभावे हि व्यपदेशः शब्दस्तेनेन्द्रियार्थसन्निकर्षेण चोभाभ्यां यदुत्पादितं ज्ञानं तदप्यध्यक्षफलं स्यात्तन्निवृत्त्यर्थमव्यपदेश्यपदोपादानम् । इदमत्र तत्त्वम् । चक्षुर्गोशब्दयोर्व्यापारे सत्ययं गौरिति विशिष्टकाले यज्ज्ञानमुपजायमानमुपलभ्यते, तच्छब्देन्द्रियोभयजन्यत्वेऽपि प्रभूतविषयत्वेन शब्दस्य प्राधान्याच्छाब्दमिष्यते, न पुनरध्यक्षमिति । इन्द्रियजन्यस्य मरुमरीचिषूदकज्ञानस्य शुक्तिशकले कलधौतबोधादेश्च निवृत्त्यर्थमव्यभिचारिपदोपादानम् । यदतस्मिंस्तदित्युत्पद्यते तद्व्यभिचारि ज्ञानम् । तद्ववच्छब्देन तस्मिंस्तदिति ज्ञानमव्यभिचारि । व्यवसीयते ऽनेनेति व्यवसायो विशेष उच्यते । विशेषजनितं व्यवसायात्मकं, अथवा व्यवसायात्मकं निश्चयात्मकम् । एतेन संशयज्ञानमनेकपदार्थालम्बनत्वादनिश्चयात्मकत्वाच्च प्रत्यक्षफलं न भवतीति ज्ञापितम् ॥ नन्वेवमपि ज्ञानपदमनर्थकमव्यविशेषणाभ्यां ज्ञानस्य लब्धत्वात्, न ।

धर्मिप्रतिपादनार्थत्वादस्य, ज्ञानपदोपात्तो हि धर्मीन्द्रियार्थसन्निकर्षजत्वादिभिर्विशेष्यते। अन्यथा धर्म्यभावे काव्यभिचारादीन् धर्मांस्तत्पदानि प्रतिपादयेयुः। केचित्पुनरेवं व्याचक्षते। अव्यपदेश्यं-व्यवसायात्मकमिति-पदद्वयेन निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षस्य द्वैविध्यमाह, शेषाणि तु ज्ञानविशेषाणानीति। अत्र च सूत्रे फलस्वरूपसामग्रीविशेषणपक्षास्त्रयः संभवन्ति। तेषु स्वरूपविशेषणपक्षो न युक्तः। यथोक्तविशेषणं ज्ञानं प्रत्यक्षमिति हि तत्रार्थः स्यात्। तथा चाकारकस्य ज्ञानस्य प्रत्यक्षत्वप्रसक्तिः न चाकारकस्य प्रत्यक्षत्वं युक्तं, असाधकतमत्वात्साधकतमस्यैव च प्रमाणत्वात्। तुलासुवर्णादीनां प्रदीपादीनां सन्निकर्षेन्द्रियादीनां चाबोधरूपाणामप्रत्यक्षत्वप्रसङ्गश्च। दृश्यते चैषां सूत्रकृता प्रत्यक्षत्वं, तन्न स्वरूपविशेषणपक्षो युक्तः। नापि सामग्रीविशेषणपक्षः। सामग्रीविशेषणपक्षे ह्येवं सूत्रार्थः स्यात्। प्रमातृप्रमेयचक्षुरादीन्द्रियालोकादिका ज्ञानजनिका सामग्रीन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणविशिष्टज्ञानजननादुपचारेणेन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणविशिष्टा मती प्रत्यक्षमिति। एवं च सामग्र्याः सूत्रोपात्तविशेषणयोगित्वं तथाविधफलजनकत्वादुपचारेणैव भवति, न तु खत इति। न तु युक्तस्तत्पक्षोऽपि। फलविशेषणपक्षस्तु युक्तिसंगतः। अत्र पक्षे यत इत्यध्याहार्यम्। ततोऽयमर्थः। इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणं ज्ञानं यत इन्द्रियार्थसन्निकर्षादेर्भवति, स इन्द्रियार्थसन्निकर्षादिः प्रत्यक्षं प्रमाणम्। ज्ञानं तु प्रत्यक्षप्रमाणफलम्। यदा

तु ततो ऽपि ज्ञानाद्धानोपादानादिबुद्धय उत्पद्यन्ते, तदा हानादिबुद्ध्यपेक्षया ज्ञानं प्रमाणं हानादिबुद्धयस्तु फलं, यदा ज्ञानं प्रमाणं, तदा हानादिबुद्धयः फलमिति वचनात्। तथा चानुभवज्ञानवंशज्ञायाः स्मृतेस्तथा चायमित्येतज्ज्ञानमिन्द्रियार्थसन्निकर्षजत्वात्प्रत्यक्षफलम्। तत्स्मृतेस्तु प्रत्यक्षता। सुखदुःखसंबन्धस्मृतेस्त्विन्द्रियार्थसन्निकर्षसहकारित्वात्तथा चायमिति सारूप्यज्ञानजनकत्वेनाध्यक्षप्रमाणता। सारूप्यज्ञानस्य च सुखसाधनो ऽयमित्यनुमानिकफलजनकत्वेनानुमानप्रमाणता। न च सुखसाधनत्वशक्तिज्ञानमिन्द्रियार्थसन्निकर्षजं, शक्तेरसन्निहितत्वात्। आत्मनो मन इन्द्रियेण सन्निकर्षे सुखादिज्ञानं फलम्। मन इन्द्रियस्य तत्सन्निकर्षस्य च प्रत्यक्षप्रमाणता। एवमन्यत्रापि यथार्हं प्रमाणफलविभागोऽवगन्तव्य इति॥ एतदेवेन्द्रियार्थसन्निकर्षादिसूत्रं ग्रन्थकारः पद्यबन्धानुलोम्येनेत्याह। "इन्द्रियार्थसंपर्कोत्पन्नम्" इत्यादि। अत्र संपर्कः संबन्धः। अव्यभिचारि चेत्यत्र चकारो विशेषणसमुच्चयार्थः। अव्यभिचारिकमिति पाठे तु अव्यभिचार्येवाव्यभिचारिकं स्वार्थे कप्रत्ययः। व्यपदेशो नामकल्पना। अत्रापि व्याख्यायां यत इत्यध्याहार्यम्। भावार्थः सर्वो ऽपि प्राग्वदेवेति॥

अथ प्रत्यक्षतत्फलयोरभेदविवक्षया प्रत्यक्षस्य भेदा उच्यन्ते। प्रत्यक्षं द्वेधा, अयोगिप्रत्यक्षं योगिप्रत्यक्षं च॥ यदस्मदादीनामिन्द्रियार्थसन्निकर्षाज्ज्ञानमुत्पद्यते, तदयोगिप्रत्यक्षम्। तदपि द्विविधं निर्विकल्पकं सविकल्पकं च। तत्र वस्तुस्वरूपमात्रावभासकं

निर्विकल्पकं, यथा प्रथमाक्षसन्निपातजं ज्ञानम्। संज्ञासंज्ञिसम्बन्धोल्लेखेन ज्ञानोत्पत्तिनिमित्तं सविकल्पकं, यथा देवदत्तोऽयं दण्डीत्यादि॥ योगिप्रत्यक्षं तु देशकालस्वभावविप्रकृष्टार्थग्राहकम्। तद्द्विविधं, युक्तानां प्रत्यक्षं वियुक्तानां च। तत्र समाध्यैकाग्र्यवतां योगधर्मैश्वरादिसहकृतादात्मान्तःकरणसंयोगादेव बाह्यार्थसंयोगनिरपेक्षं यदशेषार्थग्रहणं, तद्युक्तानां प्रत्यक्षम्। एतच्च निर्विकल्पकमेव भवति, विकल्पतः समाध्यैकाग्र्यानुपपत्तेः। इदं चोत्कृष्टयोगिन एव विज्ञेयं, योगिमात्रस्य तदसंभवात्। असमाध्यवस्थायां योगिनामात्ममनोबाह्येन्द्रियरूपाद्याश्रयचतुष्कसंयोगाद्रूपादीनां, आत्ममनःश्रोत्रत्वसंयोगाच्छब्दस्य, आत्ममनोद्वयसंयोगात्सुखादीनां च यद्ग्रहणं, तद्वियुक्तानां प्रत्यक्षम्। तच्च निर्विकल्पकं सविकल्पकं च प्रतिपत्तव्यम्। विस्तरार्थिना तु न्यायसारटीका विलोकनीयेति॥

अथानुमानलक्षणमाह "अनुमानं तु तत्पूर्वं त्रिविधं भवेत्पूर्ववच्छेषवच्च" इत्यादि। अत्र चैवशब्दौ पूर्ववदादीनामर्थबाहुल्यसूचकौ। तथाशब्दश्चकारार्थः समुच्चये। शेषं तु सूत्रं व्याख्यास्यते, सूत्रं त्विदं "तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च" इति। एके व्याख्यान्ति। अत्रैकस्य पूर्वकशब्दस्य सामान्यश्रुत्या लुप्तनिर्देशो द्रष्टव्यः। तत्पूर्वकमित्यत्र तच्छब्देन प्रत्यक्षं प्रमाणमभिसंबध्यते। तत्पूर्वकं प्रत्यक्षफलं लिङ्गज्ञानमित्यर्थः। तत्पूर्वकपूर्वकं लिङ्गिज्ञानम्। अयमत्र भावः। प्रत्यक्षाद्धूमादिज्ञानमुत्पद्यते, धूमादिज्ञानाच्च वह्न्यादिज्ञानमिति।

इन्द्रियार्थसन्निकर्षोत्पन्नत्वजन्यत्वे च ज्ञानादिविशेषणानि प्रत्यक्षसूत्रादपि संबन्धनीयानि। एषां च व्यवच्छेद्यानि प्राग्युक्तानुसारेण स्वयं परिभाव्यानि। तथा द्वितीयलिङ्गदर्शनपूर्विकाया अविनाभावसंबन्धस्मृतेस्तत्पूर्वकपूर्वकत्वात्तज्जनकस्यानुमानत्वनिवृत्त्यर्थमर्थापत्त्युपलब्धिग्रहणं कार्यं, स्मृतेस्त्वर्थं विनापि भावात्। ततोऽयमर्थः। अर्थापत्त्युपलब्धिरूपमव्यभिचरितमव्यपदेश्यं व्यवसायात्मकं ज्ञानं तत्पूर्वकपूर्वकं यतो लिङ्गादेः समुपजायते तदनुमानमिति १। तथा ते द्वे प्रत्यक्षे लिङ्गलिङ्गिसंबन्धदर्शनं लिङ्गदर्शनं च पूर्वं यस्य तत्तत्पूर्वकमिति विग्रहविशेषाश्रयणादनुमानस्याध्यक्षफलद्वयपूर्वकत्वं ज्ञापितं द्रष्टव्यम् २। तथा तानि प्रत्यक्षादिसर्वप्रमाणानि पूर्वं यस्य तत्तत्पूर्वकमिति विग्रहविशेषाश्रयणेन सर्वप्रमाणपूर्वकत्वमप्यनुमानस्य लभ्यते। न च तेषां पूर्वमप्रकृतत्वात्कथं तच्छब्देन परामर्श इति प्रेर्यम्। यतः सामान्यादप्रकृतत्वेऽपि प्रत्यक्षसूत्रे व्यवच्छेद्यत्वेन प्रकृतत्वादिति। अस्यां व्याख्यायां नाव्याप्त्यादिदोषः कश्चनापि। ये तु पूर्वशब्दस्यैकस्य लुप्तस्य निर्देशं नाभ्युपगच्छन्ति, तेषां प्रत्यक्षफलेऽनुमानत्वप्रसक्तिः, तत्फलस्य प्रत्यक्षप्रमाणपूर्वकत्वात्। अथाकारकस्याप्रमाणत्वात्कारकत्वं लभ्यते। ततोऽयमर्थः। अव्यभिचारितात्मव्यपदेश्यव्यवसायात्मिकार्थापत्त्युपलब्धिजनकमेवाध्यक्षफलं लिङ्गज्ञानमनुमानमिति चेत्। उच्यते। एवमपि विशिष्टज्ञानमेवानुमानं प्रसज्यते। न च ज्ञानस्यैवानुमानत्वं स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छाद्यश्च मनसो लिङ्गानीति वचनात्सर्वस्य

बोधाबोधरूपस्य विशिष्टफलजनकस्यानुमानत्वादित्यव्याप्तिर्लक्षणदोषः। अतोऽर्थापत्तिरव्यभिचारादिविशेषणविशिष्टा तत्पूर्वकपूर्विका यतस्तदनुमानमित्येव व्याख्यानं युक्तिमत्। नन्वत्रापि त्रिविधग्रहणमनर्थकमिति चेत्। न। अनुमानविभागार्थत्वात्। पूर्ववदादिग्रहणं च स्वभावादिविषयप्रतिषेधेन पूर्ववदादिविषयज्ञापनार्थम्। पूर्ववदाद्येव त्रिविधविभागेन विवक्षितं, न स्वभावादिकमिति प्रथमं व्याख्यानम्॥ अपरे त्वेवं सूत्रं व्याचक्षते। तत्पूर्वकं प्रत्यक्षपूर्वकं त्रिविधमिति, त्रिभेदमनुमानम्। के पुनर्भेदा इत्याह। पूर्ववदित्यादि। पूर्वशब्देनान्वयो व्यपदिश्यते, व्यतिरेकात्प्रागवसीयमानत्वात्। पूर्वोऽन्वयः, स एवास्ति यस्य तत्पूर्ववत्केवलान्वय्यनुमानम् १। शेषो व्यतिरेकः, स एवास्ति यस्य तच्छेषवत्, केवलव्यतिरेकि च २। सामान्येनान्वयव्यतिरेकयोः साधनाङ्गयोर्यदृष्टं तत्सामान्यतोदृष्टमन्वयव्यतिरेकि चेति ३॥ अथवा त्रिविधमिति त्रिरूपम्। कानि त्रीणि रूपाणीत्याह। पूर्ववदित्यादि। पूर्वमुपादीयमानत्वात्पूर्वः पक्षः सोऽस्यास्तीति पूर्ववत्पक्षधर्मत्वम्। शेष उपयुक्तादन्यत्वात्साधर्म्यदृष्टान्तः सोऽस्यचेति शेषवत्सपक्षे सत्त्वम्। सामान्यतोदृष्टमिति विपक्षे मनागपि यत्र दृष्टं विपक्षे सर्वत्रासत्त्वं तृतीयं रूपम्। चशब्दात्प्रत्यक्षागमाविरुद्धत्वासत्प्रतिपक्षत्वरूपद्वयं च। एवं च पञ्चरूपलिङ्गालम्बनं यत्तत्पूर्वकं तदन्वयव्यतिरेक्यनुमानम्। विपक्षासत्त्वसपक्षसत्त्वयोरन्यतररूपस्यानभिसंबन्धात्तु चतूरूपलिङ्गालम्बनं केवलान्वयि केवलव्यतिरेकि चानुमानम्। तत्राप्तनित्यः शब्दः,

कार्यत्वात्, घटादिवदाकाशादिवच्चेत्यन्वयव्यतिरेकौ हेतुः। १। अदृष्टादीनि कस्यचित्प्रत्यक्षाणि प्रमेयत्वात्करतलादिवदित्यत्र कस्यचित्प्रत्यक्षत्वे साध्ये प्रत्यक्षस्यापि वस्तुनो विपक्षस्याभावादेव केवलान्वयी। २। सर्वविल्कर्त्रपूर्वकं सर्वं कार्यं, कादाचित्कत्वात्। यत्सर्वविल्कर्त्रपूर्वकं न भवति, तन्न कादाचित्कं, यथाकाशादि। अत्र सर्वस्य कार्यस्य पक्षीकृतत्वादेव सपक्षाभावात्केवलव्यतिरेकी। प्रसङ्गद्वारेण वा केवलव्यतिरेकी। यथा नेदं निरात्मकं जीवच्छरीरमप्राणादिमत्त्वप्रसङ्गाल्लोष्टवदिति प्रसङ्गः। प्रयोगस्त्वित्थम्। इदं जीवच्छरीरं सात्मकं, प्राणादिमत्त्वात्। यन्न सात्मकं तन्न प्राणादिमद्यथा लोष्टमिति प्रसङ्गपूर्वकः केवलव्यतिरेकीति ३। एवमनुमानस्य भेदान् स्वरूपं च व्याख्याय विषयस्य त्रैविध्यप्रतिपादनायैवमाहुः। अथवा तत्पूर्वकमनुमानं त्रिविधं त्रिप्रकारं। के पुनस्त्रयः प्रकारा इत्याह। पूर्ववदित्यादि। पूर्वं कारणं विद्यते यत्रानुमाने तत्पूर्ववत्, यत्र कारणेन कार्यमनुमीयते यथा विशिष्टमेघोन्नत्या भविष्यति वृष्टिरिति। अत्र कारण-शब्देन कारणधर्म उन्नतत्वादिर्ग्राह्यः। प्रयोगस्त्वेवम्। अमी मेघा वृष्ट्युत्पादकाः, गम्भीरगर्जितत्वेऽचिरप्रभावत्वे च सत्युन्नतत्वात्। य एवं ते वृष्ट्युत्पादका यथा वृष्ट्युत्पादकपूर्वमेघास्तथा चामी। तस्मात्तथा। ननून्नतत्वादिधर्मयुक्तानामपि मेघानां वृष्ट्यजनकत्वदर्शनात्, कथमैकान्तिकं कारणात्कार्यानुमानमिति चेत्। न। विशिष्टस्योन्नतत्वादेर्धर्मस्य गमकत्वेन विवक्षितत्वात्। न च तस्य विशेषो नासर्वज्ञेन निश्चेतुं

पार्यत इति वक्तुं शक्यं, सर्वानुमानोच्छेदप्रसक्तेः। तथाहि। मग्नकादिव्यावृत्तधूमादीनामपि स्वसाध्याव्यभिचारित्वमसर्ववित्ता न निश्चेतुं शक्यमिति वक्तुं शक्यत एव। अथ सुविवेचितं कार्यं कारणं न व्यभिचरतीति न्यायाद्धूमादेर्गमकत्वम्। तत्तर्ह्यचापि समानम्। यो हि भविष्यद्दृष्ट्यव्यभिचारिणमुन्नतत्वादिविशेषमवगन्तुं समर्थः, स एव तस्मात्तमनुमिनोति, नागृहीतविशेषः। तदुक्तम्। अनुमातुरयमपराधो नानुमानस्येति। शेषं कार्यं तदस्ति तच्छेषवच्च कार्येण कारणमनुमीयते, यथा नदीपूरदर्शनादृष्टिः। अत्र कार्यशब्देन कार्यधर्मो लिङ्गमवगन्तव्यम्। प्रयोगस्त्वित्थम्। उपरिवृष्टिमद्देशसंबन्धिनी नदी शीघ्रतरस्रोतस्त्वे फेनसमूहकाष्ठादिवहनत्वे च सति पूर्णत्वात् तदन्यनदीवत्। सामान्यतोदृष्टं नाम कार्यकारणभूतेनाविनाभाविना लिङ्गेन यच्च लिङ्गिनोऽवगमो, यथा बलाकया सलिलस्येति। प्रयोगस्तु। अयं बलाकाजहद्वृत्तिः प्रदेशो जलवान्बलाकावत्त्वात्, संप्रतिपन्नदेशवत्, यथा वान्यवृक्षोपरिदृष्टस्यादित्यस्यान्यपर्वतोपरिदर्शनेन गतेरवगमः। प्रयोगः पुनः रवेरन्यत्रदर्शनं गत्यविनाभूतं, अन्यत्रदर्शनत्वात्, देवदत्ताद्यन्यदर्शनवत्। अत्र यथा देवदत्तादेरन्यत्रदृष्टस्यान्यत्रदर्शनं व्रज्यापूर्वं, तथादित्यस्यापीति, अन्यत्रदर्शनं च गतेः कार्यं संयोगादेर्गतिकार्यत्वात्॥ अन्ये त्वेवं वर्णयन्ति। समानकालस्य स्वर्गस्य रूपादकार्यकारणभूतात्प्रतिपत्तिः सामान्यतोदृष्टानुमानप्रभवा। अत्र प्रयोगः। ईदृशस्वर्गिदं वस्त्वमेवंविधरूपत्वात्। तदन्यतादृशवस्त्ववत्। एकं चूतं

फलितं दृष्ट्वा पुष्पिता जगति चूता इति प्रतिपत्तिर्वा । प्रयोगस्तु । पुष्पिता जगति चूतासूतत्वात्, दृष्टचूतवदित्यादि । अथवा पूर्वेण व्याप्तिग्राहकप्रत्यक्षेण तुल्यं वर्तत इति पूर्ववत्संबन्धग्राहकप्रत्यक्षेण विषयतुल्यत्वात्कथंचित्परिच्छेदक्रियाया अपि तुल्यतानुमाने समक्षीति क्रियातुल्यत्ववतः प्रयोगः सिद्धः । तेन पूर्वप्रतिपत्त्या तुल्या प्रतिपत्तिर्यतो भवति, तत्पूर्ववदनुमानम् । इच्छादयः परतन्त्रा गुणत्वात् रूपादिवदिति शेषवन्नाम परिशेषः । स च प्रसक्तानां प्रतिषेधेऽन्यत्रप्रसङ्गासंभवाच्छिष्यमाणस्य संप्रत्ययः, यथा गुणत्वादिच्छादीनां पारतन्त्र्ये सिद्धे शरीरादिषु प्रसक्तेषु प्रतिषेधः । शरीरविशेषगुणा इच्छादयो न भवन्ति, तद्गुणानां रूपादीनां स्वपरात्मप्रत्यक्षत्वेनेच्छादीनां च स्वात्मप्रत्यक्षत्वेन वैधर्म्यात् । नापीन्द्रियाणां विषयाणां वा गुणा उपहतेष्वप्यनुस्मरणदर्शनात् । न चान्यस्य प्रसक्तिरस्ति । अतः परिशेषादात्मसिद्धिः । प्रयोगश्च । योऽसौ परः स आत्मशब्दवाच्यः, इच्छाद्याधारत्वात् । ये नात्मशब्दवाच्या न भवन्ति, न इच्छाद्याधारा अपि न भवन्ति । यथा शरीरादयः । अत्र प्रत्यक्षेणाग्रहीत्वान्वयं केवलव्यतिरेकबलादात्मनः प्रमा शेषवतः फलम् । यत्र धर्मी साधनधर्मस्य प्रत्यक्षः साध्यधर्मस्य सर्वदाप्रत्यक्षः साध्यते तत्सामान्यतोदृष्टम् । यथेच्छादयः परतन्त्रा गुणत्वाद्रूपवत् । उपलब्धिर्वा करणसाध्या क्रियात्वाच्छिदिक्रियावत् । असाधारणकारणपूर्वकं जगद्वैचित्र्यं चित्रत्वाच्चित्रादिवैचित्र्यवदित्यादि सामान्यतोदृष्टस्यानेकमुदाहरणं मन्तव्यम् । ननु साध्यधर्मस्य

सर्वदाप्रत्यक्षत्वेन साध्येन हेतोः कथं व्याप्तिग्रहणमिति चेत्। उच्यते। धर्मिणि इच्छादेः प्रत्यक्षप्रतिपन्नत्वं गुणत्वकार्यत्वादेरपि साधनस्य तद्धर्मत्वं प्रतिपन्नमेव। पारतन्त्र्येण च स्वसाध्येन तस्य व्याप्तिरध्यक्षतो रूपादिष्ववगतैव। साध्यव्यावृत्त्या साधनव्यावृत्तिरपि प्रमाणान्तरादेवावगता। नन्वेवं पूर्ववच्छेषवत्सामान्यतोदृष्टानां परस्परतः को विशेषः। उच्यते। इच्छादेः पारतन्त्र्यमात्रप्रतिपत्तौ गुणत्वं कार्यत्वं वा पूर्ववत्। तदेवाश्रयान्तरबाधया विशिष्टाश्रयत्वेन बाधकेन प्रमाणेनावसीयमानं शेषवतः फलम्। तस्य साध्यधर्मस्य धर्म्यन्तरे प्रत्यक्षस्यापि तच्च धर्मिणि सर्वदाप्रत्यक्षत्वं सामान्यतोदृष्टव्यपदेशनिबन्धनम्। अतस्त्रयाणामेकमेवोदाहरणम्। तदेवं कारणादिवैविध्यात्त्रिप्रकारं लिङ्गं प्रमितिं जनयत्तत्पूर्वकं यदनुमानमिति द्वितीयं व्याख्यानम्। अत्र व्याख्याद्वये प्रथमव्याख्यानमेव बहूनामध्ययनप्रवृत्तीनामभिमतम्। तत्र च पूर्ववदादीनां व्याख्या द्वितीयव्याख्याने या चतुःप्रकाराभिहिता सैव द्रष्टव्येति॥

अथ सूत्रकार एव बालानामसंमोहार्थं शेषव्याख्याप्रकारानुपेक्ष्यानुमानस्य त्रिविधस्य विषयज्ञापनाय पूर्ववदादीनि पदानि व्याख्यानयन्नाह "तत्राद्यम्" इत्यादि। तत्र तेषु पूर्ववदादिषु, आद्यं पूर्ववदनुमानं किमित्याह। कारणालिङ्गात्कार्यस्य लिङ्गिनोऽनुमानं ज्ञानं कार्यानुमानम्। इहानुमानप्रस्तावे, गीयते प्रोच्यते। कारणात्कार्यमनुमानमिहोदितमिति पाठो वा। तत्रास्तीति-शब्दाध्याहारे कारणात्कार्यमस्तीत्यनुमानम्।

कारणात्कार्यमस्तीति ज्ञानमिहानुमानप्रस्ताव उदितं प्रोक्तम्। पाठद्वयेऽप्यत्र यल्लिङ्गिज्ञानमनुमानशब्देनोक्तं, तद्द्वितीयव्याख्यानकारिणां मतेन, न तु प्रथमव्याख्यानकर्तृमतेन। प्रथमव्याख्याकारिमतेन हि ज्ञानस्य हेतुरेवानुमानशब्दवाच्यः स्यात्। एवं शेषवत्यपि ज्ञेयम्। यत्र कारणात्तज्ज्ञानविशिष्टात्कार्यस्य ज्ञानं भवति, तत्पूर्ववदनुमानम्। अत्र ह्यर्थोपलब्धिहेतुः प्रमाणमिति वचनात्कार्यज्ञानमनुमानस्य फलं, तद्धेतुस्त्वनुमानं प्रमाणम्। तेनात्र कारणं वा तज्ज्ञानं वा कार्यकारणप्रतिबन्धस्मरणं वा कार्यं ज्ञापयत्पूर्ववदनुमानमिति॥

तस्योदाहरणमाह।

यथा।

रोलम्बगवलव्यालतमालमलिनत्विषः।
दृष्टिं व्यभिचरन्तीह नैवंप्रायाः पयोमुचः॥२०॥

यथेति निदर्शनदर्शनार्थः। रोलम्बा भ्रमराः, गवला अरण्यजातमहिषाः, व्याला दुष्टगजा सर्पाश्च, तमालास्तापिच्छवृक्षाः। तद्वन्मलिनाः श्यामलास्त्विषः कान्तयो येषां ते तथा। एतेन मेघानां कान्तिमत्ता वचनेनानिर्वचनीया काष्ठातिप्रयश्यामता व्यज्यते। एवंप्रायाः। एवंशब्द इदंप्रकारवचनः। प्रायशब्दो बाहुल्यवाचकः। तत एवमिदंप्रकाराणां प्रायो बाहुल्यं येषु त एवंप्राया ईदृक्प्रकारबाहुल्या इत्यर्थः। एतेन गम्भीरगर्जितत्वाचिरप्रभावत्त्वादिप्रकाराणां बाहुल्यं मेघेषु सत्सूचितम्। उक्तविशेषणविशिष्टा मेघा इह जने दृष्टिं न व्यभि-

चरन्ति, दृष्टिकरा एव भवन्तीत्यर्थः। प्रयोगस्तु सूचव्याख्यावसरोक्त एवात्रापि वक्तव्यः ॥

अथ शेषवद्व्याख्यामाह ।

कार्यात्कारणानुमानं यच्च तच्छेषवन्मतम् ।
तथाविधनदीपूराद्देवो दृष्टो यथोपरि ॥ २१ ॥

कार्यालिङ्गात्कारणस्य लिङ्गिनोऽनुमानं ज्ञानं यत् । चकारः प्रागुक्तपूर्ववदपेक्षया समुच्चये । तच्छेषवन्मतम् । अयमत्र तत्त्वार्थः । यत्र कार्यात्कारणज्ञानं भवति, तच्छेषवदनुमानम् । अत्रापि प्राग्वत्कारणज्ञानस्य हेतुः कार्यं कार्यदर्शनं तत्संबन्धस्मरणं चानुमानशब्देन प्रतिपत्तव्यम् । यथेत्युदाहरणोपन्यासार्थः प्रथममत्र योज्यः । तथाविधशीघ्रतरस्रोतस्फलफेनादिवहनलोभयतटव्यापित्वधर्मविशिष्टो यो नदीपूरस्तस्मात्लिङ्गादुपरिदेशे देवो मेघो वृष्ट इति ज्ञानम् । अत्र प्रयोगः प्राग्वत् ।

यच्च सामान्यतोदृष्टं तदेवं गतिपूर्विका ।
पुंसि देशान्तरप्राप्तिर्यथा सूर्येऽपि सा तथा ॥ २२ ॥

चः पुनरर्थे । यत्पुनः कार्यकारणभावादन्यत्र सामान्यतोऽविनाभावबलेन दृष्टं लिङ्गं सामान्यतोदृष्टं, तदेवम् । कथमित्याह । यथा पुंस्येकस्माद्देशाद्देशान्तरप्राप्तिर्गतिपूर्विका तथा सूर्येऽपि सा देशान्तरप्राप्तिस्तथा गतिपूर्विका । अत्र देशान्तरप्राप्तिशब्देन देशान्तरदर्शनं ज्ञेयम् । अन्यथा देशान्तरप्राप्तेर्गति-

कार्यत्वेन शेषवतोऽनुमानादस्य भेदो न स्यात् । यद्यपि गगने संचरतः सूर्यस्य नेत्रावलोकप्रसराभावेन गतिर्नोपलभ्यते, तथाप्युदयाचलात्कालान्तरेऽस्ताचलचूलिकादौ तद्दर्शनं गतिं गमयति । प्रयोगः पुनः पुर्वमुक्त एव । अथवा देशान्तरप्राप्तेर्गतिकार्यत्वं लोको न प्रत्येतीति इदमुदाहरणं कार्यकारणभावाविवक्षयोपन्यस्तम् । प्रयोगस्त्वेवम् । सूर्यस्य देशान्तरप्राप्तिर्गतिपूर्विका देशान्तरप्राप्तित्वाद्देवदत्तदेशान्तरप्राप्तिवत् ॥

उपमानलक्षणमाह ।

प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम् ।
उपमानं समाख्यातं यथा गौर्गवयस्तथा ॥ २३ ॥

"प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् [२, २, ६]" इति सूत्रम् । अत्र यत इत्यध्याहार्यम् । ततश्च प्रसिद्धेन वस्तुना गवा यत्साधर्म्यं समानधर्मत्वं तस्मात्प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम् । गवयगतस्य साध्यस्य संज्ञासंज्ञिसंबन्धस्य साधनं प्रतिपत्तिर्यतः साधर्म्यज्ञानाद्भवति तदुपमानं समाख्यातम् । साधर्म्यस्य प्रसिद्धिरागमपूर्विका । तत आगमसंसूचनायाह । यथा गौस्तथा गवय इति । गवयोऽरण्यगवयः । अथमत्र भावः । कश्चित्प्रभुणा गवयानयनाय प्रेषितस्तदर्थमजानानस्तमेवाप्राक्षीत् कीदृग्गवय इति । स प्रोचे यादृग्गौस्तादृग्गवय इति । ततः सोऽरण्ये परिभ्रमन्समानमर्थं यदा पश्यति, तदा तस्य तद्वाक्यार्थस्मृतिसहायेन्द्रियार्थसन्निकर्षाद्गोसदृशोऽयमिति यत्साक्ष्यज्ञानमुत्पद्यते,

तत्प्रत्यक्षफलं, तदेवाभिचार्यादिविशेषणमयं स गवयशब्दवाच्य इति संज्ञासंज्ञिसंबन्धप्रतिपत्तिं जनयदुपमानम् । संज्ञासंज्ञिसंबन्धप्रतिपत्तिस्वरूपमानस्य फलम् । न पुनरागमिकी सा, शब्दस्य तज्जनकस्य तदानीमभावात् । गवयपिण्डविषये च हेयादिज्ञानं यदुत्पद्यते तदिन्द्रियार्थसन्निकर्षजन्यत्वात्प्रत्यक्षफलम् ॥

अथ तुर्यं शाब्दमाह ।

शाब्दमाप्तोपदेशस्तु मानमेवं चतुर्विधम् ।
प्रमेयं त्वात्मदेहाद्यं बुद्धीन्द्रियसुखादि च ॥ २४ ॥

शब्दजनितं शाब्दमागम इत्यर्थः । तुर्भिन्नक्रमे । शाब्दं तु प्रमाणमाप्तोपदेशः । आप्त एकान्तेन सत्यवादी हितश्च । तस्योपदेशो वचनमाप्तोपदेशः । तज्जनितं तु ज्ञानं शाब्दस्य फलम् । मानं प्रमाणमेवमुक्तविधिना चतुर्विधम् ॥

तदेवं प्रथमं प्रमाणतत्त्वं व्याख्याय संप्रति द्वितीयं प्रमेयतत्त्वं व्याख्यातुमाह । प्रमेयं त्वात्मदेहाद्यम् । प्रमेयं तु प्रमाणफलस्य ग्राह्यं पुनरात्मदेहाद्यम् । आत्मा जीवः । देहो वपुः, तावाद्यौ यस्य तदात्मदेहाद्यम् । बुद्धीन्द्रियसुखादि च प्रमेयम् । बुद्धिर्ज्ञानं, इन्द्रियं चक्षुरादिमनःपर्यन्तं, सुखं सातं तान्यादिर्यस्य तद्बुद्धीन्द्रियसुखादि । चकार आत्मदेहाद्यपेक्षया समुच्चये । अत्र विशेषणद्वय आद्यशब्देनादिशब्देन च शेषाणामपि सप्तानां प्रमेयानां संग्रहो द्रष्टव्यः । तथा च नैयायिकसूत्रम् । "आत्मशरीरेन्द्रियार्थबुद्धिमानःप्रवृत्तिदोषप्रेत्यभावफलदुःखाप-

वर्गभेदेन द्वादशविधं तदिति प्रमेयम्। [१, १, ९] तच्च शरीरादिदुःखपर्यन्तं हेयं, अपवर्ग उपादेयः। आत्मा तु कथञ्चिद्धेयः, कथञ्चिदुपादेयः। सुखदुःखादि भोक्तृतया हेयः, तदुन्मुक्ततयोपादेय इति। तच्चेच्छाद्वेषप्रयत्नसुखदुःखज्ञानादीनामाश्रय आत्मा। सचेतनत्वकर्तृत्वसर्वगतत्वादिधर्मैरात्मा प्रतीयते १। तद्भोगायतनं शरीरम् २। पञ्चेन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि ३। पञ्चार्था रूपरसगन्धस्पर्शशब्दाः। तत्र गन्धरसरूपस्पर्शाश्चत्वारः पृथिवीगुणाः। रूपरसस्पर्शास्त्रयोऽपां गुणाः। रूपस्पर्शौ तेजसो गुणौ। एकः स्पर्शो वायोर्गुणः। शब्द आकाशस्य गुण इति ४। बुद्धिरुपलब्धिर्ज्ञानमित्यर्थः। सा क्षणिका, भोगस्वभावत्वाच्च संसारकारणमिति हेया ५। इन्द्रियार्थसन्निकर्षे सत्यपि युगपज्ज्ञानानुत्पादात् आन्तरसुखादिविषयोपलब्धेश्च बाह्यगन्धादिविषयोपलब्धिवत्करणसाध्यत्वादान्तरं करणं मनोऽनुमीयते। तत्सर्वविषयं तच्चाणु वेगवदायुसंचारि नित्यं च ६। वाङ्मनःकायव्यापारः शुभाशुभफलः प्रवृत्तिः ७। रागद्वेषमोहास्त्रयो दोषाः। ईर्ष्यादीनामेतेष्वेवान्तर्भावः। तत्कृतश्चैष संसारः ८। हेयेन्द्रियादिसंघातस्य प्राक्तनस्य त्यागेन संघातान्तरग्रहणं प्रेत्यभावः। एष एव संसारः ९। प्रवृत्तिदोषजनितं सुखदुःखात्मकं मुख्यं फलं, तत्साधनं तु गौणम् १०। पीडासंतापस्वभावं दुःखम्। फलग्रहणेनाच्छिन्नमपीदं सुखस्यापि दुःखाविनाभावित्वात् दुःखत्वभावनार्थमुपदिश्यते ११। आत्यन्तिको दुःखवियोगोऽपवर्गः, सर्वगुणवियुक्तस्यात्मनः स्वरूपे-

णावस्थानं, सुखदुःखयोर्विवेकेन हानस्याग्रक्यत्वात्। दुःखं जिगासुः सुखमपि जह्यात्। यस्माज्जन्मजरामरणप्रबन्धोच्छेदरूपः। परमः पुरुषार्थो ऽपवर्गः। स च तत्त्वज्ञानाद्वाप्यते ॥ १ २॥

संशयप्रयोजनयोः स्वरूपं प्राह।

किमेतदिति संदिग्धः प्रत्ययः संशयो मतः।
प्रवर्तते यदर्थित्वात्तत्तु साध्यं प्रयोजनम् ॥ २५ ॥

अयं किंशब्दो ऽस्ति क्षेपे 'किंसखा यो ऽभिद्रुह्यति'; अस्ति प्रश्ने 'किं ते प्रियं'; अस्ति निवारणे 'किं ते रुदितेन'; अस्त्यपलापे 'किं ते ऽहं धारयामि'; अस्त्यनुनये 'किं ते ऽहं प्रियं करोमि'; अस्त्यवज्ञाने 'कस्त्वामुल्लापयते'; अस्ति वितर्के 'किमिदं दूरे दृश्यते'। इह तु वितर्के। दूरावलोकनेन पदार्थसामान्यमवबुध्यमानस्तद्विशेषं संदिहानो वितर्कयति 'एतत्प्रत्यक्षमूर्ध्वस्थितं वस्तु किं, तर्कं स्थाणुर्वा पुरुषो वेति'। यः संदिग्धो ऽनेककोटिपरामर्शी प्रत्ययो विमर्शः, स संशयो मतः संमत इति ॥

अथ प्रयोजनम्। यदर्थित्वाद्यस्य फलस्यार्थित्वमभिलाषुकत्वं यदर्थित्वं, तस्मात्प्रवर्तते तत्तदीयसाधनेषु यत्नं कुरुते, तत्तु तत्पुनः साध्यं कर्तव्यतयेष्टं प्रयोजनं फलं यस्य वाञ्छया कृत्येषु प्रवर्तते तत्प्रयोजनमित्यर्थः ॥ प्रयोजनमूलत्वाच्च प्रमाणोपन्यासप्रवृत्तेः प्रमेयान्तर्भूतमपि प्रयोजनं पृथगुपदिश्यते ॥

अथ दृष्टान्तसिद्धान्तौ व्याचिख्यासुराह

दृष्टान्तस्तु भवेदेष विवादविषयो न यः ।
सिद्धान्तस्तु चतुर्भेदः सर्वतन्त्रादिभेदतः ॥ २६ ॥

दृष्टोऽन्तो निश्चयो ऽत्रेति दृष्टान्तः । दृष्टान्तः पुनरेषो ऽयं भवेत् । एष क इत्याह । य उपन्यस्तः सन् विवादविषयो वादिप्रतिवादिनोर्मिथोविरुद्धो वादो विवादः, तस्य विषयो गोचरो न भवति । वादिप्रतिवादिनोरुभयोः संमत एवानुमानादौ दृष्टान्त उपन्यस्तव्य इत्यर्थः । पञ्चस्ववयवेषु वक्ष्यमाणो ऽपि दृष्टान्तः साध्यसाधनधर्मयोः प्रतिबन्धग्रहणस्थानमिति पृथगिहोपदिश्यते । तावदेव ह्यन्वयव्यतिरेकयुक्तो ऽर्थः स्खलति, यावन्न स्पष्टदृष्टान्तावष्टम्भः । उक्तं च ।

तावदेव चलत्यर्थो मन्तुर्विषयमागतः ।
यावन्नोक्तमनेनैव दृष्टान्तेनावलम्ब्यते ॥

सिद्धान्तस्तु सिद्धान्तः पुनश्चतुर्भेदो भवेत् । कुत इत्याह । सर्वतन्त्रादिभेदतः सर्वतन्त्रादिभेदेन । प्रथमः सर्वतन्त्रसिद्धान्तः । आदिशब्दात्प्रतितन्त्रसिद्धान्तो ऽधिकरणसिद्धान्तो ऽभ्युपगमसिद्धान्तश्च वेदितव्यः । इह तन्त्रशब्देन शास्त्रं विज्ञेयम् ॥ तत्र सर्वतन्त्राविरुद्धः स्वतन्त्रे ऽधिकृतो ऽर्थः सर्वतन्त्रसिद्धान्तः सर्वेषां शास्त्राणां संप्रतिपत्तिविषयः, यथा प्रमाणानि प्रमेयसाधनानि, घ्राणादीनीन्द्रियाणि, गन्धाद्यस्तदर्थाः, प्रमाणेन प्रमेयस्य परिच्छेद इत्यादि ॥ समानतन्त्रप्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः, यथा भौतिकानीन्द्रियाणि यौगानां काणा-

दादीनां च, अभौतिकानि संख्यानाम् । तथा सांख्यानां सर्वं सदेवोत्पद्यते न पुनरसत्, नैयायिकादीनां सर्वमसदेवोत्पद्यते सामग्रीवशात्, जैनानां तु सदसदुत्पद्यत इत्यादि ॥

यस्य सिद्धावन्यस्य प्रक्रियमाणस्य प्रतिज्ञार्थस्य प्रसङ्गेनाधिकस्य सिद्धिः, सो ऽधिकरणसिद्धान्तः, यथा कार्यत्वादेः चित्यादौ बुद्धिमत्कारणसामान्यसिद्धावन्यस्य तत्करणसमर्थस्य नित्यज्ञानेच्छाप्रयत्नाधारस्य तत्कारणस्य सिद्धिरिति ॥ प्रौढवादिभिः स्वबुद्धातिशयचिख्यापयिषया यत्किंचिदस्खलपरीचितमभ्युपगम्य विशेषः परीच्यते, सो ऽभ्युपगमसिद्धान्तः, यथास्तु द्रव्यं शब्दः, स तु किं नित्यो ऽनित्यो वेति शब्दस्य द्रव्यत्वमनिष्टमभ्युपगम्य नित्यानित्यत्वविशेषः परीच्यते ॥ एवं चतुर्विधः सिद्धान्तः ॥

अवयवादितत्त्वत्रयं प्ररूपयति ।

प्रतिज्ञाहेतुदृष्टान्तोपनया निगमस्तथा ।
अवयवाः पञ्च तर्कः संदेहोपरमे भवेत् ॥ २७ ॥
यथा काकादिसंपातात्स्थाणुना भाव्यमत्र हि ।
ऊर्ध्वं संदेहतर्काभ्यां प्रत्ययो निर्णयो मतः ॥ २८ ॥

युग्मम् । अवयवाः पञ्च, के पञ्चेत्याह । प्रतिज्ञा हेतुर्दृष्टान्त उपनयो निगमशब्देन निगमनं चेति । तत्र प्रतिज्ञा पक्षधर्मधर्मिवचनं, क्षणानुमानयं सानुमानित्यादि । हेतुः साधनं लिङ्गवचनं, धूमवत्त्वादित्यादि । दृष्टान्त उदाहरणाभिधानं, तद्विविधं, अन्वयमुखेन व्यतिरेकमुखेन च । अन्वयमुखेन यथा ।

यो यो धूमवान्, स स क्वग्नानुमान्, यथा महानसमित्यादि । व्यतिरेकमुखेन यथा । यो यः क्वग्नानुमान्न भवति, स स धूमवान्न भवति, यथा जलमित्यादि । उपनयो हेतोरुपसंहारकं वचनम् । धूमवांश्चायमित्यादि । निगमनं हेत्वपदेशेन साध्यधर्मोपसंहरणम् । धूमवत्त्वात्क्वग्नानुमानित्यादि ॥

अथ तर्कतत्त्वम् । तर्कः संन्देहोपरमे भवेत् । सम्यग्वस्तुस्वरूपानवबोधे किमयं स्थाणुर्वा पुरुषो वेति संदेहः संशयस्तस्योपरमे व्यपगमे तर्को ऽन्वयधर्मान्वेषणरूपो भवेत् । कथमित्याह । यथा काकादीत्यादि । यथेत्युपदर्शने । काकादिसंपातात् वायसप्रभृतिपक्षिसंपतनादुपलक्षणत्वान्निश्चलत्ववल्मीकारोहणादिस्थाणुधर्मेभ्यश्चात्तारण्यप्रदेशे स्थाणुना कीलकेन भाव्यं भवितव्यम् । हिशब्दो ऽत्र निश्चयोत्प्रेक्षणार्थो द्रष्टव्यः । संप्रति हि वने ऽत्र मानवस्यासंभवात्स्थाणुधर्माणामेव दर्शनाच्च स्थाणुरेवात्र घटत इति । तदुक्तम् ।

अरण्यमेतत्सवितास्तमागतो न चाधुना संभवतीह मानवः ।
ध्रुवं तदेतेन खगादिभाजा भाव्यं स्मरारातिसमाननाम्ना ॥
इत्येष तर्कः ॥

अथ निर्णयतत्त्वमाह । ऊर्ध्वमित्यादि । पूर्वोक्तस्वरूपाभ्यां संदेहतर्काभ्यामूर्ध्वमनन्तरं यः प्रत्ययः स्थाणुरेवायं पुरुष एव नेति प्रतीतिः स निर्णयो निश्चयो मतो ऽभीष्टः । यत्तदावर्थसंबन्धादनुक्तावपि क्वचन गम्येते, तेनात्र तौ व्याख्यातौ । एवमन्यत्रापि मन्तव्यम् ॥

अथ वादतत्त्वमाह ।

आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात् ।
या कथाभ्यासहेतुः स्यादसौ वाद उदाहृतः ॥ २९ ॥

वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः कथा । सा द्विविधा, वीतरागकथा विजिगीषुकथा च । यत्र वीतरागेण गुरुणा सह शिष्यस्तत्त्वनिर्णयार्थं साधनोपालम्भौ करोति साधनं स्वपक्ष उपालम्भश्च परपक्षे ऽनुमानस्य दूषणं, सा वीतरागकथा वादसंज्ञयैवोच्यते । वादं प्रतिपक्षस्थापनाहीनमपि कुर्यात् प्रश्नद्वारेणैव ॥ यत्र विजिगीषुर्जिगीषुणा सह लाभपूजाख्यातिकामो जयपराजयार्थं प्रवर्तते वीतरागो वा परानुग्रहार्थं ज्ञानाङ्कुरसंरक्षणार्थं च प्रवर्तते, सा चतुरङ्गा वादिप्रतिवादिसभापतिप्राश्निकाङ्गा विजिगीषुकथा जल्पवितण्डासंज्ञोक्ता । तथा चोक्तम् । "तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे, बीजप्ररोहसंरक्षणार्थं कण्टकशाखापरिवरणवत्" इति । यथोक्तलक्षणोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः । स प्रतिपक्षस्थापनाहीनो वितण्डेति वादजल्पवितण्डानां व्यक्तिः ॥

अथ प्रकृतं प्रस्तुमः । आचार्यो ऽध्यापको गुरुः, शिष्यो ऽध्येता विनेयः । तयोराचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात् । पक्षः पूर्वपक्षः प्रतिज्ञादिसंग्रहः, प्रतिपक्ष उत्तरपक्षः पूर्वपक्षप्रतिपन्थी पक्ष इत्यर्थः, तयोः परिग्रहात्स्वीकारात्, अभ्यासस्य हेतुरभ्यासकारणम्, या कथा प्रामाणिकी वार्त्ता, असौ कथा

वाद उदाहृतः कीर्तितः । आचार्यः पूर्वपक्षं स्वीकृत्याचष्टे शिष्यश्चोत्तरपक्षमुररीकृत्य पूर्वपक्षं खण्डयति । एवं पक्षप्रतिपक्षसंग्रहेण निग्राहकसभापतिजयपराजयच्छलजात्याद्यनपेक्षतयाभ्यासार्थं यत्र गुरुशिष्यौ गोष्ठीं कुरुतः, स वादो विज्ञेयः ॥

अथ जल्पवितण्डे विवृणोति ।

विजिगीषुकथा या तु च्छलजात्यादिदूषणा ।
स जल्पः सा वितण्डा तु या प्रतिपक्षवर्जिता ॥ ३० ॥

या तु या पुनर्विजिगीषुकथा विजयाभिलाषिभ्यां वादिप्रतिवादिभ्यां प्रारब्धा प्रमाणगोष्ठी, कथंभूता, छलानि जातयश्च वक्ष्यमाणलक्षणानि, आदिशब्दान्निग्रहस्थानादिपरिग्रहः, एतैः कृत्वा दूषणं परोपन्यस्तपक्षादेर्दोषोत्पादनं यस्यां सा छलजात्यादिदूषणा, स विजिगीषुकथारूपो जल्प उदाहृत इति पूर्वश्लोकात्संबन्धनीयम् । ननु च्छलजात्यादिभिः परपक्षादेर्दूषणोत्पादनं सतां कर्तुं न युक्तमिति चेत् । न । सन्मार्गप्रतिपत्तिनिमित्तं तस्याभ्यनुज्ञातत्वात् । अनुज्ञातं हि स्वपक्षस्थापनेन सन्मार्गप्रतिपत्तिनिमित्ततया छलजात्याद्युपन्यासैरपि परप्रयोगस्य दूषणोत्पादनम् । तथा चोक्तम् ।

दुःश्चिन्तितकुतर्काग्रलेग्रवाचालिताननाः ।
ग्रक्ष्याः किमन्यथा जेतुं वितण्डाटोपमण्डिताः ॥ २ ॥
गतानुगतिको लोकः कुमार्गं तत्प्रतारितः ।
मार्गादिति च्छलादीनि प्राह कारुणिको मुनिः ॥ ३ ॥

इति संकटे प्रस्तावे च सति च्छलादिभिरपि स्वपक्षस्थापनमनुमतम्। परविजये हि न धर्मध्वंसादिदोषसंभवः। तस्मादरं छलादिभिरपि जयः॥ सा वितण्डा त्यादि। तुशब्दो ऽवधारणार्थो भिन्नक्रमश्च। सा तु सैव विजिगीषुकथैव प्रतिपक्षविवर्जिता वादिप्रयुक्तपक्षप्रतिपन्थी प्रतिवाद्युपन्यासः प्रतिपक्षस्तेन विवर्जिता रहिता प्रतिपक्षसाधनाहीनेत्यर्थः वितण्डोदाहृता। वैतण्डिको हि स्वाभ्युपगतपक्षमस्थापयन्यत्किंचिद्वादेन परोक्तमेव दूषयतीत्यर्थः॥

अथ हेत्वाभासादितत्त्वत्रयस्वरूपं प्रकटयति।

हेत्वाभासा असिद्धाद्याश्छलं कूपो नवोदकः।
जातयो दूषणाभासाः पक्षादिर्दूष्यते न यैः॥ ३१॥

असिद्धाद्या असिद्धविरुद्धानैकान्तिककालात्ययापदिष्टप्रकरणसमाः पञ्च हेत्वाभासाः। तत्र पक्षधर्मत्वं यस्य नास्ति, सोऽसिद्धः। अनित्यः शब्दश्चाक्षुषत्वादिति। १॥ विपक्षे सन्सपक्षे चासन् विरुद्धः। नित्यः शब्दः कार्यत्वादिति। २॥ पक्षादित्रयवृत्तिरनैकान्तिकः। अनित्यः शब्दः प्रमेयत्वादिति। ३॥ हेतोः प्रयोगकालः प्रत्यक्षागमानुपहतपक्षपरिग्रहसमयस्तमतीत्यापदिष्टः प्रयुक्तः, प्रत्यक्षागमविरुद्धे पक्षे वर्तमान इत्यर्थः, हेतुः कालात्ययापदिष्टः। अनुष्णोऽग्निः कृतकत्वात्, ब्राह्मणेन सुरा पेया द्रवद्रव्यत्वात् क्षीरवदिति। ४॥ स्वपक्षसिद्धाविव परपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसमः। प्रकरणे पक्षे

प्रतिपक्षे च तुल्य इत्यर्थः। —अनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात्, सपक्षवदित्येकेनोक्ते द्वितीयः प्राह। यद्येनेन प्रकारेणानित्यत्वं साध्यते, तर्हि नित्यताभिद्धिरण्यस्तु, यथा नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् सपक्षवदिति। अथवानित्यः शब्दो नित्यधर्मानुपलब्धेः घटवत्, नित्यः शब्दोऽनित्यधर्मानुपलब्धेराकाशवदिति। न चैतेष्वन्यतरदपि साधनं बलीयो यदितरस्य बाधकमुच्यते। ५॥ निग्रहस्थानान्तर्गता अपमी हेत्वाभासाः न्यायविवेकं कुर्वतो वादे वस्तुशुद्धिं विदधतीति पृथगेवोच्यते॥

छलं कूपो नवोदक इति परोपन्यस्तवादे स्वाभिमतकल्पनया वचनविघातश्छलम्। तच्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च। परोक्तेऽर्थान्तरकल्पना वाक्छलम्। यथा नव्यः कम्बलोऽस्येत्यभिप्रायेण नवकम्बलो माणवक इत्युक्ते छलवाद्याह, कुतोऽस्य नवसंख्याः कम्बला इति। १॥ संभावनयातिप्रसङ्गिनोऽपि सामान्यस्योपन्यासे हेतुत्वारोपणेन तन्निषेधः सामान्यच्छलम्। यथा अहो नु खल्वसौ ब्राह्मणो विद्याचरणसंपन्न इति ब्राह्मणस्तुतिप्रसङ्गे कश्चिदवदति। संभवति ब्राह्मणे विद्याचरणसंपदिति। तच्छलवादी ब्राह्मणत्वस्य हेतुत्वमारोप्य निराकुर्वन्नभियुङ्क्ते। व्रात्येनानैकान्तिकमेतत्। यदि हि ब्राह्मणे विद्याचरणसंपद्भवति, तदा व्रात्येऽपि सा भवेत्। व्रात्योऽपि ब्राह्मण एवेति। २॥ औपचारिके प्रयोगे मुख्यार्थकल्पनया प्रतिषेध उपचारच्छलम्। यथा मञ्चाः क्रोशन्तीत्युक्ते छलवाद्याह। मञ्चस्थाः पुरुषाः क्रोशन्ति, न मञ्चास्तेषामचेतनला-

दिति । ३ ॥ अथ ग्रन्थलक्षणं व्यचिख्यासुराद्यस्य वाक्छल-स्योदाहरणमाह । कूपो नवोदक इति । अत्र नूतनार्थनवशब्दस्य प्रयोगे कृते छलवादी दूषयति । कुत एक एव कूपो नव-संख्योदक इति । अनेन शेषच्छलद्वयोदाहरणे अपि सूचिते द्रष्टव्ये इति ॥ 5

जातय इत्यादि । दूषणाभासा जातयः । अदूषणान्यपि दूष-णवदाभासन्त इति दूषणाभासाः । यैः पक्षादिः पक्षहेत्वादिर्न दूष्यत आभासमाचलाच्च दूषयितुं शक्यते, केवलं सम्यग्हेतौ हेत्वाभासे वा वादिना प्रयुक्ते झगिति तद्दोषत्वाप्रतिभासे हेतु-प्रतिबिम्बनप्रायं किमपि प्रत्यवस्थानं जातिः । सा च चतुर्वि- 10 शतिभेदा साधर्म्यादिप्रत्यवस्थानभेदेन । यथा साधर्म्य-१, वैधर्म्य-२, उत्कर्ष-३, अपकर्ष-४, वर्ण्य-५, अवर्ण्य-६, विकल्प-७, साध्य-८, प्राप्ति-९, अप्राप्ति-१०, प्रसङ्ग-११, प्रतिदृष्टान्त-१२, अनुत्पत्ति-१३, संशय-१४, प्रकरण-१५, अहेतु-१६, अर्थापत्ति-१७, अविशेष-१८, उपपत्ति-१९, उपलब्धि-२०, अनुपलब्धि- 15 २१, नित्य-२२, अनित्य-२३, कार्यसमा-२४ ॥

तत्र साधर्म्येण प्रत्यवस्थानं साधर्म्यसमा जातिर्भवति । अनित्यः शब्दः, कृतकत्वात्, घटवदिति प्रयोगे कृते साधर्म्यप्रयोगेणैव प्रत्यवस्थानम् । यद्यनित्यघटसाधर्म्यात्कृतकत्वादनित्यः शब्द दृश्यते, तर्हि नित्याकाशसाधर्म्यादमूर्तत्वान्नित्यः प्राप्नोतीति ॥ १ ॥ 20

वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमा जातिः । अनित्यः शब्दः, कृतत्वात्, घटवदित्यत्रैव प्रयोगे वैधर्म्येणोक्ते वैधर्म्येणैव प्रत्यव-

स्थानम्। नित्यः शब्दोऽमूर्तत्वात्। अनित्यं हि मूर्तं दृष्टं, यथा घटादीति। यदि हि नित्याकाशवैधर्म्यात्कृतकत्वादनित्य इष्यते, तर्हि घटाद्यनित्यवैधर्म्यादमूर्तत्वान्नित्यः प्राप्नोति, विशेषाभावादिति ॥ २ ॥

उत्कर्षापकर्षाभ्यां प्रत्यवस्थानमुत्कर्षापकर्षसमे जाती भवतः। तत्रैव प्रयोगे दृष्टान्तसाधर्म्यं किंचित्साध्यधर्मिण्यापादयन्नुत्कर्षसमां जातिं प्रयुङ्क्ते। यदि घटवत्कृतकत्वादनित्यः शब्दस्तर्हि घटवदेव मूर्तोऽपि भवेत्। न चेत् मूर्तो घटवदनित्योऽपि मा भूदिति शब्दे धर्मान्तरोत्कर्षमापादयति ॥ ३ ॥

अपकर्षस्तु। घटः कृतकः सन्नश्रावणो दृष्टः। एवं शब्दोऽपि भवतु। नो चेत् घटवदनित्योऽपि मा भूदिति शब्दे श्रावणत्वमपकर्षति ॥ ४ ॥

वर्ण्यावर्ण्याभ्यां प्रत्यवस्थानं वर्ण्यावर्ण्यसमे जाती भवतः। स्थापनीयो वर्ण्यस्तद्विपरीतोऽवर्ण्यस्तावेतौ वर्ण्यावर्ण्यौ साध्यदृष्टान्तधर्मौ विपर्यस्यन्वर्ण्यावर्ण्यसमे जाती प्रयुङ्क्ते। यथाविधः शब्दधर्मः कृतकत्वादिर्न तादृक् च घटधर्मो, यादृक् च घटधर्मो न तादृक् शब्दधर्म इति। साध्यधर्मो दृष्टान्तधर्मश्च हि तुल्यौ कर्तव्यौ। अत्र तु विपर्यासः। यतो यादृग् घटधर्मः कृतकत्वादिर्न तादृक् शब्दधर्मः। घटस्य ह्यन्यादृशं कुम्भकारादिजन्यं कृतकत्वं, शब्दस्य हि ताल्वोष्ठादिव्यापारजमिति ॥ ५-६ ॥

धर्मान्तरविकल्पेन प्रत्यवस्थानं विकल्पसमा जातिः। यथा कृतकं किंचिन्मृदु दृष्टं तूलशय्यादि, किंचित्तु कठिनं कुठा-

रादि, एवं क्षतकं किंचिदनित्यं भविष्यति घटादिकं, किंचिच्च नित्यं शब्दादीति ॥ ७ ॥

साध्यसाम्यापादनेन प्रत्यवस्थानं साध्यसमा जातिः। यदि यथा घटस्तथा शब्दः प्राप्तः, तर्हि यथा शब्दस्तथा घट इति शब्दश्च साध्य इति घटोऽपि साध्यो भवेत्, ततश्च न साध्यः साधनस्य दृष्टान्तः स्यात्। न चेदेवं तथापि वैलक्षण्यात्सुतरां न दृष्टान्त इति ॥ ८ ॥

प्राप्यप्राप्तिविकल्पाभ्यां प्रत्यवस्थानं प्राप्यप्राप्तिसमे जाती। यदेतत्क्षतकत्वं साधनमुपन्यस्तं तत्किं प्राप्य साध्यं साधयत्यप्राप्य वा। प्राप्य चेत्, तर्हि द्वयोर्विद्यमानयोरेव प्राप्तिर्भवति न सदसतोरिति। द्वयोश्च सत्त्वात्किं कस्य साध्यं साधनं वा। अप्राप्य तु साधनत्वमयुक्तमतिप्रसङ्गादिति ॥ ९-१० ॥

प्रसङ्गापादनेन प्रत्यवस्थानं प्रसङ्गसमा जातिः। यद्यनित्यत्वे क्षतकत्वं साधनं, तदा क्षतकत्वे किं साधनं, तत्साधनेऽपि किं साधनमिति ॥ ११ ॥

प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमा जातिः। अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात्, घटवदित्युक्ते जातिवाद्याह। यथा घटः प्रयत्नानन्तरीयकोऽनित्यो दृष्टः, एवं प्रतिदृष्टान्त आकाशं नित्यमपि प्रयत्नानन्तरीयकं दृष्टं, कूपखननप्रयत्नानन्तरं तदुपलम्भादिति। न चेदमनैकान्तिकत्वोद्भावनं भंग्यन्तरेण प्रत्यवस्थानात् ॥ १२ ॥

अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमा जातिः। अनुत्पन्ने

शब्दाख्ये धर्मिणि कृतकत्वं धर्मः क्व वर्तते। तदेवं हेत्वाभावादसिद्धिरनित्यत्वस्येति ॥ १३ ॥

साधर्म्यसमा वैधर्म्यसमा वा या जातिः पूर्वमुदाहारि सैव संग्रहेणोपसंहृियमाणा संग्रहसमा जातिर्भवति। किं घटसाधर्म्यात्कृतकत्वादनित्यः शब्द उत तद्वैधर्म्यादमूर्तत्वान्नित्य इति ॥ १४ ॥

द्वितीयपक्षोत्थापनबुद्ध्या प्रयुज्यमाना सैव साधर्म्यसमा वैधर्म्यसमा च जातिः प्रकरणसमा भवति। तत्रैवानित्यः शब्दः, कृतकत्वाद्घटवदिति प्रयोगे नित्यः शब्दः श्रावणत्वाच्छब्दत्ववदिति। उद्भावनप्रकारभेदमात्रेण च जातिनानात्वं द्रष्टव्यम् ॥ १५ ॥

हेत्वात्मानुपपत्त्या हेतोः प्रत्यवस्थानं हेतुसमा जातिः। हेतुः साधनं तत्साध्यात्पूर्वं पश्चात्सह वा भवेत्। यदि पूर्वमसति साध्ये तत्कस्य साधनम्। अथ पश्चात्साधनं तर्हि पूर्वं साध्यं तस्मिंश्च पूर्वसिद्धे किं साधनेन। अथ युगपत्साध्यसाधने तर्हि तयोः सव्येतरगोविषाणयोरिव साध्यसाधनभाव एव न भवेदिति ॥ १६ ॥

अर्थापत्त्या प्रत्यवस्थानमर्थापत्तिसमा जातिः। यद्यनित्यसाधर्म्यात्कृतकत्वादनित्यः शब्दोऽर्थादापद्यते, तदा नित्यसाधर्म्यान्नित्य इति। अस्ति चास्य नित्येनाकाशादिना साधर्म्यममूर्तत्वमित्युद्भावनप्रकारभेद एवायमिति ॥ १७ ॥

अविशेषापादनेन प्रत्यवस्थानमविशेषसमा जातिः। यदि शब्दघटयोरेको धर्मः कृतकत्वमिष्यते, तर्हि समानधर्मयोगात्तयोरविशेषे तद्वदेव सर्वपदार्थानामविशेषः प्रसज्यत इति ॥ १८ ॥

उपपत्त्या प्रत्यवस्थानमुपपत्तिसमा जातिः । कृतकत्वोपपत्त्या शब्दस्यानित्यत्वं, तर्ह्यमूर्तत्वोपपत्त्या नित्यत्वमपि कस्मान्न भवतीति पक्षद्वयोपपत्त्यानध्यवसायपर्यवसानत्वं विवक्षितमित्युद्भावनप्रकारभेद एवायम् ॥ १९ ॥

उपलब्ध्या प्रत्यवस्थानमुपलब्धिसमा जातिः । अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रत्यवतिष्ठते । न खलु प्रयत्नानन्तरीयकत्वमनित्यत्वे साधनम् । साधनं हि तदुच्यते येन विना न साध्यमुपलभ्यते । उपलभ्यते च प्रयत्नानन्तरीयकत्वेन विनापि विद्युदादावनित्यत्वं, शब्देऽपि क्वचिद्वायुवेगभज्यमानवनस्पत्यादिजन्ये तथैवेति ॥ २० ॥

अनुपलब्ध्या प्रत्यवस्थानमनुपलब्धिसमा जातिः । तत्रैव प्रयत्नानन्तरीयकत्वे हेतावुपन्यस्ते सत्याह जातिवादी । न प्रयत्नानन्तरीयकः कार्यः शब्दः प्रागुच्चारणादस्त्येवासौ, आवरणयोगात्तु नोपलभ्यते । आवरणानुपलम्भेऽप्यनुपलम्भान्नास्त्येवोच्चारणात्प्राक्शब्द इति चेत् न । अत्र हि यानुपलब्धिः सा स्वात्मनि वर्तते न वा । वर्तते चेत्तदा यत्रावरणेऽनुपलब्धिर्वर्तते, तस्यावरणस्य यथानुपलम्भस्तथावरणानुपलब्धेरप्यनुपलम्भः स्यात् । आवरणानुपलब्धेश्चानुपलम्भाद्भावो भवेत् । तद्भावे चावरणोपलब्धेर्भावो भवति । ततश्च मृदन्तरितमूलकौलोदकादिवदावरणोपलब्धिकृतमेव शब्दस्य प्रागुच्चारणाद्ग्रहणम् । अथानुपलब्धिः स्वात्मनि न वर्तते चेत्, तार्ह्यनुपलब्धिः स्वरूपेणापि नास्ति । तथाप्यनुपलब्धेरभाव उपलब्धिरूपत्वतोऽपि

शब्दस्य प्रागुच्चारणादप्यस्तित्वं स्यादिति। द्वेधापि प्रयत्नकार्यत्वाभावान्नित्यः शब्द इति ॥ २१ ॥

साधर्म्यनित्यानित्यविकल्पेन शब्दस्य नित्यत्वापादनं नित्यसमा जातिः। अनित्यः शब्द इति प्रतिज्ञाते जातिवादी विकल्पयति। येयमनित्यता शब्दस्योच्यते सा किमनित्या नित्या वेति। यद्यनित्या तदियमवश्यमपायिनीत्यनित्यताया अपायान्नित्यः शब्दः। अथानित्यता नित्यैव तथापि धर्मस्य नित्यत्वात्तस्य च निराश्रयस्यानुपपत्तेस्तदाश्रयभूतः शब्दोऽपि नित्य एव स्यात्, तस्यानित्यत्वे तद्धर्मस्य नित्यत्वायोगात्। इत्युभयथापि नित्यः शब्द इति ॥ २२ ॥

एवं सर्वभावानामनित्यत्वोपपादनेन प्रत्यवस्थानमनित्यसमा जातिः। घटसाधर्म्यमनित्यत्वेन शब्दस्यास्तीति तस्यानित्यत्वं यदि प्रतिपाद्यते, तदा घटेन सर्वपदार्थानामस्त्येव किमपि साधर्म्यमिति तेषामप्यनित्यत्वं स्यात्। अथ पदार्थान्तराणां तथाभावेऽपि नानित्यत्वं, तर्हि शब्दस्यापि तन्मा भूदिति, अनित्यत्वमात्रोपपादनपूर्वकविशेषोद्भावनाद्विशेषसमातो भिद्येयं जातिः॥ २३ ॥

प्रयत्नकार्यनानात्वोपन्यासेन प्रत्यवस्थानं कार्यसमा जातिः। अनित्यः शब्दः प्रयत्नान्तरीयकत्वादित्युक्ते जातिवाद्याह। प्रयत्नस्य द्वैरूप्यं दृष्टम्। किंचिदसदेव तेन जन्यते यथा घटादिकम्। किंचिच्च सदेवावरणव्युदासादिनाभिव्यज्यते यथा मृदन्तरितमूलकोद्यादि गर्भगतपुत्रादि वा। एवं प्रयत्नकार्यनानात्वादेष

शब्दः प्रयत्नेन व्यज्यते जन्यते वेति संशय इति। संशयापादनप्रकारभेदाच्च संशयसमातः कार्यसमा जातिर्भिद्यते ॥ २४ ॥

तदेवमुद्भावनविषयविकल्पभेदेन जातीनामानन्त्ये ऽप्यसंकीर्णोदाहरणविवक्षया चतुर्विंशतिर्जातिभेदा एते प्रदर्शिताः। प्रतिसमाधानं तु सर्वजातीनां पक्षधर्मत्वाद्यनुमानलक्षणपरीक्षालक्षणमेव। न ह्यविप्लुतलक्षणे हेतावेवं पाशुपाताः प्रभवन्ति। कृतकत्वप्रयत्नानन्तरीयकत्वयोस्तु दृढकृतप्रतिबन्धात् नावरणादिकृतं शब्दानुपलब्धनमपि त्वनित्यत्वकृतमेव। जातिप्रयोगे च परेण कृते सम्यगुत्तरमेव वक्तव्यम्, न तु प्रतीपं जात्युत्तरेष्वेव प्रत्यवस्थेयमासमंजस्य प्रसङ्गादिति ॥

अथ निग्रहस्थानमाह।

निग्रहस्थानमाख्यातं परो येन निगृह्यते।
प्रतिज्ञाहानिसंन्यासविरोधादिविभेदतः ॥ ३२ ॥

येन केनचित्प्रतिज्ञाहान्याद्युपरोधेन परो विपक्षो निगृह्यते परवादी वचननियहे पात्यते तन्निग्रहस्थानम्। निग्रहः पराजयस्तस्य स्थानमाश्रयः कारणमित्यर्थः। आख्यातं कथितम्। कुतो नामभेदत इत्याह। प्रतिज्ञाहानीत्यादि। हानिस्त्यागः, संन्यासो ऽपह्नवनं, विरोधो हेतोर्विरुद्धता। तेषां द्वन्द्वे हेतुसंन्यासविरोधाः। ततः प्रतिज्ञाशब्देनेत्थं संबन्धः, प्रतिज्ञायाः पक्षस्य हानिसंन्यासविरोधाः प्रतिज्ञाहानिसंन्यासविरोधास्ते।

आदिर्येषां ते प्रतिज्ञाहानिसंन्यासविरोधादयः । आदिशब्देन शेषानपि भेदान्परामृशति । तेषां विभेदतो विशिष्टभेदतः । येन प्रतिज्ञाहान्यादिदूषणजालेन परो निगृह्यते, तन्निग्रहस्थानमित्यर्थः ॥ निग्रहस्थानं च सामान्यतो द्विविधं, विप्रतिपत्तिरप्रतिपत्तिश्च । तत्र विप्रतिपत्तिः साधनाभासे साधनबुद्धिः दूषणाभासे च दूषणबुद्धिः । अप्रतिपत्तिस्तु साधनस्यादूषणं दूषणस्य चानुद्धरणम् । द्विधा हि वादी पराजीयते । यथा । कर्तव्यमप्रतिपद्यमानो विपरीतं वा प्रतिपद्यमान इति विप्रतिपत्त्यप्रतिपत्तिभेदाच्च द्वाविंशतिर्निग्रहस्थानि भवन्ति । तद्यथा । प्रतिज्ञाहानिः १, प्रतिज्ञान्तरं २, प्रतिज्ञाविरोधः ३, प्रतिज्ञासंन्यासः ४, हेत्वन्तरं ५, अर्थांतरं ६, निरर्थकं ७, अविज्ञातार्थं ८, अपार्थकं ९, अप्राप्तकालं १०, न्यूनं ११, अधिकं १२, पुनरुक्तं १३, अननुभाषणं १४, अज्ञानं १५, अप्रतिभा १६, विक्षेपः १७, मतानुज्ञा १८, पर्यनुयोज्योपेक्षणं १९, निरनुयोज्यानुयोगः २०, अपसिद्धान्तः २१, हेत्वाभासाश्च २२ ॥ अत्राप्यननुभाषणमज्ञानमप्रतिभा विक्षेपः पर्यनुयोज्योपेक्षणमित्यप्रतिपत्तिप्रकाराः, शेषाश्च विप्रतिपत्तिभेदाः ॥

तत्र हेतावनैकान्तिकीकृते प्रतिदृष्टान्तधर्मं स्वदृष्टान्ते ऽभ्युपगच्छतः प्रतिज्ञाहानिर्नाम निग्रहस्थानं भवति । अनित्यः शब्द ऐन्द्रियकत्वाद्घटवदिति साधनं वादी वदन्, परेण सामान्यमैन्द्रियकमपि नित्यं दृष्टमिति हेतावनैकान्तिकीकृते यद्येवं ब्रूया-

सामान्यवद्घटो ऽपि नित्यो भवतिति, स एवं ब्रुवाणः शब्दनित्यत्वप्रतिज्ञां जह्यात् । शब्दो ऽपि नित्य एव स्यात् । ततः प्रतिज्ञाहान्या पराजीयते ॥ १ ॥

प्रतिज्ञार्थप्रतिषेधे परेण कृते तत्रैव धर्मिणि धर्मान्तरं साधनीयमभिदधतः प्रतिज्ञान्तरं नाम निग्रहस्थानं भवति । 'अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते तथैव सामान्येन व्यभिचारे नोदिते यदि ब्रूयाद्युक्तं यत्सामान्यमैन्द्रियकं नित्यं तद्धि सर्वगतमसर्वगतस्तु शब्द इति । सो ऽयमनित्यः शब्द इति पूर्वप्रतिज्ञातः प्रतिज्ञान्तरमसर्वगतः शब्द इति प्रतिज्ञानानः प्रतिज्ञान्तरेण निगृहीतो भवति ॥ २ ॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधो नाम निग्रहस्थानं भवति । गुणव्यतिरिक्तं द्रव्यं रूपादिभ्यो ऽर्थान्तरस्यानुपलब्धेरिति सो ऽयं प्रतिज्ञाहेत्वोर्विरोधः । यदि हि गुणव्यतिरिक्तं द्रव्यं, न तर्हि रूपादिभ्यो ऽर्थान्तरस्यानुपलब्धिः । अथ रूपादिभ्यो ऽर्थान्तरस्यानुपलब्धिः, कथं गुणव्यतिरिक्तं द्रव्यमिति । तदयं प्रतिज्ञाविरुद्धाभिधानात्पराजीयते ॥ ३ ॥

पक्षसाधने परेण दूषिते तदुद्धरणाशक्त्या प्रतिज्ञामेव निह्नुवानस्य प्रतिज्ञासंन्यासो नाम निग्रहस्थानं भवति । अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते तथैव सामान्येनानैकान्तिकतायामुद्भावितायां यदि ब्रूयात्क एवमाह अनित्यः शब्द इति प्रतिज्ञासंन्यासात्पराजितो भवति ॥ ४ ॥

अविशेषाभिहिते हेतौ प्रतिषिद्धे तद्विशेषणमभिदधतो

हेत्वन्तरं नाम निग्रहस्थानं भवति। तस्मिन्नेव प्रयोगे तथैव सामान्यस्य व्यभिचारेण दूषिते जातिमत्त्वे सतीत्यादि विशेषणमुपादद्दानो हेत्वन्तरेण निगृह्णीतो भवति ॥ ५ ॥

प्रकृतादर्थादन्यो ऽर्थो ऽर्थान्तरं तदनौपाधिकमभिदधतो ऽर्थान्तरं नाम निग्रहस्थानं भवति। अनित्यः शब्दः कृतकत्वादिति हेतुः। हेतुरिति च हिनोतेर्धातोस्तु प्रत्यये कृदन्तं पदम्। पदं च नामाख्यातोपसर्गनिपातभेदाच्चतुर्विधमिति प्रस्तुत्य नामादीनि व्याचक्षाणः प्रकृतानुपयोगिनार्थान्तरेण निगृह्यत इति ॥ ६ ॥

अभिधेयरहितवर्णानुपूर्वी प्रयोगमात्रं निरर्थकं नाम निग्रहस्थानं भवति। अनित्यः शब्दः कचटतपानां गजडदबत्वात् घझढधभवदित्येतदपि सर्वथार्थशून्यत्वान्निग्रहाय भवति साध्यानुपयोगाद्वा ॥ ७ ॥

यत्साधनवाक्यं दूषणं वा किंचित्त्रिरभिहितमपि पर्षत्प्रतिवादिभ्यां बोद्धुं न शक्यते, तत् क्लिष्टशब्दमप्रसिद्धप्रयोगमतिद्रुतोच्चारितमित्येवंप्रकारमविज्ञातार्थं नाम निग्रहस्थानं भवति। असामर्थ्यसंवरणप्रकारो ह्ययमिति निगृह्यते ॥ ८ ॥

पूर्वापरासंगतपदसमूहप्रयोगादप्रतिष्ठितवाक्यार्थमपार्थकं नाम निग्रहस्थानं भवति। यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्ड इत्यादि ॥ ९ ॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनवचनक्रममुल्लंघ्यावयवविपर्यासेन प्रयुज्यमानमनुमानवाक्यमप्राप्तकालं नाम निग्रहस्थानं

भवति, स्वप्रतिपत्तिवत्परप्रतिपत्तेर्जनने परार्थानुमानक्रमस्यापगमात् ॥ १० ॥

पञ्चावयवे वाक्ये प्रयोक्तव्ये तदन्यतमेनाप्यवयवेन हीनं प्रयुञ्जानस्य न्यूनं नाम निग्रहस्थानं भवति, प्रतिज्ञादीनां पञ्चानामपि परप्रतिपत्तिजन्मन्युगयोगादिति ॥ ११ ॥

एकेनैव हेतुनोदाहरणेन वा प्रतिपादिते ऽर्थे हेत्वन्तरमुदाहरणान्तरं वा वदतो ऽधिकं नाम निग्रहस्थानं भवति, निष्प्रयोजनाभिधानात् ॥ १२ ॥

शब्दार्थयोः पुनर्वचनं पुनरुक्तं नाम निग्रहस्थानं भवति, अन्यत्रानुवादात् । शब्दपुनरुक्तं नाम, यत्र स एव शब्दः पुनरुच्चार्यते, यथानित्यः शब्दो ऽनित्यः शब्द इति । अर्थपुनरुक्तं तु, यत्र सो ऽर्थः प्रथममन्येन शब्देनोच्चार्यते पुनश्च पर्यायान्तरेणोच्यते, यथानित्यः शब्दो विनाशी ध्वनिरिति । अनुवादे तु पौनरुक्त्यं न दोषो, यथा हेत्वपदेशेन प्रतिज्ञायाः पुनर्वचनं निगमनमिति ॥ १३ ॥

पर्षदा विदितस्य वादिना चिरभिहितस्यापि यदप्रत्युच्चारणं, तदननुभाषणं नाम प्रतिवादिनो निग्रहस्थानं भवति । अप्रत्युच्चारयन् किमाश्रयं दूषणमभिदधीत ॥ १४ ॥

पर्षदा विज्ञातस्यापि वादिवाक्यार्थस्य प्रतिवादिनो यदज्ञानं, तदज्ञानं नाम निग्रहस्थानं भवति । अविदितोत्तरविषयो हि किमुत्तरं ब्रूयात् । न चाननुभाषणमेवेदं ज्ञाते ऽपि वस्तुन्यनुभाषणासामर्थ्यदर्शनात् ॥ १५ ॥

परपक्षे गृहीते ऽप्यनुभाषिते ऽपि तस्मिन्नुत्तराप्रतिपत्तिरप्रतिभा निग्रहस्थानं भवति ॥ १६ ॥

कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपो नाम निग्रहस्थानं भवति। सिसाधयिषितस्यार्थस्याग्र्यसाधनतामवसाय कथां विच्छिनत्ति। इदं मे करणीयं परिहीयते पीनसेन कण्ठ उपरुद्ध इत्याद्यभिधाय कथां विच्छिन्दन् विक्षेपेण पराजीयते ॥ १७ ॥

स्वपक्षे परापादितदोषमनुद्धृत्य तमेव परपक्षे प्रतीपमापादयतो मतानुज्ञा नाम निग्रहस्थानं भवति। चौरो भवान्पुरुषत्वात् प्रसिद्धचौरवदित्युक्ते भवानपि चौरः पुरुषत्वादिति प्रतिब्रुवन्नात्मनः परापादितं चौरत्वदोषमभ्युपगतवान् भवतीति मतानुज्ञया निगृह्यते ॥ १८ ॥

निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणं नाम निग्रहस्थानं भवति। पर्यनुयोज्यो नाम निग्रहोपपत्त्यावश्यं नोद्नीय इदं ते निग्रहस्थानमुपनतमतो निगृहीतो ऽसीति वचनीयः। तमुपेक्ष्य न निगृह्णाति यः स पर्यनुयोज्योपेक्षणेन निगृह्यते ॥ १९ ॥

अनिग्रहस्थाने निग्रहस्थानानुयोगान्निरनुयोज्यानुयोगो नाम निग्रहस्थानं भवति। उपपन्नवादिनमप्रमादिनमनिग्रहार्हमपि निगृहीतोऽसीति यो ब्रूयात्, स एवमसद्भूतदोषोद्भावनया निगृह्यते ॥ २० ॥

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गो ऽपसिद्धान्तो नाम निग्रहस्थानं भवति। यः प्रथमं किंचित्सिद्धान्तमभ्युपगम्य

कथामुपक्रमते तच्च च सिसाधयिषितार्थसाधनाय वा परोपलम्भाय वा सिद्धान्तविरुद्धमभिधत्ते, सो ऽपसिद्धान्तेन निगृह्यते। यथा मीमांसामभ्युपगम्य कश्चिदग्निहोत्रं स्वर्गसाधनमित्याह। कथं पुनरग्निहोत्रक्रिया ध्वस्ता सती स्वर्गस्य साधिका भवतीत्यनुयुक्तः प्राह। अनया क्रियया राधितो महेश्वरः फलं ददाति राजादिवदिति। तस्य मीमांसानभिमतेश्वरस्वीकारादपसिद्धान्तो नाम निग्रहस्थानं भवति ॥ २१ ॥

हेत्वाभासाश्च यथोक्ता असिद्धविरुद्धादयो निग्रहस्थानम् ॥ २२ ॥

इति भेदान्तरानन्त्ये ऽपि निग्रहस्थानानां द्वाविंशतिर्मूलभेदा निवेदिता इति। तदेवं छलजातिनिग्रहस्थानस्वरूपभेदाभिज्ञः स्ववाक्ये तानि वर्जयन्परप्रयुक्तानि समादधद्यथाभिमतसाध्यसिद्धिं लभत इति ॥

अत्रानुक्तमपि किंचिन्निगद्यते। अर्थोपलब्धिहेतुः प्रमाणम्। एकात्मसमवायिज्ञानान्तरवेद्यं ज्ञानं प्रमाणाद्भिन्नं फलं, पूर्वं प्रमाणमुत्तरं तु फलम्। स्मृतेरप्रामाण्यम्। परस्परविभक्तौ सामान्यविशेषौ नित्यानित्यत्वे सदसदंशौ च। प्रमाणस्य विषयः पारमार्थिकः। तमस्काये अद्रव्ये। आकाशगुणः शब्दो ऽपौद्गलिकः। संकेतवशादेव शब्दादर्थप्रतीतिर्न पुनस्तत्प्रतिपादनसामर्थ्यात्। धर्मधर्मिणोर्भेदः सामान्यमनेकवृत्ति। आत्मविशेषगुणलक्षणं कर्म। वपुर्विषयेन्द्रियबुद्धिसुखदुःखानामुच्छेदादात्मसंस्थानं मुक्तिरिति ॥ न्यायसारे पुनरेवं नित्यसंवेद्यमानेन

सुखेन विशिष्टात्यन्तिकी दुःखनिवृत्तिः पुरुषस्य मोक्ष इति ॥

एषां तर्कग्रन्था न्यायसूत्र-भाष्यन्यायवार्तिक-तात्पर्यटीका-तात्पर्यपरिशुद्धि-न्यायालंकारवृत्तयः । क्रमेणाक्षपादवात्स्यायनोद्योतकरवाचस्पतिश्रीउदयनश्रीकण्ठाभयतिलकोपाध्यायविरचिताः ५ ४००० । भासर्वज्ञप्रणीते न्यायसारे ऽष्टादश टीकाः ॥ तासु मुख्या टीका न्यायभूषणाख्या न्यायकलिका जयन्तरचिता न्यायकुसुमाञ्जलितर्कश्च ॥

अथ तन्मतमुपसंहरन्नुत्तरं च मतमुपक्षिपन्नाह

नैयायिकमतस्यैष समासः कथितो ऽञ्जसा ।
सांख्याभिमतभावानामिदानीमयमुच्यते ॥ ३३ ॥

एषो ऽनन्तरोदितो नैयायिकमतस्य समासः संक्षेपः कथित उक्तो ऽञ्जसा प्राग् सांख्याभिमतभावानां सांख्याः कापिलास्तेषामभिमता अभिष्टा भावा ये पञ्चविंशतितत्त्वाद्यः पदार्थास्तेषामयं समास इदानीमुच्यते ॥

इतिश्रीतपागणनभोगणदिनमणिश्रीदेवसुन्दरसूरिपदपद्मोपजीवश्रीगुणरत्नसूरिविरचितायां तर्करहस्यदीपिकाभिधानायां षड्दर्शनसमुच्चयवृत्तौ नैयायिकमतस्वरूपप्रकटनो नाम द्वितीयो ऽधिकारः ॥

ततीयो ऽधिकारः।

अथादौ सांख्यमतप्रपन्नानां परिज्ञानाय लिङ्गादिकं निगद्यते। चिदण्डा एकदण्डा वा कौपीनवसना धातुरक्ताम्बराः शिखावन्तो जटिनः क्षुरमुण्डा मृगचर्मासना द्विजग्रहाशनाः पञ्चग्रासोपरा वा द्वादशाक्षरजापिनः परिव्राजकादयः। तङ्क्ता वन्दमाना ओं नमो नारायणायेति वदन्ति, ते तु नाराचणाय नम इति प्राहुः। तेषां च महाभारते बौटेति ख्याता दारवी मुखवस्त्रिका मुखनिःश्वासनिरोधिका भूतानां दयानिमित्तं भवति। यदाहुस्ते।

घ्राणादितो ऽनुयातेन श्वासेनैकेन जन्तवः।
हन्यन्ते शतशो ब्रह्मन्नणुमात्राचरवादिनाम् ॥ १ ॥

ते च जलजीवदयार्थं स्वयं गलनकं धारयन्ति, भक्तानां चोपदिशन्ति।

षट्चिंशदङ्गुलायामां विंशत्यङ्गुलविस्तृतम्।
दृढं गलनकं कुर्याद्भूयो जीवाम्बिशोधयेत् ॥ १ ॥
म्रियन्ते मिष्टतोयेन पूतराः क्षारसंभवाः।
क्षारतोयेन तु परे न कुर्यात्संकरं ततः ॥ २ ॥
लूताख्यतन्तुगलिते ये बिन्दौ सन्ति जन्तवः।
सूक्ष्मा भ्रमरमानास्ते नैव मान्ति त्रिविष्टपे ॥ ३ ॥

इति गलनकविचारो मीमांसायाम्। सांख्याः केचिदीश्वरदेवाः, अपरे च निरीश्वराः। ये च निरीश्वरास्तेषां नारायणो देवः। तेषामाचार्या विष्णुप्रतिष्ठाकारकाश्चैतन्यप्रभृतिशब्दैरभिधीयन्ते। तेषां मतवक्तारः कपिलासुरिपञ्चशिखभार्गवोलूकादयः। ततः सांख्याः कापिला इत्यादिनामभिरभिधीयन्ते। तथा कपिलस्य परमर्षिरिति द्वितीयं नाम, तेन तेषां पारमर्षा इत्यपि नाम ज्ञातव्यम्। वाराणस्यां तेषां प्राचुर्यम्। बहवो मासोपवासिका ब्राह्मणा अर्चिर्मार्गाविरुद्धधूममार्गानुगामिनः। सांख्यास्त्वर्चिर्मार्गानुगाः। तत एव ब्राह्मणा देवप्रिया यज्ञमार्गानुगाः। सांख्यास्तु हिंसाद्यवेदविरता अध्यात्मवादिनः। ते च स्वमतस्य महिमानमेवमामनन्ति। तदुक्तं माठरप्रान्ते।

हस पिब लल खाद मोद नित्यं
भुंक्ष्व च भोगान् यथाभिकामम्।
यदि विदितं ते कपिलमतं
तत्प्राप्स्यसि मोक्षसौख्यमचिरेण॥ १॥

शास्त्रान्तरे ऽप्युक्तं

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः।
शिखी मुण्डी जटी वापि मुच्यते नात्र संशयः॥ २॥

अथ शास्त्रकारः सांख्यमतमुपदर्शयति।

सांख्या निरीश्वराः केचित्केचिदीश्वरदेवताः।
सर्वेषामपि तेषां स्यात्तत्त्वानां पञ्चविंशतिः॥ ३४॥

केचित्सांख्या निर्गत ईश्वरो येभ्यस्ते निरीश्वराः, केवलाध्यात्मैकमानिनः । केचिदीश्वरदेवताः, ईश्वरो देवता येषां ते तथा । तेषां सर्वेषामपि निरीश्वराणां सेश्वराणां चोभयेषामपि तत्त्वानां पञ्चविंशतिः स्यात् । सांख्यमते किल दुःखत्रयाभिहतस्य पुरुषस्य तदुपघातहेतुस्तत्त्वजिज्ञासोत्पद्यते । आध्यात्मिकमाधिदैविकमाधिभौतिकं चेति दुःखत्रयम् । अत्राध्यात्मिकं द्विविधं, शारीरं मानसं च । तत्र वातपित्तश्लेष्मणां वैषम्यनिमित्तं यद्दुःखमात्मानं देहमधिकृत्य ज्वरातीसारादि समुत्पद्यते, तच्छारीरम् । मानसं च कामक्रोधलोभमोहेर्ष्याविषयादर्शननिबन्धनम् । सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम् । बाह्योपायसाध्यं दुःखं द्वेधा, आधिभौतिकमाधिदैविकं चेति । तत्राधिभौतिकं मानुषपशुपक्षिसृग्सरीसृपस्थावरनिमित्तं, आधिदैविकं यक्षराक्षसग्रहाद्यावेशहेतुकम् । अनेन दुःखत्रयेण रजःपरिणामभेदेन बुद्धिवर्तिनाभिहतस्य प्राणिनस्तत्त्वानां जिज्ञासा भवति दुःखविघाताय । तत्त्वानि च पञ्चविंशतिर्भवन्ति ॥

अथ तत्त्वपञ्चविंशतिमेव विवक्षुरादौ सत्त्वादिगुणस्वरूपमाह ।

सत्त्वं रजस्तमश्चेति ज्ञेयं तावद्गुणत्रयम् ।
प्रसादतापदैन्यादिकार्यलिङ्गं क्रमेण तत् ॥ ३५ ॥

तावच्छब्दः प्रक्रमे । तेषु पञ्चविंशतौ तत्त्वेषु सत्त्वं सुखलक्षणं, रजो दुःखलक्षणं, तमश्च मोहलक्षणमित्येवं प्रथमं तावद्गुणत्रयं ज्ञेयम् । तस्य गुणत्रयस्य कानि लिङ्गानीत्याह । "प्रसाद" इत्यादि । तत्सत्त्वादिगुणत्रयं क्रमेण प्रसादतापदैन्यादिकार्यलिङ्गम् । प्रसादः प्रसन्नता, तापः संतापः, दैन्यं दीनवचनादिहेतुर्विषण्णता । द्वन्द्वे प्रसादतापदैन्यानि, तानि आदिः प्रकारो येषां कार्याणां, तानि प्रसादतापदैन्यादीनि कार्याणि, लिङ्गं गमकं चिह्नं यस्य तत्प्रसादतापदैन्यादिकार्यलिङ्गम् । अयं भावः । प्रसादबुद्धिपाटवालाघवप्रसवानभिष्वङ्गादेषप्रीत्यादयः कार्यं सत्त्वस्य लिङ्गम् । तापप्रोषभेदचलचित्ततास्तम्भोद्वेगाः कार्यं रजसो लिङ्गम् । दैन्यमोहमरणासादनबीभत्साज्ञानागौरवादीनि कार्यं तमसो लिङ्गम् । एभिः कार्यैः सत्त्वादीनि ज्ञायन्ते । तथाहि । लोके यः कश्चित्सुखमुपलभते स आर्जवमार्दवसत्यशौचह्रीबुद्धिक्षमानुकम्पाप्रसादादिस्थानं भवति । तत्सत्त्वम् । यः कश्चिद्दुःखमुपलभते, स तदा द्वेषद्रोहमत्सरनिन्दावञ्चनबन्धनतापादिस्थानं भवति । तद्रजः । यः कश्चित्कदापि मोहं लभते, सो ऽज्ञानमदालस्यभयदैन्याकर्मण्यतानास्तिकताविषादोन्मादस्वप्नादिस्थानं भवति । तत्तम इति । सत्त्वादिभिश्च परस्परोपकारिभिस्त्रिभिरपि गुणैः सर्वं जगद्व्याप्तं विद्यते ; परमूर्ध्वलोके प्रायो देवेषु सत्त्वस्य बहुलता, अधोलोके तिर्यक्षु नारकेषु च तमोबहुलता; नरेषु रजोबहुलता, यद्दुःखप्राया मानुष्या भवन्ति । यदुक्तम् [सांख्यकारिका ५४] ।

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥ १ ॥

अत्र ब्रह्मादिस्तम्बपर्यन्त इति ब्रह्मादिपिशाचान्तो ऽष्टविधः सर्ग इति ॥

एतेषां या समावस्था सा प्रकृतिः किलोच्यते ।
प्रधानाव्यक्तशब्दाभ्यां वाच्या नित्यस्वरूपिका ॥ ३६ ॥

एतेषां सत्त्वादिगुणानां या समा तुल्यप्रमाणा अवस्था अवस्थानं, सा सत्त्वादीनां समावस्थैव प्रकृतिरुच्यते । किलेति पूर्ववार्तायाम् । सत्त्वरजस्तमसां गुणानां क्वचिद्देवादौ कस्यचिदाधिक्ये ऽपि मिथः प्रमाणापेक्षया चयाणामपि समानावस्था प्रकृतिः कीर्त्यत इत्यर्थः । प्रधानाव्यक्तशब्दाभ्यां वाच्या, सा च प्रकृतिः प्रधानमव्यक्तं चोच्यते नामान्तराभ्याम् । नित्यमप्रच्युतानुत्पन्नस्थिरैकस्वभावं कूटस्थं स्वरूपं यस्याः सा नित्यस्वरूपिका, अविचलितस्वरूपेत्यर्थः । अत एव सावयवसाधारणशब्दास्पर्शारसारूपागन्धाव्यया चोच्यते । मौलिकसांख्या ह्यात्मानमात्मानं प्रति पृथक् प्रधानं वदन्ति, उत्तरे तु सांख्याः सर्वात्मस्वर्येकं नित्यं प्रधानमिति प्रपन्नाः ॥

प्रकृत्यात्मसंयोगात्सृष्टिर्जायते । अतः सृष्टिक्रममेवाह ।

ततः संजायते बुद्धिर्महानिति यकोच्यते ।
अहंकारस्ततो ऽपि स्यात्तस्मात्षोडशको गणः ॥३७॥

ततः प्रकृतेर्बुद्धिः संजायत उत्पद्यते, सा च गवादौ पुरो दृश्यमाने गौरेवायं नाश्वः, स्थाणुरेवायं न पुरुष इति विषयनिश्चयाध्यवसायरूपा। महानिति यका प्रोच्यते महदाख्यया याभिधीयते। बुद्धेश्च तस्या अष्टौ रूपाणि। धर्मज्ञानवैराग्यैश्वर्यरूपाणि चत्वारि सात्त्विकानि, अधर्मादीनि तु तत्प्रतिपक्षभूतानि चत्वारि तामसानीति। ततोऽपि बुद्धेरप्यहंकारः स्यादुत्पद्यते। स चाहं सुभगः, अहं दर्शनीय इत्याद्यभिमानरूपः। तस्मादहङ्कारात्षोडशको गण उत्पद्यते। षोडशसंख्यामानमस्य षोडशको गणः समुदायः॥

अथ षोडशसंख्यं गणं श्लोकद्वयेनाह।

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पञ्चमम्।
पञ्च बुद्धीन्द्रियाण्यत्र तथा कर्मेन्द्रियाणि च॥ ३८॥
पायूपस्थवचःपाणिपादाख्यानि मनस्तथा।
अन्यानि पञ्च रूपादितन्मात्राणीति षोडश॥ ३९॥

युग्मम्॥ स्पर्शनं त्वक्, रसनं जिह्वा, घ्राणं नासिका, चक्षुर्लोचनं, श्रोत्रं च श्रवणं पञ्चमम्। एतानि पञ्च बुद्धीन्द्रियाण्यत्र षोडशके गणे भवन्ति। स्वं स्वं विषयं बुध्यन्त इति कृत्वेन्द्रियाण्येव बुद्धीन्द्रियाणि प्रोच्यन्ते। तथाहि। स्पर्शनं स्पर्शविषयं बुध्यते, एवं रसनं रसं, घ्राणं गन्धं, चक्षू रूपं, श्रोत्रं च शब्दमिति। तथाशब्दः पञ्चेतिपदस्यानुकर्षणार्थः। पञ्चसंख्यानि

कर्मकारणत्वात्कर्मेन्द्रियाणि च कानि तानीत्याह । "पायूपस्थ-वचःपाणिपादाख्यानि" । तत्र पायुर्गुदं, उपस्थः स्त्रीपुंश्चिह्न-द्वयं, वचस्येहोच्यतेऽनेनेति वचः, उरःकण्ठादिस्थानाश्रयतया वचनमुच्चारयति । पाणी पादौ च प्रसिद्धौ । एतैर्मलोत्सर्गसंभोग-वचनादानचलनादीनि कर्माणि सिध्यन्तीति कर्मेन्द्रियाण्युच्यन्ते । तथाशब्दः समुच्चये । एकादशं मनश्च, मनो हि बुद्धीन्द्रियमध्ये बुद्धीन्द्रियं भवति, कर्मेन्द्रियमध्ये कर्मेन्द्रियम् । तच्च तत्त्वार्थ-मन्तरेणापि संकल्पवृत्ति । तद्यथा। कश्चिद्वटुः शृणोति "ग्रामा-न्तरे भोजनमस्ति" इति, तत्र तस्य संकल्पः स्यात् "तत्र यास्यामि तत्र चाहं किं गुडदधिरूपं भोजनं लप्स्य उतस्विद्दधि किं वा किमपि न" इत्येवंरूपं मन इति । तथाहंकारादन्यान्य-पराणि रूपाणि तन्मात्राणि सूक्ष्मसंज्ञानि पञ्चोत्पद्यन्ते । तत्र रूपतन्मात्रं शुक्लकृष्णादिरूपविशेषः, रसतन्मात्रं तिक्तादिरस-विशेषः, गन्धतन्मात्रं सुरभ्यादिगन्धविशेषः, शब्दतन्मात्रं मधु-रादिशब्दविशेषः, स्पर्शतन्मात्रं मृदुकठिनादिस्पर्शविशेषः । इति षोडश । अयं षोडशको गण इत्यर्थः ॥

अथ तन्मात्रेभ्यः पञ्चभूतान्युत्पद्यन्त इत्याह ।

रूपात्तेजो रसादापो गन्धाद्भूमिः स्वरान्नभः ।
स्पर्शाद्वायुस्तथैवं च पञ्चभ्यो भूतपञ्चकम् ॥ ४० ॥

रूपतन्मात्रात्सूक्ष्मसंज्ञात्तेजोऽग्निरुत्पद्यते, रसतन्मात्रादापो जलानि जायन्ते, गन्धतन्मात्रात्पृथिवी समुत्पद्यते, स्वराच्छब्द-

तन्मात्रादाकाशमुद्भवति, तथा स्पर्शतन्मात्रादायुः प्रादुर्भवति। एवं च पञ्चभ्यस्तन्मात्रेभ्यो भूतपञ्चकं भवतीति ॥

एवं चतुर्विंशतितत्त्वरूपं निवेदितं सांख्यमते प्रधानम्।
अन्यस्त्वकर्ता विगुणश्च भोक्ता तत्त्वं पुमान्नित्यचिदभ्युपेतः॥ ४१ ॥

एवमनुक्तप्रकारेण सांख्यमते चतुर्विंशतितत्त्वरूपं प्रधानम्। प्रकृतिर्महानहंकारश्चेति चयं, पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनश्चैकं, पञ्च तन्मात्राणि, पञ्च भूतानि चेति चतुर्विंशतितत्त्वानि रूपं स्वरूपं यस्य, तच्चतुर्विंशतितत्त्वरूपं प्रधानं प्रकृतिर्निवेदितम्। तथा चोक्तम् [सांख्यकारिका ३]।

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥ इति ॥

अत्र प्रकृतिर्न विकारः, अनुत्पन्नत्वात्। बुद्ध्यादयश्च सप्त परेषां कारणतया प्रकृतयः, कार्यतया च विकृतय उच्यन्ते। षोडशकश्च गणो विकृतिरेव कार्यत्वात्। पुरुषस्तु न प्रकृतिर्न विकृतिः, अनुत्पादकत्वादनुत्पन्नत्वाच्च। तथा चेश्वरकृष्णः सांख्यसप्ततौ[३]।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ १ ॥ इति ॥

तथा महदादयः प्रकृतेर्विकारास्ते च व्यक्ताः सन्तः पुनरव्यक्ता अपि भवन्तीति स्वरूपाद्ध्रुवन्त्यनित्यत्वात्। प्रकृति-

स्वविज्ञता नित्याभ्युपगम्यते। ततो न कदाचिदपि सा स्वरूपाद्व्येष्यति। तथा च महदादिकस्य प्रकृतेश्च स्वरूपं सांख्यैरित्थमूचे [सांख्यकारिका २०]।

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं, विपरीतमव्यक्तम् ॥ २ ॥ इति ॥

तच्च हेतुमत्कारणवन्महदादिकं, अनित्यमित्युत्पत्तिधर्मकत्वाद्बुद्ध्यादेः, अव्यापीति प्रतिनियतं न सर्वगं, सक्रियमिति सह क्रियाभिरध्यवसायादिभिर्वर्तत इति सक्रियं, सव्यापारं संचरणक्रियावदिति यावत्, अनेकमिति त्रयोविंशतिभेदात्मकं, आश्रितमित्यात्मोपकारकत्वेन प्रधानमवलम्ब्य स्थितं, लिङ्गमिति यद्यस्मादुत्पन्नं तत्तस्मिन्नेव लयं क्षयं गच्छतीति लिङ्गम्। तच्च भूतानि तन्मात्रेषु लीयन्ते, तन्मात्राणीन्द्रियाणि मनश्चाहंकारे, स च बुद्धौ, सा चाव्यक्ते, तच्चानुत्पाद्यत्वान्न क्वचित्प्रलीयते। सावयवमिति शब्दस्पर्शरूपरसगन्धात्मकैरवयवैर्युक्तत्वात्, परतन्त्रमिति कारणायत्तत्वादित्येवंरूपं व्यक्तं महदादिकम्। अव्यक्तं तु प्रकृत्याख्यम्। एतद्विपरीतमिति। तच्च विपरीतता सुयोज्यैव। नवरं प्रधानं त्रिविभुव्यन्तरित्वे च सर्वत्र व्यापितया वर्तत इति व्यापित्वं तस्य, तथाव्यक्तस्य व्यापकत्वेन संचरणरूपायाः क्रियाया अभावान्निष्क्रियत्वं च द्रष्टव्यमिति दिङ्मात्रमिदं दर्शितम्। विशेषव्याख्यानं तु सांख्यसप्तत्यादेस्तच्छास्त्रादवसेयमिति ॥ अथ पञ्चविंशतितमं पुरुषतत्त्वमाह "अन्यस्त्वकर्ता" इत्यादि। प्रकृतेस्तु तत्त्वविंशतितत्त्व-

रूपाया अन्यस्तु पृथग्भूतः, पुनरकर्ता विगुणो भोक्ता नित्यचिदभ्युपेतश्च पुमान्पुरुषस्तत्त्वम् । तच्चात्मा विषयसुखादिकं तत्कारणं पुण्यादिकर्म च न करोतीत्यकर्ता, आत्मनस्तृणमात्रकुब्जीकरणेऽप्यसमर्थत्वात् । कर्त्री तु प्रकृतिरेव, तस्याः प्रवृत्तिस्वभावत्वात् । तथा विगुणः सत्त्वादिगुणरहितः, सत्त्वादीनां प्रकृतिधर्मत्वादात्मनश्च तदभावात् । तथा भोक्ता अनुभविता । भोक्तापि साक्षान्न भोक्ता, किं तु प्रकृतिविकारभूतायां शुभाशुभसुखदर्पणाकारायां बुद्धौ संक्रान्तानां सुखदुःखादीनां पुरुषः स्वात्मनि निर्मले प्रतिबिम्बोदयमात्रेण भोक्ता व्यपदिश्यते, बुद्ध्यध्यवसितमर्थं पुरुषस्येतयत इति वचनात् । यथा जपाकुसुमादिसन्निधानवशात्स्फटिके रक्तताद्यि व्यपदिश्यते, तथा प्रकृत्युपधानवत्त्वात्सुखदुःखाद्यात्मकानामर्थानां पुरुषस्य भोजकत्वं युक्तमेव व्यपदिश्यते । वादमहार्णवो ऽप्याह । बुद्धिदर्पणसंक्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यध्यारोहति; तदेव भोक्तृत्वमस्य, न त्वात्मनो विकारापत्तिरिति ॥

तथा चासुरिः ।

विविक्तेदृक्परिणतौ बुद्धौ भोगोऽस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि ॥ १ ॥

वन्ध्यवासी त्वेवं भोगमाचष्टे ।

पुरुषोऽविक्रियात्मैव स्वनिर्भासमचेतनम् ।
मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥२॥ इति ॥

तथा नित्या या चिच्चेतना तयाभ्युपेतः। एतेन पुरुषस्य चैतन्यमेव स्वरूपं, न तु ज्ञानं, ज्ञानस्य बुद्धिधर्मत्वादित्यावेदितं द्रष्टव्यम्। केवलमात्मा स्वं बुद्धेरव्यतिरिक्तमभिमन्यते। सुखदुःखादयश्च विषया इन्द्रियद्वारेण बुद्धौ संक्रामन्ति, बुद्धिश्चोभयमुखदर्पणाकारा, ततस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते, ततः सुख्यहं दुःख्यहं ज्ञाताहमित्युपचर्यते। आह च पतञ्जलिः। "शुद्धो ऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति, तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासते" इति। बुद्धिश्चाचेतनापि चिच्छक्तिसन्निधानाच्चेतनावतीवावभासते" इति। पुमानित्यत्र जात्यपेक्षयैकवचनम्। तेनात्मानेकोऽभ्युपगन्तव्यः, जन्ममरणकरणानां नियमदर्शनाद्भर्मादिप्रवृत्तिनानात्वाच्च। ते च सर्वेऽप्यात्मानः सर्वगता नित्याश्चावसेयाः। उक्तं च।

अमूर्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः।
अकर्ता निर्गुणः सूक्ष्म आत्मा कापिलदर्शने ॥ इति ॥

॥ तत्त्वान्युपसंहरन्नाह।

पञ्चविंशतितत्त्वानि संख्ययैवं भवन्ति च।
प्रधाननरयोश्चाच वृत्तिः पंग्वन्धयोरिव ॥ ४२ ॥

चकारो भिन्नक्रमः, एवं च संख्यया पञ्चविंशतितत्त्वानि भवन्ति। ननु प्रकृतिपुरुषावुभावपि सर्वगतौ मिथःसंयुक्तौ कथं वर्तेते इत्याशंक्याह। प्रधानेत्यादि। प्रधानपुरुषयोश्चाच विश्वे पंग्वन्धयोरिव वृत्तिर्वर्तनम्। यथा कश्चिदन्धः सार्धेन समं

पाटलिपुत्रनगरं प्रस्थितः, स सार्थभ्रष्टैरभिहतः। अन्धस्त्वेव रहित इतश्चेतश्च धावन् वनान्तरस्थेन पङ्गुना दृष्टोऽभिहितश्च "भो भो अन्ध मा भैषीः, अहं पङ्गुर्गमनादिक्रियाविकलत्वेनाक्रियश्चक्षुर्भ्यां सर्वं पश्यन्नास्मि, त्वं तु गमनादिक्रियावान्न पश्यसि"। अन्धेनोक्तं। "रुचिरमिदम्। अहं भवन्तं स्कन्धे करिष्यामि। एवमावयोर्वर्तनमस्तु" इति। ततोऽन्धेन पङ्गुर्दृष्टत्वगुणेन खं स्कन्धमधिरोपितो नगरं प्राप्य नाटकादिकं पश्यन् गीतादिकं चेन्द्रियविषयमन्यमप्युपलभमानो यथा मोदते, तथा पङ्गुकल्पः शुद्धचैतन्यस्वरूपः पुरुषोऽप्यन्धकल्पां जडां प्रकृतिं सक्रियामाश्रितो बुद्ध्यध्यवसितं शब्दादिकं स्वात्मनि प्रतिबिम्बितं चेतयमानो मोदते, मोदमानश्च प्रकृतिं सुखस्वभावां मोहान्मन्यमानः संसारमधिवसति॥

तर्हि तस्य कथं मुक्तिः स्यादित्याह।

प्रकृतिवियोगो मोक्षः पुरुषस्य तदैतदन्तरज्ञानात्।
मानचितयं चाच प्रत्यक्षं लैङ्गिकं शाब्दम्॥ ४३॥

तदेति पृच्छकानामामन्त्रणे। एतयोः प्रकृतिपुरुषयोर्यदन्तरं विवेकलक्षणं ज्ञानात्पुरुषस्य यः प्रकृतेर्वियोगो भवति, स मोक्षः। तथाहि।

शुद्धचैतन्यरूपोऽयं पुरुषः परमार्थतः।
प्रकृत्यन्तरमज्ञात्वा मोहात्संसारमाश्रितः॥ १॥

ततः प्रकृतेः सुखदुःखमोहस्वभावाया यावत्र विवेकेन ग्रहणं,

तावच्च मोक्षः, प्रकृतेर्विवेकदर्शने तु प्रवृत्तेरुपरतायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानं मोक्ष इति। मोक्षश्च बन्धविच्छेदाद्भवति। बन्धश्च प्राकृतिकवैकारिकदाक्षिणभेदात्त्रिविधः। तथाहि। प्रकृतावात्मज्ञानाद्ये प्रकृतिमुपासते, तेषां प्राकृतिको बन्धः। ये विकारानेव भूतेन्द्रियाहंकारबुद्धीः पुरुषबुद्ध्योपासते, तेषां वैकारिकः। दृष्टापूर्तं दाक्षिणः। पुरुषतत्त्वानभिज्ञो ह्येष्टापूर्तकारी कामोपहतमना बध्यत इति।

दृष्टापूर्तं मन्यमाना वरिष्ठं
नान्यच्छ्रेयो येऽभिनन्दन्ति मूढाः।
नाकस्य पृष्ठे ते सुकृतेन भूत्वा
इमं लोकं हीनतरं वा विशन्ति॥ इति॥

बन्धाच्च प्रेत्यसंसरणरूपः संसारः प्रवर्तते। सांख्यमते च पुरुषस्य प्रकृतिविकृत्यनात्मकस्य न बन्धमोक्षसंसाराः, किं तु प्रकृतेरेव। तथा च कापिलाः।

तस्माच्च बध्यते नैव मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥ इति।

नवरममी बन्धमोक्षसंसाराः पुरुष उपचर्यन्ते। यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते तत्फलस्य कोशलाभादेः स्वामिनि संबन्धात्, तथा भोगापवर्गयोः प्रकृतिगतयोरपि विवेकाग्रहात्पुरुषे संबन्ध इति॥

अथ प्रमाणस्य सामान्यलक्षणमुच्यते। अर्थापलब्धिहेतुः प्रमाणमिति॥ अथोत्तरार्धं मानचिंतयं च प्रमाणचिंतयं च,

अत्र सांख्यमते । किं तदित्याह । प्रत्यक्षं प्रतीतं, लिङ्गमनुमानं, शाब्दं चागमः । चकारोऽत्रापि संबन्धनीयः । तत्र प्रत्यक्षलक्षणमाख्यायते । श्रोत्रादिवृत्तिरविकल्पिका प्रत्यक्षमिति ।

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चेति पञ्चमी । इति । श्रोत्रादीनीन्द्रियाणि, तेषां वृत्तिर्वर्तनं परिणाम इति यावत्, इन्द्रियाण्येव विषयाकारपरिणतानि प्रत्यक्षमिति हि तेषां सिद्धान्तः । अविकल्पिका नामजात्यादिकल्पनारहिता शाक्यमताध्यक्षवद्व्याख्येयेति । ईश्वरकृष्णस्तु "प्रतिनियताध्यवसायः श्रोत्रादिसमुत्थोऽध्यक्षम्" इति प्राह ॥ अनुमानस्य त्विदं लक्षणम् । पूर्ववच्छेषवत्सामान्यतोदृष्टं चेति त्रिविधमनुमानमिति । तत्र नद्युन्नतिदर्शनादुपरिवृष्टो देव इत्यनुमीयते यत्तत्पूर्ववत् । तथा समुद्रोदकबिन्दुप्राश्यनाच्छेषं जलं क्षारमनुमानेन ज्ञायते । तथा स्थाल्यां सिक्थैकचर्वणाच्छेषमन्नं पक्वमपक्वं वा ज्ञायते तच्छेषवत् । यत्सामान्यतोदृष्टं तल्लिङ्गलिङ्गिपूर्वकम् । यथा चिदण्डदर्शनाद्दृष्टोऽपि लिङ्गी परिव्राजकोऽस्तीत्यवगम्यते । इति त्रिविधम् । अथवा तल्लिङ्गलिङ्गिपूर्वकमित्येवानुमानलक्षणं सांख्यैः समाख्यायते ॥ शाब्दं त्वाप्तश्रुतिवचनम् । आप्ता रागद्वेषादिरहिता ब्रह्मसनत्कुमारादयः । श्रुतिर्वेदः । तेषां वचनं शाब्दम् ॥

अत्रानुक्तमपि किंचिदुच्यते । सिद्धर्षिर्विषयपरिच्छेदशून्या नार्थं जानाति । बुद्धिश्च जडा न चेतयते । सन्निधानात्तयोरन्यथाप्रतिभासनम् । प्रकृत्यात्मसंयोगात्सृष्टिरुपजायते । प्रकृतिविकारस्वरूपं कर्म । तथा त्रैगुण्यरूपं सामान्यम् । प्रमाण-

विषयस्तात्त्विक इति। अत्र त्रयो गुणाः सत्त्वरजस्तमांसि। ततः स्वार्थे ष्ठोऽनन्तादेरिति ष्ठः, यथा त्रयो लोकास्त्रैलोक्यं षड्गुणाः षाड्गुण्यम्। ततस्त्रैगुण्यं रूपं स्वभावो यस्य सामान्यस्य, तत् त्रैगुण्यरूपमिति। प्रमाणस्य च फलमित्यम्। पूर्वं पूर्वं प्रमाणमुत्तरं तु फलमिति॥ तथा कारणे कार्यं सदेवोत्पद्यते ऽसदकरणादिभ्यो हेतुभ्यः। तदुक्तम् (सांख्यकारिका ९)।

असदकरणादुपादानग्रहणात्सर्वसंभवाभावात्।

शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥ इति॥

अत्र सर्वसंभवाभावादिति। यद्यसत्कार्यं स्यात्तदा सर्वं सर्वत्र भवेत्। ततश्च तृणादिभ्योऽपि सुवर्णादीनि भवेयुः। न च भवन्ति। तस्मात्कारणे कार्यं सदेव। तथा द्रव्याण्येव केवलानि सन्ति, न पुनरुत्पत्तिविपत्तिधर्माणः पर्यायाः केऽपि, आविर्भाव-तिरोभावमात्रत्वात्तेषामिति॥

सांख्यानां तर्कग्रन्थाः षष्टितन्त्रोद्धाररूपं, माठरभाष्यं, सांख्य-सप्ततिनामकं, तत्त्वकौमुदी गौडपादं, आत्रेयतन्त्रं चेत्यादयः॥

सांख्यमतमुपसंजिहीर्षुस्तुत्तरत्र जैनमतमभिधित्सन्नाह

एवं सांख्यमतस्यापि समासो गदितोऽधुना।
जैनदर्शनसंक्षेपः कथ्यते सुविचारवान्॥ ४४॥

एवमुक्तविधिना सांख्यमतस्यापि न केवलं बौद्धनैयायिक-योरित्यपिशब्दार्थः। समासः संक्षेपोऽधुना गदितः। जैन-दर्शनसंक्षेपः कथ्यते। कथंभूतः। सुविचारवान्। सुष्ठु सर्व-

प्रमाणैरबाधितस्वरूपत्वेन शोभना विचाराः सुविचारास्ते विद्यन्ते यस्य स सुविचारवान्, न पुनरविचारितरमणीयविचारवानिति। अनेनापरदर्शनान्यविचारितरमणीयानीत्यावेदितं मन्तव्यम्। यदुक्तं परैरेव।

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥१॥

परैर्हि दोषसंभावनयैव स्वमतविचारणा नाद्रियते। यत उक्तम्।

अस्ति वक्तव्यता कापि तेनेदं न विचार्यते।
निर्दोषं कार्त्स्न्येन चेत्स्यात्परीक्षाया बिभेति किम्॥१॥ इति।

अत एव जैना जिनमतस्य निर्दूषणतया परीक्षातो निर्भीका एवमुपदिशन्ति। सर्वथा स्वदर्शनपक्षपातं परित्यज्य माध्यस्थ्येनैव युक्तिगतैः सर्वदर्शनानि पुनः पुनर्विचारणीयानि, तेषु च यदेव दर्शनं युक्तियुक्ततयावभासते यच्च पूर्वापरविरोधगन्धोऽपि नेक्ष्यते, तदेव विचारदैरादरणीयं नापरमिति। तथा चोक्तम्।

पक्षपातो न मे वीरे न द्वेषः कपिलादिषु।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः॥१॥

इति श्रीतपागणनभोंगणदिनमणिश्रीदेवसुन्दरसूरिक्रमकमलोपजीविश्रीगुणरत्नसूरिविरचितायां तर्करहस्यदीपिकायां षड्दर्शनसमुच्चयवृत्तौ सांख्यमतरहस्यप्रकाशनो नाम तृतीयः प्रकाशः॥

चतुर्थोऽधिकारः।

अथादौ जैनमते लिङ्गवेषाचारादि प्रोच्यते। जैना द्विविधाः श्वेताम्बरा दिगम्बराश्च। तत्र श्वेताम्बराणां रजोहरण-मुखवस्त्रिकालोचादिर्लिङ्गं, चोलपट्टकल्पादिको वेषः। पञ्च समितयस्तिस्रश्च गुप्तयस्तेषामाचारः।

ईर्याभाषैषणादाननिक्षेपोत्सर्गसंज्ञिकाः। 5
पञ्चाऽऽहुः समितीस्तिस्रो गुप्तीस्तियोगनिग्रहात् ॥१॥

इति वचनात्। अहिंसासत्यास्तेयब्रह्माकिंचन्यवान् क्रोधादिविजयी दान्तेन्द्रियो निर्ग्रन्थो गुरुः। माधुकर्या वृत्त्या नवकोटीविशुद्धस्तेषां नित्यमाहारः। संयमनिर्वाहार्थमेव वस्त्रपात्रादिधारणम्। वन्द्यमाना धर्मलाभमाशंसते। 10

दिगम्बराः पुनर्नाग्न्यलिङ्गाः पाणिपात्राश्च। ते चतुर्धा काष्ठासङ्घ-मूलसङ्घ-माथुरसङ्घ-गोप्यसङ्घ-भेदात्। काष्ठासङ्घे चमरीवालैः पिच्छिका, मूलसङ्घे मायूरपिच्छैः पिच्छिका, माथुरसङ्घे मूलतोऽपि पिच्छिका नादृता, गोप्या मयूरपिच्छिका। आद्यास्त्रयोऽपि सङ्घा वन्द्यमाना धर्मवृद्धिं भणन्ति, स्त्रीणां 15 मुक्तिं केवलिनां भुक्तिं सद्व्रतस्यापि सचीवरस्य मुक्तिं च न मन्यते, गोप्यास्तु वन्द्यमाना धर्मलाभं भणन्ति, स्त्रीणां मुक्तिं केवलिनां भुक्तिं च मन्यन्ते। गोप्या यापनीया इत्युच्यन्ते॥

सर्वेषां च भिक्षाटने भोजने च द्वात्रिंशदन्तराया मलाश्च चतुर्दश वर्जनीयाः । शेषमाचारे गुरौ च देवे च सर्वं श्वेताम्बरैस्तुल्यम् । नास्ति तेषां मिथः शास्त्रेषु तर्केषु परो भेदः ।

अथ देवस्य लक्षणमाह ।

जिनेन्द्रो देवता तत्र रागद्वेषविवर्जितः ।
हतमोहमहामल्लः केवलज्ञानदर्शनः ॥ ४५ ॥
सुरासुरेन्द्रसंपूज्यः सद्भूतार्थप्रकाशकः ।
क्षत्क्षकर्मक्षयं कृत्वा संप्राप्तः परमं पदम् ॥ ४६ ॥

तत्र जैनमते । जयन्ति रागादीनिति जिनाः सामान्यकेवलिनः । तेषामिन्द्रस्तादृग्भासदृग्चतुस्त्रिंशदतिशयसनाथपरमैश्वर्यसमन्वितः स्वामी जिनेन्द्रो देवता देवः क्षत्क्षकर्मक्षयं कृत्वा परमं पदं संप्राप्त इति संबन्धः । कीदृग्भः स इत्याह । रागद्वेषविवर्जितः । मायालोभौ रागः, क्रोधमानौ द्वेषः । रागद्वेषाभ्यां विशेषेण पुनः पुनरभावेन वर्जितो रहितो रागद्वेषविवर्जितो वीतराग इत्यर्थः । रागद्वेषौ हि दुर्जयौ दुरन्तभवसंपातहेतुतया च मुक्तिप्रतिरोधकौ समये प्रसिद्धौ । यदाह ।

को दुक्खं पाविज्जा कस्स
य सुक्खेहि विम्हओ हुज्जा ।
को य न लभिज्ज मुक्खं
रागद्दोसा जइ न हुज्जा ॥१॥ इति ॥

ततस्तयोर्विच्छेद उक्तः। तथा हतमोहमहामल्लः। मोहनीयकर्मोदयाद्धिंसाद्यात्मकशास्त्रेभ्योऽपि मुक्तिकांक्षणाद्व्यामोहो मोहः। स एव सकलजगद्दुर्जयत्वेन महामल्ल इव महामल्लः। हतो मोहमहामल्लो येन स तथा। एतेन विशेषणद्वयेन देवस्यापायापगमातिशयो व्यञ्जितो द्रष्टव्यः, तथा रागद्वेषमहामोहरहितोऽर्हन्नेव देव इति ज्ञापितं च। यदुक्तम्।

रागोऽङ्गनासंगमतोऽनुमेयो
द्वेषः द्विषद्दारणहेतिगम्यः।
मोहः कुवृत्तागमदोषसाध्यो
नो यस्य देवः स स चैवमर्हन् ॥१॥ इति ॥

तथा केवले अन्यज्ञानानपेक्षत्वेनासहाये संपूर्णे वा ज्ञानदर्शने यस्य स तथा। केवलज्ञानकेवलदर्शनात्मको हि भगवान्। करतलकलितामलकफलवद्द्रव्यपर्यायात्मकं निखिलमनवरतं जगत्स्वरूपं जानाति पश्यति चेति केवलज्ञानदर्शने यस्य स तथा। केवलज्ञानदर्शन इति पदं साभिप्रायम्। छद्मस्थस्य हि प्रथमं दर्शनमुत्पद्यते ततो ज्ञानं, केवलिनस्त्वादौ ज्ञानं ततो दर्शनमिति। तत्र सामान्यविशेषात्मके सर्वस्मिन्प्रमेये वस्तुनि सामान्यस्योपसर्जनीभावेन विशेषाणां च प्रधानभावेन यद्ग्राहकं तज्ज्ञानम्। विशेषाणामुपसर्जनीभावेन सामान्यस्य च प्राधान्येन यद्ग्राहकं तद्दर्शनम्। एतेन विशेषणेन ज्ञानातिशयः साक्षादुक्तोऽवगन्तव्यः॥ तथा सुराः सर्वे देवाः, असुराश्च दैत्याः। सुरशब्देनासुराणां संग्रहणेऽपि पृथगुपादानं लोकरूढ्या ज्ञातव्यम्।

लोको हि देवेभ्यो दानवांस्तद्विपक्षत्वेन पृथग्निर्दिशतीति। तेषामिन्द्राः स्वामिनस्तेषां तैर्वा संपूज्योऽभ्यर्चनीयः। तादृग्भिरपि पूज्यस्य मानवतिर्यक्खचरकिन्नरादिनिकरसेव्यत्वमानुषङ्गिकमिति। अनेन पूजातिशय उक्तः॥ तथा सद्भूता यथावस्थिता येऽर्था जीवादयः पदार्थास्तेषां प्रकाशक उपदेशकः। अनेन वचनातिशय उक्तः॥ तथा कृत्स्नानि संपूर्णानि घात्यघातीनि कर्माणि ज्ञानावरणादीनि, तेषां क्षयः सर्वथा प्रलयः। तं कृत्वा परमं पदं सिद्धिं संप्राप्तः। एतेन कृत्स्नकर्मक्षयलक्षणा सिद्धावस्थाभिहिता। अपरे सुगतादयो मोक्षमवाप्यापि तीर्थनिकारादिसंभवे भूयो भवमवतरन्ति। यदाऽऽहुरन्ये।

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम्।
गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारतः॥ इति।

न ते परमार्थतो मोक्षगतिभाजः, कर्मक्षयाभावात्। न हि तत्त्वतः कर्मक्षये पुनर्भवावतारः। यदुक्तम्।

दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः॥

उक्तं च श्रीसिद्धसेनदिवाकरपादैरपि भवाभिनामुकानां प्रबलमोहविजृम्भितम्।

दग्धेन्धनः पुनरुपैति भवं प्रमथ्य
निर्वाणमप्यनवधारितभीरनिष्टम्।
मुक्तः स्वयं कृततनुश्च परार्थशूर-
स्वच्छासनप्रतिहतेष्विह मोहराज्यम्॥

इत्यलं विस्तरेण । तदेवमेभिश्चतुर्भिरतिशयैः स नाथो मुक्तस्य यो देवो भवति, स एव देवत्वेन श्रयणीयः, स एव च परां सिद्धिं प्रापयति, न पुनरितरः सरागो भवेऽवतारवांश्च देव इत्यावेदितं मन्तव्यम् ॥

ननु मा भूत्सुगतादिको देवः, जगत्स्रष्टा त्वीश्वरः किमिति नाङ्गीक्रियते । तत्साधकप्रमाणाभावादिति ब्रूमः । अथास्त्येव तत्साधकं प्रमाणम् । चित्यादिकं बुद्धिमत्कर्तृकं, कार्यत्वात्, घटादिवत् । न चायमसिद्धो हेतुः, चित्यादेः सावयवत्वेन कार्यत्वप्रसिद्धेः । तथाहि । उर्वीपर्वततर्वादिकं सर्वं कार्यं, सावयवत्वात्, घटवत् । नापि विरुद्धः, निश्चितकर्तृके घटादौ कार्यत्वदर्शनात् । नाप्यनैकान्तिकः, निश्चितार्कर्तृकेभ्यो व्योमादिभ्यो व्यावर्तमानत्वात् । नापि कालात्ययापदिष्टः, प्रत्यक्षागमाबाधितविषयत्वात् । न च वाच्यं "घटकर्त्रादिदृष्टान्तदृष्टासर्वज्ञत्वासर्वगतत्वकर्तृत्वादिधर्मानुरोधेन सर्वज्ञादिविशेषणविशिष्टसाध्यविपर्ययसाधनाद्विरुद्धो हेतुर्दृष्टान्तस्य साध्यविकलो घटादौ तथाभूतबुद्धिमतोऽभावात्" इति, यतः साध्यसाधनयोर्विशेषेण व्याप्तौ गृह्यमाणायां सकलानुमानोच्छेदप्रसक्तिः, किं तु सामान्येनान्वयव्यतिरेकाभ्यां हि व्याप्तिरवधार्यते । तौ चानन्त्याद्व्यभिचाराच्च विशेषेषु गृहीतुं न शक्यौ । तेन बुद्धिमत्पूर्वकत्वमात्रेण कार्यत्वस्य व्याप्तिः प्रत्येतव्या, न शरीरित्वादिना । न खलु कर्तृत्वसामर्थ्यां शरीरमुपयुज्यते, तद्व्यतिरेकेणापि ज्ञानेच्छाप्रयत्नाश्रयेण च शरीरकरणे कर्तृत्वोपलम्भात् । अकिंचित्करस्यापि

सहचरत्वमात्रेण कारणत्वे वह्निपेङ्गल्यस्यापि धूमं प्रति कारणत्व-प्रसङ्गः स्यात्। विद्यमानेऽपि हि शरीरे ज्ञानादीनां समस्तानां व्यस्तानां वाभावे कुलालादावपि कर्तृत्वं नोपलभ्यते। प्रथमं हि कार्योत्पादककारणकलापज्ञानं, ततः करणेच्छा, ततः प्रयत्नः, ततः फलनिष्पत्तिरित्यमीषां चयाणां समुदितानामेव कार्य-कर्तृत्वे सर्वत्राव्यभिचारः। सर्वज्ञता चास्याखिलकार्यकर्तृत्वात्सिद्धा। प्रयोगोऽत्र। ईश्वरः सर्वज्ञोऽखिलचित्यादिकार्यकर्तृत्वात्। यो हि यस्य कर्ता स तदुपादानाद्यभिज्ञः, यथा घटोत्पादकः कुलालो मृत्पिण्डाद्यभिज्ञः। जगतः कर्ता चायम्। तस्मात्सर्वज्ञ इति। उपादानं हि जगतः पार्थिवाप्यतैजसवायवीयलक्षणा-श्चतुर्विधाः परमाणवः, निमित्तकारणमदृष्टादि, भोक्तात्मा, भोग्यं तन्वादि। न चैतदनभिज्ञस्य चित्यादौ कर्तृत्वं संभव-त्यस्मदादिवत्। ते च तदीयज्ञानादयो नित्याः, कुलालादि-ज्ञानादिभ्यो विलक्षणत्वात्। एकत्वं च चित्यादिकर्तुरनेक-कर्तृणामेकाधिष्ठतृनियमितानां प्रवृत्त्युपपत्तेः सिद्धम्। प्रसिद्धा हि स्थपत्यादीनामेकसूत्रधारपरतन्त्राणां महाप्रासादादिकार्य-करणे प्रवृत्तिः। न च "ईश्वरस्यैकरूपत्वे नित्यत्वे च कार्याणां कादाचित्कत्वं वैचित्र्यं च विरुध्यते" इति वाच्यं, कादाचित्क-विचित्रसहकारिलाभेन कार्याणां कादाचित्कत्ववैचित्र्यसिद्धौ विरोधासंभवात्। ननु चित्यादेर्बुद्धिमद्धेतुकत्वेऽक्रियादर्शिनोऽपि जीर्णकूपादिष्विव कृतबुद्धिरुत्पद्यते, न चात्र सा उत्पद्यमाना दृष्टा; अतो दृष्टान्तदृष्टस्य हेतोर्धर्मिण्यभावादसिद्धत्वम्।

तदप्ययुक्तं, यतः प्रामाणिकमितरं वापेक्ष्येदमुच्यते । यदीतरं, तर्हि धूमादावप्यसिद्धत्वानुषङ्गः । प्रामाणिकस्य तु नासिद्धत्वं, कार्यत्वस्य बुद्धिमत्कर्तृपूर्वकत्वेन प्रतिपन्नाविनाभावस्य चित्यादौ प्रसिद्धेः, पर्वतादौ धूमादिवत् । न च यावन्तः पदार्थाः कृतकाः, तावन्तः कृतबुद्धिमात्मन्याविर्भावयन्तीति नियमोऽस्ति, खातप्रतिपूरितायां भुव्यक्रियादर्शिनः कृतबुद्ध्युत्पादाभावात् । किं च बुद्धिमत्कारणाभावो ऽत्रानुपलब्धितो भवता प्रसाध्यते । एतच्चायुक्तं, दृश्यानुपलब्धेरेवाभावसाधकत्वोपपत्तेः । न चेयमत्र संभवति, जगत्कर्तुरदृश्यत्वात् । अनुपलब्धस्य चाभावसाध्यत्वे पिशाचादेरपि तत्प्रसक्तिः स्यादिति ॥

अत्र प्रतिविधीयते । तत्र यत्तावत् चित्यादेर्बुद्धिमद्धेतुकत्वसिद्धये कार्यत्वसाधनमुक्तं, तत् किं सावयवत्वं १ प्रागसतः स्वकारणसत्तासमवायः २ कृतमिति-प्रत्ययविषयत्वं ३ विकारित्वं ४ वा स्यात् ॥ यदि सावयवत्वं, तदेदमपि किमवयवेषु वर्तमानत्वं १ अवयवैरारभ्यमाणत्वं २ प्रदेशवत्त्वं ३ सावयवमिति-बुद्धिविषयत्वं ४ वा । तत्राद्यपक्षेऽवयवसामान्येनानैकान्तिको ऽयं हेतुः, तद्ध्यवयवेषु वर्तमानमपि निरवयवमकार्यं च प्रोच्यते । द्वितीयपक्षे तु साध्यसमो हेतुः । यथैव हि चित्यादेः कार्यत्वं साध्यं, एवं परमाण्वाद्यवयवारभ्यत्वमपि । तृतीयोऽप्याकाशेनानैकान्तिकः, तस्य प्रदेशवत्त्वेऽप्यकार्यत्वात् । प्रसाधयिष्यते चाग्रतोऽस्य प्रदेशवत्त्वम् । चतुर्थकक्षायामपि तेनैवानैकान्तो न चास्य निरवयवत्वं, व्यापित्वविरोधात्परमाणुवत् ॥१॥ नापि प्रागसतः स्वकारणसत्ता-

समवायः कार्यत्वं, तस्य नित्यत्वेन तल्लक्षणायोगात् । तल्लक्षणत्वे वा कार्यस्यापि चित्यादेस्तद्वन्नित्यत्वानुषङ्गात्, कस्य बुद्धिमद्धेतुकत्वं साध्यते । किं च योगिनामग्रेषकर्मक्षये पश्चान्नःपातित्यप्रवृत्तत्वेन भागासिद्धोऽयं हेतुः, तत्प्रक्षयस्य प्रध्वंसाभावरूपत्वेन सत्ताखकारणसमवाययोरभावात् ॥२॥ कृतमिति-प्रत्ययविषयत्वमपि न कार्यत्वं, खननोल्लेखनादिना कृतमाकाशमित्यकार्येऽप्याकाशे वर्तमानत्वेनानैकान्तिकत्वात् ॥३॥ विकारित्वस्यापि कार्यत्वे महेश्वरस्यापि कार्यत्वानुषङ्गः, सतो वस्तुनोऽन्यथाभावो हि विकारित्वम् । तच्चेश्वरस्याप्यस्तीत्यस्यापरबुद्धिमद्धेतुकत्वप्रसङ्गादनवस्था स्यात्, अविकारित्वे चास्य कार्यकारित्वमतिदुर्घटमिति ॥४॥

कार्यखरूपस्य विचार्यमाणस्यानुपपद्यमानत्वादसिद्धः कार्यत्वादित्ययं हेतुः । किं च । कादाचित्कं वस्तु लोके कार्यत्वेन प्रसिद्धम् । जगतस्तु महेश्वरवत्सदासत्त्वात्कथं कार्यत्वम् । तदन्तर्गततृणादीनां कार्यत्वात्तस्यापि कार्यत्वे महेश्वरान्तर्गतानां बुद्ध्यादीनां परमाण्वाद्यन्तर्गतानां पाकजरूपादीनां च कार्यत्वात्, महेश्वरादेरपि कर्यत्वानुषङ्गः । तथा चास्याप्यपरबुद्धिमद्धेतुककल्पनायामनवस्थापसिद्धान्तश्चानुषज्येते । अस्तु वा यथा कथंचिज्जगतः कार्यत्वं, तथापि कार्यमात्रमिह हेतुत्वेन विवक्षितं तद्विशेषो वा । यद्याद्यः, तर्हि न ततो बुद्धिमत्कर्तृविशेषसिद्धिः, तेन समं व्याप्त्यसिद्धेः । किं तु कर्तृसामान्यस्य, तथा च हेतोरकिंचित्करत्वं साध्यविरुद्धसाधनाद्विरुद्धत्वं वा । ततः कार्यत्वं

कृतबुद्ध्युत्पादकम् । बुद्धिमत्कर्तृगमकं न सर्वम् । सारूप्यमात्रेण च गमकत्वे बाष्पादेरप्यग्निं प्रति गमकत्वप्रसङ्गः, महेश्वरं प्रत्यात्मत्वादेः सादृश्यात्संसारित्वकिंचिज्ज्ञत्वाखिलजगदकर्तृत्वानुमापकानुषङ्गः, तुल्यत्वेपसमाधानत्वात् । ततो बाष्पधूमयोः केनचिदंशेन साम्येऽपि यथा कुतश्चिद्विशेषाद्धूमोऽग्निं गमयति न बाष्पादिः, तथा चित्यादीतरकार्यत्वयोरपि कश्चिद्विशेषोऽभ्युपगम्यः ॥

अथ द्वितीयः, तर्हि हेतोरसिद्धत्वं कार्यविशेषस्याभावाद्भावे वा जीर्णकूपप्रासादादिवदक्रियादर्शनोऽपि कृतबुद्ध्युत्पादकत्वप्रसङ्गः । समारोपान्नेति चेत्, सोऽप्युभयत्राविशेषतः किं न स्यात्, उभयत्र कर्तुरतीन्द्रियत्वाविशेषात् ॥ अथ प्रामाणिकस्यास्येवात्र कृतबुद्धिः, ननु कथं तस्य तत्र कृतत्वावगमोऽनेनानुमानेनानुमानान्तरेण वा । आद्येऽन्योन्याश्रयः । तथाहि । सिद्धविशेषणाद्धेतोरस्योत्थानं, तदुत्थाने च हेतोर्विशेषणसिद्धिरिति । द्वितीयपक्षेऽनुमानान्तरस्यापि सविशेषणहेतोरेवोत्थानम् । तत्राप्यनुमानान्तरात्तत्सिद्धावनवस्था । तन्न कृतबुद्ध्युत्पादकत्वरूपविशेषणसिद्धिः । तथा च विशेषणासिद्धत्वं हेतोः । यदुच्यते "खातप्रतिपूरितभूनिदर्शनेन कृतकानामात्मनि कृतबुद्ध्युत्पादकत्वनियमाभावः" इति तदप्यसत्, तत्राकृत्रिमभूभागादिसारूप्यस्य तदनुत्पादकस्य सद्भावात्तदनुत्पादकस्योपपत्तेः । न च चित्यादावप्यकृत्रिमसंस्थानसारूप्यमस्ति, येनाकृत्रिमत्वबुद्धिरुत्पद्यते, तस्यैवानभ्युपगमात्, अभ्युपगमे चापसिद्धान्तप्रसक्तिः स्यादिति । कृतबुद्ध्युत्पादकत्वरूपविशेषणासिद्धेर्विशेषणासिद्धत्वं हेतोः । सिध्यतु वा, तथाप्यसौ विरुद्धः,

घटादाविव शरीरादिविशिष्टस्यैव बुद्धिमत्कर्तुरत्र प्रसाधनात् । नन्वेवं दृष्टान्तदार्ष्टान्तिकसाम्यान्वेषणे सर्वत्र हेतूनामनुपपत्तिरिति चेत् । न, धूमाद्यनुमाने महानसेतरसाधारणस्याग्नेः प्रतिपत्तेः । अत्राप्येवं बुद्धिमत्सामान्यप्रसिद्धेर्न विरुद्धत्वमित्यप्ययुक्तं, दृश्यविशेषाधारस्यैव तत्सामान्यस्य कार्यत्वहेतोः प्रसिद्धेर्नादृश्यविशेषाधारस्य, तस्य स्वप्नेऽप्रतीतेः, खरविषाणाधारतत्सामान्यवत् । ततो यादृशात्कारणाद्यादृशं कार्यमुपलब्धं तादृशादेव तादृशमनुमातव्यं, यथा यावद्धूमात्मकादङ्गेर्यावद्धूमात्मकस्य धूमस्योत्पत्तिः सुदृढप्रमाणात्प्रतिपन्ना तादृशादेव धूमात्तादृशस्यैवाग्नेरनुमानमिति, एतेन साध्यसाधनयोर्विशेषेण व्याप्तौ गृह्यमाणायां सर्वानुमानोच्छेदप्रसक्तिरित्याद्यपास्तं द्रष्टव्यमिति । तथाऽदृष्टप्रभवैस्तरुवृणादिभिर्व्यभिचार्ययं हेतुः । द्विविधानि कार्याण्युपलभ्यन्ते, कानिचिद्बुद्धिमत्पूर्वकाणि यथा घटादीनि, कानिचित्तु तद्विपरीतानि यथाऽदृष्टप्रभववृक्षादीनि । तेषां पक्षीकरणाद्व्यभिचारे, स श्यामस्तत्पुत्रत्वादितरतत्पुत्रवदित्यादेरपि गमकत्वप्रसङ्गान्न कश्चिद्धेतुर्व्यभिचारी स्यात्, व्यभिचारविषयस्य सर्वत्रापि पक्षीकर्तुं शक्यत्वात् । ईश्वरबुद्ध्यादिभिश्च व्यभिचारः, तेषां कार्यत्वे सत्यपि समवायिकारणादीश्वरादिभिन्नबुद्धिमत्पूर्वकत्वाभावात् । तदभ्युपगमे चानवस्था । तथा कालात्ययापदिष्टश्चायं, अदृष्टप्रभवाङ्कुरादौ कर्तृभावस्याध्यक्षेणाध्यवसायात्, अग्नेरनुष्णत्वे साध्ये द्रव्यत्ववत् । ननु तत्राप्यदृश्य ईश्वर एव कर्तेति चेत् । तन्न, यतस्तत्र तत्सद्भावोऽस्मादेवान्यतो वा प्रमाणात्सिध्येत् । प्रथमपक्षे चक्रकम् ।

अतो हि तत्सद्भावे सिद्धे ऽस्यादृश्यत्वेनानुपलम्भसिद्धिः, तत्सिद्धौ च कालात्ययापदिष्टत्वाभावः, ततश्चासात्तत्सद्भावसिद्धिरिति। द्वितीयपक्षो ऽप्ययुक्तः, तत्सद्भावावेदकस्य प्रमाणान्तरस्यैवाभावात्। अस्तु वा तत्र तत्सद्भावः, तथाप्यस्यादृष्टत्वे शरीराभावः कारणं, विद्यादिप्रभावः, जातिविशेषो वा। प्रथमपक्षे कर्तृत्वानुपपत्तिः अशरीरत्वात्, मुक्तात्मवत्। ननु शरीराभावेऽपि ज्ञानेच्छाप्रयत्नाश्रयत्वेन शरीरकरणे कर्तृत्वमुपपद्यत इत्यप्यसमीचिताभिधानं, शरीरसंबन्धेनैव तत्प्रेरणोपपत्तेः, शरीराभावे मुक्तात्मवत्तदसंभवात्। शरीराभावे च ज्ञानाद्याश्रयत्वमप्यसंभाव्यं, तदुत्पत्तावस्य निमित्तकरणत्वात्, अन्यथा मुक्तात्मनोऽपि तदुत्पत्तिप्रसक्तेः। विद्यादिप्रभावस्य चादृश्यत्वहेतुत्वे कदाचिदसौ दृश्येत। न खलु विद्याभृतां शाश्वतिकमदृश्यत्वं दृश्यते, पिशाचादिवत्। जातिविशेषोऽपि नादृश्यत्वे हेतुरेकस्य जातिविशेषाभावादनेकव्यक्तिनिष्ठत्वात्तस्य ॥

अस्तु वा दृश्यो ऽदृश्यो वासौ, तथापि किं सत्तामात्रेण १ ज्ञानवत्त्वेन २ ज्ञानेच्छाप्रयत्नवत्त्वेन ३ तत्पूर्वकव्यापारेण ४ ऐश्वर्येण ५ वा चित्यादेः कारणं स्यात्। तत्राद्यपक्षे कुलालादीनामपि जगत्कर्तृत्वमनुषज्यते, सत्ताविशेषात्। द्वितीये तु योगिनामपि कर्तृत्वापत्तिः। तृतीयो ऽप्यसाम्प्रतः, अशरीरस्य पूर्वमेव ज्ञानाद्याश्रयत्वप्रतिषेधात्। चतुर्थो ऽप्यसंभाव्यः, अशरीरस्य कायवाक्कृतव्यापारवत्त्वासंभवात्। ऐश्वर्यमपि ज्ञातृत्वं कर्तृत्वमन्यद्वा। ज्ञातृत्वं चेत्, तत्किं ज्ञातृत्वमात्रं सर्वज्ञातृत्वं वा। आद्यपक्षे ज्ञातैवासौ

स्यान्नेश्वरः, अस्मदाद्यन्यज्ञाहलवत् । द्वितीये ऽप्यस्य सर्वज्ञत्वमेव स्यान्नैश्वर्यं, सुगतादिवत् । अथ कर्तृत्वं, तर्हि कुम्भकारादीनामप्यनेककार्यकारिणामैश्वर्यप्रसक्तिः । नाप्यन्यत्, इच्छाप्रयत्नव्यतिरेकेणान्यस्यैश्वर्यनिबन्धनस्येश्वरे ऽभावात् ॥ किं चेश्वरस्य जगन्निर्माणे यथारुचिप्रवृत्तिः १ कर्मपारतन्त्र्येण २ करुणया ३ क्रीडया ४ निग्रहानुग्रहविधानार्थं ५ स्वभावतो ६ वा । आद्यविकल्पे कदाचिदन्यादृश्येव सृष्टिः स्यात् । द्वितीये स्वातन्त्र्यहानिः । तृतीये सर्वमपि जगत्सुखितमेव करोति । अथेश्वरः किं करोति । पूर्वार्जितैरेव कर्मभिर्वशीकृता दुःखमनुभवन्ति । तदा तस्य कः पुरुषकारः, अदृष्टापेक्षस्य च कर्तृत्वे किं तत्कल्पनया, जगतस्तदधीनतैवास्तु । चतुर्थपञ्चमयोस्तु रागद्वेषताभावः प्रसज्यते । तथाहि "रागवानीश्वरः क्रीडाकारित्वाद्बालवत्तथा, अनुग्रहप्रदत्वाद्राजवत्तथा द्वेषवानसौ निग्रहप्रदत्वात्तद्वदेव" इति । अथ स्वभावतः, तर्ह्यचेतनस्यापि जगत एव स्वभावतः प्रवृत्तिरस्तु; किं तत्कर्तृकल्पनयेति । न कार्यत्वहेतुर्बुद्धिमन्तं कर्तारमीश्वरं साधयति । एवं सन्निवेशविशिष्टत्वादचेतनोपादानत्वादभूतभावित्वादित्याद्योऽपि स्वयमुत्थाप्याः, तुल्यत्वेपसमाधानत्वात् । किं च चित्यादेर्बुद्धिमत्पूर्वकत्वे साध्ये प्रदीयमानाः सर्वेऽपि हि हेतवो विरुद्धा दृष्टान्तानुग्रहेण सशरीरासर्वज्ञासर्वकर्तृपूर्वकत्वसाधनात् । न च धूमात्पावकानुमाने ऽप्ययं दोषः, तत्र तार्णपार्णादिविशेषाधारवह्निमाच्याप्तस्य धूमस्य दर्शनात् । नैवमत्र सर्वज्ञासर्वज्ञकर्तृविशेषाधि-

करणत्वसामान्येन कार्यत्वस्यास्ति व्याप्तिः, सर्वज्ञस्य कर्तुरतोऽनुमानात्प्रागसिद्धेः। व्यभिचारिणश्चामी बुद्धिमन्तमन्तरेणापि विद्युदादीनां प्रादुर्भावविभावनात्, स्वप्नाद्यवस्थायामबुद्धिमत्पूर्वस्यापि कार्यस्य दर्शनाच्चेति। कालात्ययापदिष्टाश्चैते, प्रत्यक्षागमबाधितपक्षानन्तरं प्रयुक्तत्वात्। तद्बाधा च पूर्वमेव दर्शिता। प्रकरणसमाश्चामी, प्रकरणचिन्ताप्रवर्तकानां हेत्वन्तराणां सद्भावात्। तथाहि। ईश्वरो जगत्कर्ता न भवति निरूपकरणत्वात्, दण्डचक्रचीवराद्युपकरणरहितकुलालवत्, तथा व्यापित्वादाकाशवत्, एकत्वात्तद्वदित्यादय इति। नित्यत्वादीनि तु विशेषणानि तद्व्यवस्थापनायानीयमानानि ग्रहं प्रति कामिन्या रूपसंपन्नरूपणप्राय्याप्यपकर्षणीयान्येव। विचारासहत्वाख्यापनार्थं तु किंचिदुच्यते। तत्रादौ नित्यत्वं विचार्यते। तच्चेश्वरे न घटते। तथाहि। नेश्वरो नित्यः, स्वभावभेदेनैव चित्यादिकार्यकर्तृत्वात्, अप्रच्युतानुत्पन्नस्थिरैकस्वभावं कूटस्थं नित्यमिति हि नित्यत्वलक्षणाभ्युपगमात्। स्वभावभेदानभ्युपगमे च सृष्टिसंहारादिविरुद्धकार्यकारित्वमतिदुर्घटम्। नापि तज्ज्ञानादीनां नित्यत्वं वाच्यं, प्रतीतिविरोधात्, ईश्वरज्ञानादयो न नित्या ज्ञानादित्वादस्मदादिज्ञानादिवदित्यनुमानविरोधाच्च। एतेन तदीयज्ञानादयो नित्या इत्यादि यदवादि, तदपोहितमूहनीयम्। सर्वज्ञत्वमप्यस्य केन प्रमाणेन ग्राह्यम्। न तावत्प्रत्यक्षेण, तस्येन्द्रियार्थसन्निकर्षोत्पन्नत्वेनातीन्द्रियार्थग्रहणासमर्थत्वात्। नाप्यनुमानेन, अव्यभिचारिलिङ्गाभावात्। ननु जगद्वैचित्र्यान्यथानुप-

पत्तिरूपं तदस्त्येवेति चेत् । न, तेन सहाविनाभावाभावात्, जगद्वैचित्र्यस्य सार्वज्ञ्यं विनापि शुभाशुभकर्मपरिपाकादिवशेनोपपद्यमानत्वात् । किं चायं यदि सर्वज्ञः, तदा जगदुपप्लवकरणखेरिणः पश्चादपि कर्तव्यनिग्रहानसुरादींस्तदधिक्षेपकृतो ऽसुरादींश्च किमर्थं सृजतीति नायं सर्वज्ञः । तथा बहूनामेककार्यकरणे वैमत्यसंभावनाभयेन महेशितुरेकत्वकल्पना भोजनादिव्ययभयात् कृपणस्यात्यन्तवल्लभपुत्रकलत्रमित्रादिपरित्यजनेन शून्यारण्यानीसेवनतुलामाकलयति । अनेककोटिकासरघाग्रतसंपाद्यत्वेऽपि मक्षिकामूर्धमधुच्छत्रादिकार्याणामेकरूपतयाविगानेनोपलम्भात् । किं चेश्वरस्याखिलजगत्कर्तृत्वे ऽभ्युपगम्यमाने शास्त्राणां प्रमाणेतरताव्यवस्थाविलोपः स्यात् । तथाहि । सर्वं शास्त्रं प्रमाणमीश्वरप्रणीतत्वादितरत्प्रणीतशास्त्रवत् । प्रतिवाद्यादिव्यवस्थाविलोपश्च, सर्वेषामीश्वरादेशविधायित्वेन तत्प्रतिलोमाचरणानुपपत्तेः प्रतिवाद्यभावप्रसङ्गात् । इति न सृष्टिकरस्य महेश्वरस्य कथंचिदपि सिद्धिः । ततः सद्भूतार्थप्रकाशकत्वाद्वीतराग एव सर्वज्ञो देवो देवत्वेनाभ्युपगमनार्हो नापरः कश्चिदिति स्थितम् ॥

अत्र जल्पन्ति जैमिनीयाः । इह हि सर्वज्ञादिविशेषणविशिष्टो भवदभिमतः कश्चनापि देवो नास्ति, तद्ग्राहकप्रमाणाभावात् । तथाहि । न तावत्प्रत्यक्षं तद्ग्राहकं,

संबद्धं वर्तमानं हि गृह्यते चक्षुरादिना ।

इति वचनात् ।

न चानुमानं, प्रत्यक्षदृष्ट एवार्थे तत्प्रवर्तनात् । न चागमः, सर्वज्ञस्यासिद्धत्वेन तदागमस्यापि विवादास्पदत्वात् । न चोपमानं, सर्वज्ञसदृशस्यापरस्याभावात् । न चार्थापत्तिरपि, सर्वज्ञसाधकस्यान्यथानुपपन्नार्थस्यादर्शनात् । ततः प्रमाणपञ्चकाप्रवृत्तेरभावप्रमाणगोचर एव सर्वज्ञः । तदुक्तम् । 5

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्त्वावबोधार्थं तत्राभावप्रमाणता ॥ इति ।

प्रयोगोऽत्र । नास्ति सर्वज्ञः, प्रमाणपञ्चकाग्राह्यमाणत्वात्, खरविषाणवत् ॥

किं च । यथादेरपि सुवर्णमलस्य क्षारमृत्पुटपाकादि- 10 प्रक्रियया विशोध्यमानस्य निर्मलत्वं, एवमात्मनोऽपि निरन्तरं ज्ञानाद्यभ्यासेन विगतमलत्वात्सर्वज्ञत्वं किं न भवेदिति मतिस्तदपि न, अभ्यासेन हि शुद्धेस्तारतम्यमेव भवेन्न परमः प्रकर्षः, न हि नरस्य लङ्घनमभ्यासतस्तारतम्यवदुपलभ्यमानं सकललोकविषयमुपलभ्यते । उक्तं च । 15

दशहस्तान्तरं व्योम्नो यो नामोत्प्लुत्य गच्छति ।
न योजनशतं गन्तुं शक्तोऽभ्यासशतैरपि ॥ १ ॥ इति ।

अपि च स सर्वं वस्तुजातं केन प्रमाणेन जानाति । किं प्रत्यक्षेणोत यथासंभवं सर्वैरेव प्रमाणैः । न तावत्प्रत्यक्षेण, तस्य सन्निहितप्रतिनियतार्थग्राहित्वात् । नाप्यतीन्द्रियप्रत्यक्षेण, तत्सद्भावे प्रमा- 20 णाभावात् । नापि सर्वैरेव प्रमाणैः, तेषां प्रत्यक्षपूर्वकत्वात् सर्वेषां सर्वज्ञतापत्तेश्चेति ॥ अन्यच्च । अनाद्यनन्तः संसारः ।

तत्तद्वस्त्वन्यधनन्तानि क्रमेण विदन्, कथमनन्तेनापि कालेन सर्ववेदी भविष्यति। किं च यथावस्थितवस्तुवेदिले ऽशुच्यादिरसास्वादप्रसङ्गः, तेषां यथावस्थिततया संवेदनात्। आह च

अशुच्यादिरसास्वादप्रसङ्गस्त्वनिवारितः। इति।

किं चातीतानागतवस्तूनि स किं स्वेन स्वेन रूपेण जानाति किं वा वर्तमानतयैव। प्रथमपक्षे तज्ज्ञानस्याप्रत्यक्षतापत्तिः, अवर्तमानवस्तुग्राहित्वात्, स्मरणादिवत्। द्वितीये तु तज्ज्ञानस्य भ्रान्तत्वप्रसङ्गः, अन्यथास्थितस्यार्थस्यान्यथाग्रहणात्, द्विचन्द्रादिवदिति॥

अत्र प्रतिविधीयते। तत्र यत्तावदुक्तं "तद्ग्राहकप्रमाणाभावात्" इति साधनं, तदसम्यक्, तत्साधकानामनुमानप्रमाणानां सद्भावात्। तथाहि। ज्ञानतारतम्यं क्वचिद्विश्रान्तं, तरतमशब्दवाच्यत्वात्, परिमाणवदिति। नायमसिद्धो हेतुः, प्रतिप्राणि प्रज्ञामेधादिगुणपाटवरूपस्य ज्ञानस्य तारतम्येनोपलब्धेः। ततो ऽवश्यमस्य सर्वान्तिमप्रकर्षेण भाव्यं, यथा परिमाणस्याकाशे। स च ज्ञानस्य सर्ववस्तुप्रकाशकत्वरूपो यत्र विश्रान्तः स भगवान् सर्वज्ञः। ननु संताप्यमानपाथस औष्ण्यतारतम्ये सत्यपि सर्वान्तिमवह्निरूपतापत्तिरूपप्रकर्षादर्शनाद्व्यभिचार्ययं हेतुरिति चेत्। न, यतो यो द्रव्यस्य सहजो धर्मो न तु सहकारिसव्यपेक्षः—(सहजो ऽपि च यः स्वाश्रये विशेषमारभते)—सो ऽभ्यासक्रमेण प्रकर्षपर्यन्तमासादयति, यथा कलधौतस्य पुटपाकप्रबन्धाहिता विशुद्धिः। न च पाथसस्तापः सहजो धर्मः, किं त्वग्न्यादिसह-

कारिसव्यपेक्षः। तत्कथं तत्र तापो ऽभ्यस्यमानः परां काष्ठां गच्छेत्। अनन्ततापे प्रत्युत पाथसः परिक्षयात्। ज्ञानं तु जीवस्य सहजो धर्मः स्वाश्रये च विशेषमाधत्ते। तेन तस्य निरन्तराभ्यासाहिताधिकोत्तरोत्तरविशेषाधानात् प्रकर्षपर्यन्तप्राप्तिर्नायुक्ता। एतेन "लङ्घनाभ्यास" इत्यादि निरस्तं, लङ्घनस्यासहजधर्मत्वात्, स्वाश्रये च विशेषानाधानात्, प्रत्युत तेन सामर्थ्यपरिक्षयादिति। तथा जलधिजलपलप्रमाणादयः कस्यचित्प्रत्यक्षाः, प्रमेयत्वात्, घटादिगतरूपादिविशेषवत्। न च प्रमेयत्वमसिद्धं, अभावप्रमाणस्य व्यभिचारप्रसक्तेः। तथाहि। प्रमाणपञ्चकातिक्रान्तस्य हि वस्तुनो ऽभावप्रमाणविषयता भवताभ्युपगम्यते। यदि च जलधिजलपलप्रमाणादिषु प्रमाणपञ्चकातिक्रान्तरूपमप्रमेयत्वं स्यात्, तदा तेष्वप्यभावप्रमाणविषयता स्यात्। न चाच तत्त्वे ऽपि सा संभविनीति। यस्य च प्रत्यक्षाः, स भगवान् सर्वज्ञ इति। तथास्ति कश्चिदतीन्द्रियार्थसार्थसाक्षात्कारी, अनुपदेशलिङ्गाविसंवादिविशिष्टदिग्देशकालप्रमाणाद्यात्मकचन्द्रादिग्रहणाद्युपदेशदायित्वात्। यो यद्विषये ऽनुपदेशलिङ्गाविसंवाद्युपदेशदायी स तत्साक्षात्कारी यथास्मदादिः, अनुपदेशलिङ्गाविसंवाद्युपदेशदायी च कश्चित्, तस्मात्तत्साक्षात्कारी; तथाविधश्च श्रीसर्वज्ञ एवेति। यच्चोक्तं "प्रमाणपञ्चकाप्रवृत्तेः सर्वज्ञस्याभावप्रमाणगोचरत्वं", तदपि वाङ्मात्रं, प्रमाणपञ्चकाप्रवृत्तेरसंभवात्। सा हि बाधकत्वेन स्यात्, न च सर्वज्ञे बाधकसंभवः। तथाहि। तद्बाधकं प्रत्यक्षं १ अनुमानं २

आगमः ३ उपमानं ४ अर्थापत्तिर्वा ५ । तत्राद्यः पक्षो न श्रेयान्, यतो यदि प्रत्यक्षं वस्तुनः कारणं व्यापकं वा स्यात्, तदा तन्निवृत्तौ वस्तुनोऽपि निवृत्तिर्युक्तिमती, वह्न्यादिकारणवृक्षत्वादिव्यापकनिवृत्तौ धूमत्वादिग्निंग्रपात्वादिनिवृत्तिवत् । न चार्थस्याध्यक्षं कारणं, तदभावेऽपि देशादिव्यवधाने ऽर्थस्य भावात् । नापि व्यापकं, तन्निवृत्तावपि देशादिविप्रकृष्टवस्तुनामनिवर्तमानत्वात् । न चाकारणाव्यापकनिवृत्तावकार्याव्याप्यनिवृत्तिरूपपन्नातिप्रसक्तेरिति । नाप्यनुमानं तद्बाधकं, धर्मिसाध्यधर्मसाधनानां स्वरूपाभिद्वेः । तत्र हि धर्मित्वेन किं सर्वज्ञो ऽभिप्रेतः १ सुगतादिः २ सर्वपुरुषा वा ३ । यदि सर्वज्ञः, तदा किं तत्र साध्यमसत्त्वं १ असर्वज्ञत्वं वा २ । यद्यसत्त्वं किं तत्र साधनमनुपलम्भो १ विरुद्धविधिः २ वक्तृत्वादिकं ३ वा । यद्यनुपलम्भः किं सर्वज्ञस्योत १ तत्कारणस्य २ तत्कार्यस्य ३ तद्व्यापकस्य ४ वा । यदि सर्वज्ञस्य, सो ऽपि किं स्वसंबन्धी १ सर्वसंबन्धी २ वा । स्वसंबन्धी चेन्निर्विशेषण १ उतोपलब्धिलक्षणप्राप्तत्वविशेषणो २ वा । आद्ये परचित्तविशेषादिभिरनैकान्तिको ऽनुपलम्भादिति हेतुः, तेषामनुपलम्भे ऽप्यसत्त्वानभ्युपगमात् । नाप्युपलब्धिलक्षणप्राप्तत्वविशेषणः, सर्वत्र सर्वदा च सर्वज्ञाभावसाधनस्याभावप्रसङ्गात् । न हि सर्वथाप्यसत उपलब्धिलक्षणप्राप्तत्वं घटते, क्वचित्कदाचित्सत्त्वोपलम्भाविनाभावित्वात्तस्य । एतेन सर्वसंबन्ध्यपक्षो ऽपि प्रत्याख्यातः । किं चासिद्धः सर्वसंबन्ध्यनुपलम्भो ऽसर्वविदा

प्रतिपत्तुमशक्यत्वात्। न खलु सर्वात्मनां तज्ज्ञानानां चाप्रतिपत्तौ तत्संबन्धी सर्वज्ञानुपलम्भः प्रतिपत्तुं शक्यः। नापि कारणानुपलम्भः, तत्कारणस्य ज्ञानावरणादिकर्मक्षयस्यानुमानेनोपलम्भात्। एतत्साधकं चानुमानं, युक्तयस्त्राग्रे वक्ष्यन्ते। कार्यानुपलम्भोऽप्यसिद्धः, तत्कार्यस्याविसंवाद्यागमस्योपलम्भेः। व्यापकानुपलम्भोऽप्यसिद्धः, तद्व्यापकस्य सर्वार्थसाक्षात्कारित्वस्यानुमानेन प्रतीतेः। तथाहि। अस्ति कश्चित्सर्वार्थसाक्षात्कारी, तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रक्षयत्वात्। यद्यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धकं तत्तत्साक्षात्कारि, यथापगततिमिरादिप्रतिबन्धं लोचनं रूपसाक्षात्कारीति नानुपलम्भादिति साधनं सर्वज्ञाभावं साधयति॥ विरुद्धविधिरपि साक्षात्परंपरया वा सर्वज्ञाभावं साधयति। प्रथमपक्षे सर्वज्ञत्वेन साक्षाद्विरुद्धस्यासर्वज्ञत्वस्य क्वचित्कदाचिद्विधानात्सर्वत्र सर्वदा वा। तत्राद्यपक्षे न सर्वत्र सर्वदा सर्वज्ञाभावः सिध्येत्। यत्रैव हि तद्विधानं तत्रैव तदभावः, नान्यत्र। न हि क्वचित्कदाचिदग्नेर्विधाने सर्वत्र सर्वदा वा तद्व्यापकविरुद्धशीतताभावो दृष्टः। द्वितीयोऽप्ययुक्तोऽर्वाग्दृष्टेः, सर्वत्र सर्वदा वा सर्वज्ञत्वविरुद्धासर्वज्ञत्वविधेरसंभवात्। तत्संभवे च तत्रैव सर्वज्ञत्वापत्तेः सिद्धं नः समीहितम्। परंपरयापि किं तद्व्यापकविरुद्धस्य १ तत्कारणविरुद्धस्य २ तत्कार्यविरुद्धस्य ३ वा विधिः सर्वज्ञाभावमादिशेत्। न तावद्व्यापकविरुद्धविधिः। स हि सर्वज्ञस्य व्यापकमखिलार्थसाक्षात्कारित्वं, तेन विरुद्धं तदसाक्षात्कारित्वं नियतार्थग्राहित्वं वा। तस्य च

विधिः क्वचित्कदाचित्तदभावं साधयेन्न पुनः सर्वत्र सर्वदा वा, तुषारस्पर्शव्यापकशीतविरुद्धाग्निविधानात्, क्वचित्कदाचित्तुषारस्पर्शनिषेधवत्। कारणविरुद्धविधिरपि क्वचित्कदाचिदेव सर्वज्ञाभावं साधयेत्, न सर्वत्र। सर्वज्ञत्वस्य हि कारणमशेषकर्मक्षयः। तद्विरुद्धस्य कर्माक्षयस्य च विधिः क्वचित्कदाचिदेव सर्वज्ञाभावसाधकः, रोमहर्षादिकारणशीतविरुद्धाग्निविधानात्, क्वचित्कदाचिच्छीतकार्यरोमहर्षादिनिषेधवत्। न पुनः साकल्येन, सकलकर्माप्रक्षयस्य साकल्येन संभवाभावात्, क्वचिदप्यात्मनि तस्याग्रे प्रसाधयिष्यमाणत्वात्। नापि विरुद्धकार्यविधिः। सर्वज्ञत्वेन हि विरुद्धं किंचिज्ज्ञत्वम्। तत्कार्यं नियतार्थविषयं वचः, तस्य विधिः। स च न सामस्त्येन सर्वज्ञाभावं साधयेत्। यत्रैव हि तद्विधिस्तत्रैवास्य तदभावसाधनसमर्थत्वात्, शीतविरुद्धदहनकार्यधूमविशिष्टप्रदेश एव शीतस्पर्शनिषेधवत्। तत्र विरुद्धविधिरपि सर्वविदो बाधकः॥ नापि वक्तृत्वादिकं, सर्वज्ञसत्त्वानभ्युपगमे तस्यानुपपत्त्यासिद्धत्वात्, तदुपपत्तौ च स्ववचनविरोधो नास्ति सर्वज्ञो वक्तृत्वादिधर्मोपेतश्चेति। तत्र सर्वज्ञस्यासत्त्वं कुतोऽपि हेतोः साधयितुं शक्यम्॥ नाप्यसर्वज्ञत्वं साध्यं सर्वज्ञोऽसर्वज्ञ इत्येवं, विरोधस्याप्यविशिष्टत्वात्। किं चासर्वज्ञत्वे साध्ये सर्वज्ञस्य प्रमाणविरुद्धार्थवक्तृत्वं १ तद्विपरीतं २ वक्तृत्वमात्रं ३ वा हेतुत्वेन विवक्षितम्। प्रथमो ऽसिद्धो हेतुः, सर्वज्ञस्य तथाभूतार्थवक्तृत्वासंभवात्। द्वितीयपक्षे तु विरुद्धः, दृष्टेष्टाविरुद्धार्थवक्तृत्वस्य सर्वज्ञत्वे

सत्येव संभवात् । तृतीयपक्षे ऽप्यनैकान्तिकः, वक्तृत्वमात्रस्य सर्वज्ञत्वेन विरोधासंभवात् ॥ एतेन सुगतादिधर्मिपक्षो ऽपि प्रत्याख्यातः, प्रोक्तदोषानुषङ्गाविशेषात् । किं च प्रतिनियतसुगतादेः सर्वज्ञतानिषेधे ऽन्येषां तद्विधिरवश्यंभावी, विशेषनिषेधस्य शेषाभ्यनुज्ञानान्तरीयकत्वात्, "अयमब्राह्मणः" इत्यादिवदिति ॥ अथ सर्वपुरुषानुररीकृत्य तेषामसर्वज्ञता वक्तृत्वादेः साध्यते । तन्न, विपक्षात्तस्य व्यतिरेकासिद्धा संदिग्धविपक्षव्यावृत्तिकत्वात् सर्वज्ञो ऽपि भविष्यति वक्तापीति । तन्नानुमानं सर्वज्ञबाधकम् ॥

नाप्यागमः । स हि पौरुषेयो ऽपौरुषेयो वा । न तावत्- पौरुषेयः, तस्याप्रामाण्यात्, वचनानां गुणवद्वक्त्राधीनतया प्रामाण्योपपत्तेः । किं चास्य कार्ये एवार्थे प्रामाण्याभ्युपगमान्न सर्वतः स्वरूपनिषेधे प्रामाण्यं स्यात् । न चाशेषज्ञानाभावसाधकं किंचिदेदवाक्यमस्ति, "हिरण्यगर्भः सर्वज्ञः" इत्यादिवेदवाक्यानां तत्प्रतिपादकानामनेकशः श्रवणात् ॥

नाप्युपमानं तद्बाधकम् । तत्खलूपमानोपमेययोरध्यक्षत्वे सति गोगवयवत् स्यात् । न चाशेषपुरुषाः सर्वज्ञश्च केनचिद्दृष्टाः, येन "अशेषपुरुषवत्सर्वज्ञः सर्वज्ञवद्वा ते" इत्युपमानं स्यात् । अशेषपुरुषदृष्टौ च तस्यैव सर्वज्ञत्वापत्तिरिति ॥

नाप्यर्थापत्तिस्तद्बाधिका, सर्वज्ञाभावमन्तरेणानुपपद्यमानस्य कस्याप्यर्थस्याभावात्, वेदप्रामाण्यस्य च सर्वज्ञे सत्येवोपपत्तेः । न हि गुणवद्वक्तृरभावे वचसां प्रामाण्यं घटत इति न सर्वज्ञे बाधकसंभवः । तदभावे च प्रमाणपञ्चकाप्रवृत्तिरप्यसिद्धा । तथा

यदुक्तं "प्रमाणपञ्चकाप्रवृत्त्याभावप्रमाणविषयित्वं", यदप्यनैकान्तिकं, हिमवत्पल्लपरिमाणपिशाचादीनां प्रमाणपञ्चकाप्रवृत्तावप्यभावप्रमाणगोचरत्वाभावादिति "प्रमाणपञ्चकं यत्र" इत्यादयपास्तं द्रष्टव्यम्॥ यच्चोक्तं "सर्वं वस्तुजातं केन प्रमाणेन" इत्यादि, तदप्ययुक्तं, सकलज्ञानावरणविलयोत्थाविकलकेवलालोकेन सकललोकालोकादिवस्तुवेत्तृत्वात्सर्वज्ञस्येति। यच्चोक्तं "अमुष्यादिरसास्वाद" इत्यादि, तदपि परं प्रत्यसूयामात्रमेव व्यनक्ति, सर्वज्ञस्यातीन्द्रियज्ञानित्वेन करणव्यापारनिरपेक्षत्वात् जिह्वेन्द्रियव्यापारनिरपेक्षं यथावस्थितं तटस्थतयैव वेदनं, न तु भवदक्षद्व्यापारसापेक्षं वेदनमिति। यदप्यवादि "कालतोऽनाद्यनन्तः संसारः" इत्यादि, तदप्यसम्यक्, युगपत्संवेदनात्। न च तदसंभवि दृष्टत्वात्। तथाहि। यथा स्वभ्यस्तसकलशास्त्रार्थः सामान्येन युगपत्प्रतिभासते, एवमशेषविशेषकलितोऽपि। यथा चोक्तम्।

यथा सकलशास्त्रार्थः स्वभ्यस्तः प्रतिभासते।
मनस्येकक्षणेनैव तथानन्तादिवेदनम्॥ १॥ इति॥

यच्चोक्तं "अतीतानागत" इत्यादि, तदपि स्वप्रणेतुरज्ञानित्वमेव ज्ञापयति, यतो यद्यपीदानीं तनकालापेक्षयातीतानागतवस्तुनी असती, तथापि यथातीतमतीतकाले ऽवर्तिष्ट यथा च भावि वर्तिष्यते, तथैव तयोः साक्षात्कारित्वेन न कश्चनापि दोष इति सिद्धः सुखादिवत्सुनिश्चितासंभवद्बाधकप्रमाणत्वात् सर्वज्ञ इति॥

अथ दिक्पटाः प्रकटयन्ति। ननु भवतु सुनिश्चितासंभवद्बाधकप्रमाणत्वात्सर्वज्ञसिद्धिः। किं तस्य कवलाहार इति न मृष्यामहे। तथाहि। केवलिनः कवलाहारो न भवति, तत्कारणाभावात्, न च कारणाभावे कार्यस्योत्पत्तिः, अतिप्रसक्तेः। न च तत्कारणाभावोऽसिद्धः, आहारादाननिदानभूते वेदनादिषट्के एकस्यापि, तस्य केवलिन्यभावात्। तथाहि। न तावत्तस्य वेदनोत्पद्यते, तद्वेदनीयस्य दग्धरज्ज्वस्थानिकत्वात्। सत्यामपि वेदनायां न तस्य तत्कृता पीडा, अनन्तवीर्यत्वात्। वैयावृत्त्यकरणं तु भगवति त्रैलोक्यपूज्ये न संभवत्येवेति। ईर्यापथं पुनः केवलज्ञानावरणक्षयात् सम्यगवलोकयत्यसौ। संयमस्तु तस्य यथाख्यातचरित्रिणो निष्ठितार्थत्वादनन्तवीर्यत्वाच्च नाहारकारणो भवति। प्राणवृत्तिरपि तस्यानपवर्त्यायुष्कादनन्तवीर्यत्वाच्चान्यथासिद्धैव। धर्मचिन्तावसरस्त्वपगतः, निष्ठितार्थत्वात्। तदेवं केवलिनः कावलिकाहारो बहुदोषदुष्टत्वान्न घटत इति॥

अत्रोच्यते। तत्र यत्तावदूचानं "तत्कारणाभावात्" इति साधनं, तदसिद्धं, आहारकारणस्य वेदनीयस्य केवलिनि तथैव सद्भावात्। तथा च किमिति सा शारीरी स्थितिः प्राक्तनी न स्यात्। प्रयोगोऽत्र। स्यात्केवलिनो भुक्तिः, समग्रसामग्रीकत्वात्, पूर्वभुक्तिवत्। सामग्री चेयं पर्याप्तत्वं वेदनीयोदय आहारपक्तिनिमित्तं तैजसशरीरं दीर्घायुष्कं चेति। सा च समग्रापि केवलिनि समस्ति। यदपि दग्धरज्ज्वस्थानिकत्वं वेदनीयस्योच्यते, तदप्यनागमिकमयुक्तियुक्तं च, आगमे ऽत्यन्तसातोदयस्य केवलिनि प्रति-

पादनात्। युक्तिरपि, यदि घातिकर्मक्षयाज्ज्ञानादयस्तस्य भवेयुः वेदनीयोद्भवायाः क्षुधः किमायातं येनासौ न भवति। न तयोरुष्णायातपयोरिव सहानवस्थानलक्षणो भावाभावयोरिव परस्परपरिहारलक्षणो वा कश्चिद्विरोधोऽस्ति सातासातयोरन्तर्मुहूर्तपरिवर्तमानतया सातोदयवत् असातोदयोऽप्यस्तीत्यनन्तवीर्यत्वे सत्यपि शरीरबलापचयः क्षुदुद्भवपीडा च भवत्येव। न चाहारग्रहणे तस्य किंचित्क्षूयते केवलमाहोपुरुषिकामात्रमेवेति। यदुच्यते "वेदनीयस्योदीरणाभावात् प्रभूततरपुद्गलोदयाभावः, तदभावाच्चात्यन्तं पीडाभावः" इति, तदयुक्तं, तुर्यादिगुणस्थानकेषु वेदनीयस्य गुणश्रेणीसद्भावात्, प्रचुरपुद्गलोदये सत्यपि तत्कृतपीडाल्पत्वस्यैव दर्शनात्, जिने सातोदयवत्, प्रचुरपुद्गलोदयाभावेऽपि तीव्रप्रदर्शनाच्चेति। यदप्युच्यते "आहाराकाङ्क्षा क्षुत्, सा च परिग्रहबुद्धिः, सा च मोहनीयविकारः, तस्य चापगतत्वात्केवलिनो न भुक्तिः" इति, तदसम्यक्, यतो मोहनीयविपाकात्क्षुन्न भवति, तद्विपाकस्य प्रतिपक्षभावनानिवर्तमानत्वात्, क्रोधादीनां तथोपरमोपलब्धेः। तदुक्तं "उवसमेण हणे कोहं" इत्यादि। न च क्षुद्वेदनीयं तद्विपक्षभावनया निवर्तमानं दृष्टम्। अतो न मोहविपाकस्वभावा क्षुदिति। एतेन यदुच्यते

"अपवर्त्यते कृतार्थं नायुर्ज्ञानादयो न हीयन्ते।"
"जगदुपकृतावनन्तं वीर्यं किं गततृषो भुक्तिः॥"

इत्यादि निरस्तं, एवंविधौदारिकत्वादिसामग्रीसद्भावेन क्षुद्व-

स्यावस्थायामपि केवलिनो ऽभुक्तिप्रसक्तेः । समस्तवीर्यान्तरायक्षयाभावाच्छद्मस्थस्य भुक्तिरिति चेत्, तदयुक्तम् । यतः, किं तच्चायुष्कस्यापवर्तनं स्यात्किं वा चतुर्णां ज्ञानानां काचिद्धानिः स्यात्, येन भुक्तिः । तेन यथा दीर्घकालस्थितेरायुष्कं कारणमेवमाहारो ऽपि, यथासिद्धिगतेर्व्युपरतक्रियाध्यानचरमक्षणः कारणं, एवं सम्यक्त्वादिकमपीति, अनन्तवीर्यतापि तस्याहारग्रहणे न विरुध्यते । यथा तस्य देवच्छन्दादीनि विश्रामकारणानि गमननिषीदनानि च भवन्ति, एवमाहारक्रियापि, विरोधाभावात् । न च बलवत्तरस्य वीर्यवतो ऽल्पीयसी क्षुद्व्यभिचारात् । किं चागमो ऽपि केवलिनो भुक्तिं प्रतिपादयति । तथाहि तत्त्वार्थसूत्रम् [९, ११] । "एकादश जिने" इति । व्याख्या । एकादश परीषहाः क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलाख्या जिने केवलिनि भवन्ति, तत्कारणस्य वेदनीयस्याद्यापि विद्यमानत्वात् । न च कारणानुच्छेदे कार्यस्योच्छेदः संभाव्यते, अतिप्रसक्तेः । अत एव केवलिनि क्षुद्वेदनीयपीडा संभाव्यते, किं त्वसावनन्तवीर्यत्वान्न विक्लवीभवति, न चासौ निष्ठितार्थो निःप्रयोजनमेव पीडां सहते, न च शक्यते वक्तुं "एवंभूतमेव भगवतः शरीरं, यदुत क्षुत्पीडया न बाध्यते" इति, अनुमानेन तस्यास्तत्र सिद्धत्वात् । तथाहि । केवलिशरीरं क्षुदादिना पीड्यते, शरीरत्वात्, अस्मदाद्यधिष्ठितशरीरवत् । तथा । यथा तच्छरीरं स्वभावेन प्रस्वेदादिरहितं, एवं प्रक्षेपाहाररहितमपीत्यपकर्णनीयमेव, अप्र-

माणकत्वात्। तदेवं देशो न पूर्वकोटिकालस्य केवलस्थितेः संभवादौदारिकशरीरस्थितेश्च यथायुष्कं कारणमेवं प्रक्षेपाहारोऽपि। तथाहि। तैजसशरीरेण मृदूकृतस्याभ्यवहृतस्य खलपर्याप्त्या परिणामितस्योत्तरोत्तरपरिणामक्रमेणौदारिकशरीरिणामनेन प्रकारेण क्षुदुद्भवो भवति। वेदनीयोदये चेयं समग्रापि सामग्री भगवति केवलिनि संभवति। ततः केन हेतुनासौ न भुंक्त इति। न च घातिचतुष्टयस्य क्षुद्वेदनीयं प्रति सहकारिकारणभावोऽस्ति येन तदभावात्तदभाव इत्युच्यते। इति सिद्धा केवलिभुक्तिः। तथा प्रयोगश्च। केवलिनः प्रक्षेपाहारो भवति, कवलाहारकेवलित्वयोरविरोधात्, सातवेदनीयवदिति। इति केवलिभुक्तिव्यवस्थापनस्थलमिति॥

अथ तत्त्वान्याह।

जीवाजीवौ तथा पुण्यं पापमास्रवसंवरौ।
बन्धो विनिर्जरामोक्षौ नव तत्त्वानि तन्मते॥४७॥

व्याख्या॥ चेतनालक्षणो जीवः, तद्विपरीतलक्षणस्त्वजीवः। धर्माधर्माकाशकालपुद्गलभेदेन त्वसौ पञ्चधा व्यवस्थितः। अनयोरेव द्रव्योर्जगद्वर्तिनः सर्वेऽपि भावा अन्तर्भवन्ति। न हि ज्ञानादयो रूपरसादयश्च द्रव्यगुणा उत्क्षेपणादीनि च कर्माणि सामान्यविशेषसमवायाश्च जीवाजीवव्यतिरेकेणात्मस्थितिं लभन्ते, तद्भेदेनैकान्ततस्तेषामनुपलम्भात्, तेषां तदात्मकत्वेन प्रतिपत्तेः, अन्यथा तदसत्त्वप्रसङ्गात्। बौद्धादिपरिकल्पितदुःखादितत्त्वानि

जीवाजीवाभ्यां पृथग्जात्यन्तरतया न वक्तव्यानि, जीवाजीवराशिद्वयेन सर्वस्य जगतो व्याप्तत्वात्, तद्व्याप्तस्य ग्रथग्रहणतुल्यत्वात् ॥ तर्हि पुण्यपापास्रवादीनामपि ततः पृथग्ग्रहणं न युक्तिप्रधानं स्यात्, राशिद्वयेन सर्वस्य व्याप्तत्वादिति चेत् । न, पुण्यादीनां विप्रतिपत्तिनिरासार्थत्वात्, आस्रवादीनां सकारण- संसारमुक्तिप्रतिपादनपरत्वाद्वा पृथग्ग्रहणस्यादुष्टता । यथा च संवरनिर्जरयोर्मोक्षहेतुता आस्रवस्य बन्धननिबन्धनत्वं पुण्यापुण्यद्विभेदबन्धस्य च संसारहेतुत्वं तथागमात्प्रतिपत्तव्यम् । तत्र पुण्यं शुभाः कर्मपुद्गलाः ३ । त एव त्वशुभाः पापं ४ । आस्रवति कर्म यतः स आस्रवः कायवाङ्मनोव्यापारः, पुण्यापुण्यहेतुतया चासौ द्विविधः ५ । आस्रवनिरोधः संवरः, गुप्तिसमितिधर्मानुप्रेक्षादीनां चास्रवप्रतिबन्धकारित्वात्; स च द्विविधः सर्वदेशभेदात् ६ । योगनिमित्तः सकषायस्यात्मनः कर्मवर्गणापुद्गलैः संश्लेषविशेषो बन्धः । स च सामान्येनैकविधोऽपि प्रकृतिस्थित्यनुभागप्रदेशभेदेन चतुर्धा, पुनरेकैको ज्ञानावरणादिमूलप्रकृतिभेदादष्टधा, पुनरपि मत्यावरणादितदुत्तरप्रकृतिभेदादनेकविधः । अयं च कश्चित्तीर्थकरत्वादिफलनिर्वर्तकत्वात्प्रशस्तः, अपरस्य नारकादिफलनिर्वर्तकत्वादप्रशस्तः, प्रशस्ताप्रशस्तपरिणामोद्भूतस्य कर्मणः सुखदुःखसंवेदनीयफलनिर्वर्तकत्वात् ७ । आत्मसंपृक्तकर्मनिर्जरणकारणं निर्जरा द्वादशविधतपोरूपा । सा चोक्तेष्टा शुक्लध्यानरूपा "तपसा निर्जरा च" [तत्त्वार्थाधिगम० ९.३] इति वचनात्, ध्यानस्य चाभ्यन्तरतपोरूपत्वात् ८ । विनिर्मुक्ताग्रे-

षबन्धनस्य प्राप्तनिजस्वरूपस्यात्मनो लोकान्तेऽवस्थानं मोक्षः, बन्धविप्रयोगो मोक्ष इति वचनात् । ९ ॥ तानि नवसंख्यानि तत्त्वानि तन्मते जैनमते ज्ञातव्यानि ॥

अथ ग्रन्थकार एव तत्त्वानि क्रमेण व्याख्याति । तत्र यथोद्देशं निर्देश इति न्यायात् प्रथमं जीवतत्त्वमाह ।

तत्र ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो विवृत्तिमान् ।
शुभाशुभकर्मकर्ता भोक्ता कर्मफलस्य च ॥ ४८ ॥
चैतन्यलक्षणो जीवो यश्चैतद्विपरीतवान् ।
अजीवः स समाख्यातः पुण्यं सत्कर्मपुद्गलाः ॥ ४९ ॥

युग्मम् ॥ तत्रेति निर्धारणार्थः । ये ज्ञानदर्शनचारित्रसुखदुःखवीर्यभव्याभव्यत्वसत्त्वप्रमेयत्वद्रव्यत्वप्राणधारित्वक्रोधादिपरिणतत्वसंसारित्वसिद्धत्वपरवस्तुव्यावृत्तत्वादयः स्वपरपर्याया जीवस्य भवन्ति, ते ज्ञानादयो धर्मा उच्यन्ते । तेभ्यो जीवो न भिन्नो नाप्यभिन्नः, किं तु जात्यन्तरतया भिन्नाभिन्नः । यदि हि ज्ञानादिधर्मेभ्यो जीवो भिन्नः स्यात्, तदा "अहं जानामि", "अहं पश्यामि", "अहं ज्ञाता", "अहं द्रष्टा", "अहं सुखितः", "अहं भव्यः" चेत्याद्यभेदप्रतिभासो न स्यात् । अस्ति च सर्वप्राणिनां सो ऽभेदप्रतिभासः । तथा यद्यभिन्नः स्यात्, तदा "अयं धर्मी", "एते धर्माः" इति भेदबुद्धिर्न स्यात् । अस्ति च सा । अथवाभिन्नतायां ज्ञानादिसर्वधर्माणामैक्यं स्यात्, एकजीवाभिन्नत्वात् । तथा च "मम ज्ञानं मम दर्शनं चास्ति" इत्यादिज्ञानादिमिथोभेदप्रतीतिर्न स्यात् । अस्ति च सा । ततो ज्ञानादिधर्मेभ्यो

भिन्नाभिन्न एवाभ्युपगन्तव्यः। अनेन धर्मधर्मिणोर्वैशेषिकाद्यभिमतं भेदैकान्तं सौगतस्वीकृतं चाभेदैकान्तं प्रतिक्षिपति, सौगतेनापि बुद्धिक्षणपरंपरारूपस्यात्मनो धर्मित्वेन स्वीकारात्॥ तथा विविधं वर्तनं विवृत्तिर्नरामरादिपर्यायान्तरानुसरणं, तद्वान् विवृत्तिमान्। अनेन भवान्तरगामिनमात्मानं प्रति त्रिप्रतिपन्नांश्चार्वाकान् कूटस्थनित्यात्मवादिनो नैयायिकादींश्चिरस्यति॥ तथा शुभाशुभानि कर्माणि करोतीति शुभाशुभकर्मकर्ता॥ तथा स्वकृतस्य कर्मणो यत्फलं सुखादिकं, तस्य साक्षाद्भोक्ता च। चकारो विशेषणानां समुच्चये। एतेन विशेषणद्वयेनाकर्तारमुपचरितवृत्त्या भोक्तारं चात्मानं मन्यमानानां सांख्यानां निरासः॥ तथा चैतन्यं साकारनिराकारोपयोगात्मकं लक्षणं स्वरूपं यस्य, स चैतन्यलक्षणः। एतेन जडस्वरूपो नैयायिकादिसंमत आत्मा व्यवच्छिद्यते। एवंविशेषणो जीवः समाख्यात इत्यत्रापि संबन्धनीयमिति॥

अत्र चार्वाकाश्चर्चयन्ति यथा। दृष्ट कायाकारपरिणतानि चेतनाकारणभूतानि भूतान्येवोपलभ्यन्ते। न पुनस्तेभ्यो व्यतिरिक्तो भवान्तरयायी यथोक्तलक्षणः कश्चनाप्यात्मा, तत्सद्भावे प्रमाणाभावात्। तथाहि। भूतव्यतिरिक्तात्मसद्भावे किं प्रत्यक्षं प्रमाणं प्रवर्तेतोतानुमानम्। न तावत्प्रत्यक्षं, तस्य प्रतिनियतेन्द्रियसंबद्धरूपादिगोचरतया तद्विलक्षणे जीवे प्रवृत्त्यनुपपत्तेः। न च "घटमहं वेद्मीत्यहंप्रत्यये ज्ञानकर्तृतयात्मा भूतव्यतिरिक्तः प्रतिभाति" इत्यभिधातव्यं, तस्य "स्थूलो ऽहं" "कृशो ऽहं" इत्यादि-

वच्छरीरविषयत्वस्यैवोपपत्तेः । न खलु तत्प्रत्ययस्यात्मालम्बनत्वमस्ति, आत्मनि स्थौल्यादिधर्मासंभवात् । तथा "घटमहं वेद्मि" इत्यस्यापि प्रत्ययस्य न शरीरादन्यो भवत्परिकल्पितः कश्चनाप्यात्मालम्बनत्वेन स्वप्नेऽपि प्रतीयते । अप्रतीतस्यापि कल्पने कल्पनागौरवं प्रतिनियतवस्तुव्यवस्थाया अभावश्च स्यात् । न च "जडरूपस्य शरीरस्य घटादेरिवाहंप्रत्ययोऽनुपपन्नः" इति वाच्यं, चेतनायोगेन तस्य सचेतनत्वात् । न च "सा चेतना जीवकर्तृका" इति वाच्यं, तस्याप्रतीतत्वात् । तत्कर्तृत्वमयुक्तं, खपुष्पादेरपि तत्प्रसङ्गात् । ततः प्रसिद्धत्वाच्छरीरस्यैव चैतन्यं प्रति कर्तृत्वं युक्तं, तदन्वयव्यतिरेकानुविधायित्वाच्च । प्रयोगश्चात्र । यत्खलु यस्यान्वयव्यतिरेकावनुकरोति तत्तस्य कार्यं, यथा घटो मृत्पिण्डस्य । शरीरस्यान्वयव्यतिरेकावनुकरोति च चैतन्यम् । तस्मात्तत्कर्तृत्वम् । अन्वयव्यतिरेकसमधिगम्यो हि सर्वत्र कार्यकारणभावः । तौ चात्र विद्येते, सति शरीरे चैतन्योपलब्धेः, असति चानुपलब्धेः । न च "मृतशरीरे चैतन्यानुपलब्धेस्तदन्वयव्यतिरेकानुविधायित्वमसिद्धं" इति वाच्यं, मृतावस्थायां वायुतेजसोरभावेन शरीरस्यैवाभावात्, विशिष्टभूतसंयोगस्यैव शरीरत्वप्रतिपादनात् । न च शरीराकारमात्रे चैतन्योत्पत्तिर्युक्ता, चित्रलिखिततरङ्गमादिष्वपि चैतन्योत्पत्तिप्रसङ्गात् । ततः सिद्धं शरीरकार्यमेव चैतन्यम् । ततश्च चैतन्यसहिते शरीर एवाहंप्रत्ययोत्पत्तिः प्रसिद्धा । इति न प्रत्यक्षप्रमेय आत्मा । ततश्चाविद्यमान एव । प्रयोगश्चात्र ।

नास्त्यात्मा, अत्यन्ताप्रत्यक्षत्वात्। यदत्यन्ताप्रत्यक्षं तन्नास्ति, यथा खपुष्पम्। यच्चास्ति तत्प्रत्यक्षेण गृह्यत एव, यथा घटः। अणवो ऽपि ह्यप्रत्यक्षाः किं तु घटादिकार्यतया परिणतास्ते प्रत्यक्षत्वमुपयान्ति, न पुनरेवमात्मा कदाचिदपि प्रत्यक्षभावमुपगच्छति। अतो ऽत्यन्तेति विशेषणमिति न परमाणुभिर्व्यभिचार इति ॥ १ ॥ तथा नाप्यनुमानं भूतव्यतिरिक्तात्मसद्भावे प्रवर्तते, तस्याप्रमाणत्वात्, प्रमाणत्वे वा प्रत्यक्षबाधितप्रयोगानन्तरं प्रयुक्तत्वेन हेतोः कालात्ययापदिष्टत्वात्। शरीरव्यतिरिक्तात्मपक्षो हि प्रत्यक्षेणैव बाध्यते। किं च। लिङ्गलिङ्गिसंबन्धस्मरणपूर्वकं ह्यनुमानम्। यथा। पूर्वं महानसादावग्निधूमयोर्लिङ्गलिङ्गिनोरन्वयव्यतिरेकबलभाविनाभावमधक्षेण गृहीता, तत उत्तरकालं क्वचित्कान्तारपर्वतनितम्बादौ गगनावलम्बिनीं धूमलेखामवलोक्य प्राग्गृहीतसंबन्धमनुस्मरति। तद्यथा। यत्र यत्र धूमस्तत्र तत्र वह्निमद्राज्ञं, यथा महानसादौ। धूमश्चात्र दृश्यते। तस्माद्वह्निनापीह भवितव्यमित्येवं लिङ्गग्रहणसंबन्धस्मरणाभ्यां तत्र प्रमाता हुतभुजमवगच्छति। न चैवमात्मना लिङ्गिना सार्धं कस्यापि लिङ्गस्य प्रत्यक्षेण संबन्धः सिद्धो ऽस्ति, यतस्तत्संबन्धमनुस्मरतः पुनस्तल्लिङ्गदर्शनाज्जीवे स प्रत्ययः स्यात्। यदि पुनर्जीवलिङ्गयोः प्रत्यक्षतः संबन्धसिद्धिः स्यात्, तदा जीवस्यापि प्रत्यक्षत्वापत्त्यानुमानवैयर्थ्यं स्यात्, तत एव जीवसिद्धेरिति। न च वक्तव्यं "सामान्यतोदृष्टानुमानादादित्यगतिवज्जीवः सिध्यति, यथा गतिमानादित्यो देशान्तरप्राप्तिदर्शनात्,

देवदत्तवत्" इति, यतो हन्त देवदत्ते दृष्टान्तधर्मिणि सामान्येन देशान्तरप्राप्तिर्गतिपूर्विका प्रत्यक्षेणैव निश्चिता। सूर्ये ऽपि तां तथैव प्रमाता साधयतीति युक्तम्। न चैवमत्र क्वचिदपि दृष्टान्ते जीवसत्त्वेनाविनाभूतः को ऽपि हेतुरध्यक्षेणोपलक्ष्यत इत्यतो न सामान्यतोदृष्टादप्यनुमानात्तद्गतिरिति ॥ २ ॥ तथा नाप्यागमगम्य आत्मा। अविसंवादिवचनात्प्रणीतत्वेन ह्यागमस्य प्रामाण्यम्। न चैवंभूतमविसंवादिवचनं कंचनाप्याप्तमुपलभामहे, यस्यात्मा प्रत्यक्ष इति। अनुपलभ्यमानाश्च कथमात्मानं विप्रलभेमहि। किं चागमाश्च सर्वे परस्परविरुद्धप्ररूपिणः। ततश्च कः प्रमाणं कस्याप्रमाणमिति संदेहदावानलज्वालावलीढमेवागमस्य प्रामाण्यम्। ततश्च नागमप्रमाणादप्यात्मसिद्धिः ॥ ३॥ तथा नोपमानप्रमाणोपमेयो ऽप्यात्मा। तत्र हि यथा गौस्तथा गवय इत्यादाविव सादृश्यमसंनिकृष्टे ऽर्थे बुद्धिमुत्पादयति। न चात्र त्रिभुवने ऽपि कश्चनात्मसदृशः पदार्थो ऽस्ति यद्दर्शनादात्मानमवगच्छामः। कालाकाशदिगादयो जीवतुल्या विद्यन्त एवेति चेत्। न, तेषामपि विवादास्पदीभूतत्वेन तदंघ्रिबद्धत्वात् ॥ ४ ॥ तथार्थापत्तिसाध्यो ऽपि नात्मा। न हि दृष्टः श्रुतो वा को ऽप्यर्थ आत्मनमन्तरेण नोपपद्यते, यद्बलात्तं साधयामः। ततः समुपलम्भकप्रमाणविषयातीतत्वात्तत्प्रतिषेधसाधकाभावाच्चाप्रमाणविषयीकृत एव जीव इति स्थितम्॥

अत्र प्रतिविधीयते। यत्तावदुक्तं 'इह कायाकारपरिणतानि भूतान्येवोपलभ्यन्ते, न पुनस्तद्व्यतिरिक्त आत्मा, तत्सद्भावे

प्रमाणाभावात्" इत्यादि, तदसमीचिताभिधानं, प्रत्यक्षस्यैव तत्सद्भावे प्रमाणस्य सद्भावात् । तथाहि । "सुखमहमनुभवामि" इत्यन्योन्यविविक्तज्ञेयज्ञातृज्ञानोल्लेखी प्रतिप्राणि स्वसंवेद्यः प्रत्ययो जायमानः संवेद्यते । न चायं मिथ्या, बाधकाभावात् । नापि संदिग्धः, उभयकोटिसंस्पर्शाभावात् । न चेत्थंभूतस्यास्यानालम्बनत्वं युक्तं, रूपादिज्ञानानामप्यनालम्बनत्वप्रसङ्गात् । नापि शरीरालम्बनत्वं, बहिःकारणनिरपेक्षान्तःकरणव्यापारेणोत्पत्तेः । न खलु शरीरमित्थंभूताहंप्रत्ययवेद्यं, बहिःकरणविषयत्वात् । अतः शरीरातिरिक्तः कश्चिदेतस्यालम्बनभूतो ज्ञानवानर्थोऽभ्युपगन्तव्यः, तस्यैव ज्ञातृत्वोपपत्तेः । स च जीव एवेति सिद्धः स्वसंवेदनवेद्याहंप्रत्ययोत्पादयुक्तः, न त्वचेतनः प्रत्यक्षलक्ष्य आत्मा ॥ तथा यदप्युक्तं "चेतनायोगेन स चेतनत्वाच्छरीरस्यैवाहंप्रत्ययः" इत्यादि, तदपि प्रलापमात्रं, यतश्चेतनायोगेऽपि स्वयं चेतनस्यैवाहंप्रत्ययोत्पादो युक्तः, न त्वचेतनस्य । यथा परःसहस्रप्रदीपप्रभायोगेऽपि स्वयमप्रकाशस्वरूपस्य घटस्य प्रकाशकत्वं न दृष्टं, किं तु प्रदीपस्यैव, एवं चेतनायोगेऽपि न स्वयमचेतनस्य देहस्य ज्ञातृत्वं, किं त्वात्मन एवेति तस्यैव चाहंप्रत्ययोत्पादः । यो ऽपि "स्थूलोऽहं" "कृशोऽहं" इत्यादिप्रत्ययः समुल्लसति, सोऽप्यात्मोपकारकत्वेन शरीरे जायमान औपचारिक एव, अत्यन्तोपकारके भृत्ये "अहमेवायं" इति प्रत्ययवत् ॥ तथा शरीरस्यैव चैतन्यं प्रति "कर्तृत्वं" इत्यादि यदप्यवादि वादिब्रुवेण, तदप्युन्मत्तवचनरचनामात्रमेव, चेतनायाः शरीरेण

सहान्वयव्यतिरेकाभावात्। मत्तमूर्च्छितप्रसुप्तानां तादृग्शरीरसद्भावेऽपि न तथाविधं चैतन्यमुपलभ्यते। दृश्यते च केषांचित् कृशतरशरीराणामपि चेतनाप्रकर्षः, केषांचित् स्थूलदेहानामपि तदपकर्षः। ततो न तदन्वयव्यतिरेकानुविधायि चैतन्यम्। अतो न तत्कार्यम्। किं च। न हि चैतन्यस्य भूतकार्यत्वे किमपि प्रमाणमुपलक्षयामहे। तथाहि। न तावत्प्रत्यक्षं, अतीन्द्रियविषये तदप्रवर्तनात्। न ह्युत्पन्नमनुत्पन्नं वा चैतन्यं भूतानां कार्यमिति प्रत्यक्षव्यापारमुपैति, तस्य स्वयोग्यसन्निहितार्थग्रहणरूपत्वात्, चैतन्यस्य चामूर्तत्वेन तदयोग्यत्वात्। न च "भूतानामहं कार्यं" इत्येवमात्मविषयं भूतकार्यत्वं प्रत्यक्षमवगन्तुमलं, कार्यकारणभावस्यान्वयव्यतिरेकसमधिगम्यत्वात्। न च भूतचैतन्यातिरिक्तः कश्चिदन्वयी तदुभयान्वयव्यतिरेकज्ञाताभ्युपगम्यते, आत्मसिद्धिप्रसङ्गात्॥ तथा नानुमानेनापि चैतन्यस्य भूतकार्यत्वं प्रतीयते, तस्यानभ्युपगमात्, प्रत्यक्षमेवैकं प्रमाणं नान्यदिति वचनात्। अभ्युपगमेऽपि न ततो विवक्षितार्थप्रतीतिसिद्धिः। ननु कायाकारपरिणतेभ्यो भूतेभ्यश्चैतन्यं समुत्पद्यते, तद्भाव एव चैतन्यभावात्, मद्याङ्गेभ्यो मदशक्तिवदित्याद्यनुमानाङ्गत्वेव चैतन्यस्य भूतकार्यत्वसिद्धिरिति चेत्। न, तद्भाव एव तद्भावादिति हेतोरनैकान्तिकत्वात्, मृतावस्थायां तद्भावेऽपि चैतन्यस्याभावात्। स्यादेतत्, पृथिव्यप्तेजोवायुलक्षणभूतचतुष्टयसमुदयजन्यं हि चैतन्यं, न च मृतशरीरे वायुरस्ति, ततस्तदभावात्तत्र चैतन्याभाव इति न तत्र व्यभिचारः।

अत्रोच्यते यति । शुषिरे तत्र वातः सुतरां संभाव्यत एव । किं च । यदि तत्र वायुवैकल्याच्चैतन्यस्याभावः, ततो बस्त्यादिभिः संपादिते वायौ तत्र चैतन्यमुपलभ्येत । न च तत्र तत्संपादिते ऽपि वायौ चैतन्यमुपलभ्यते अथ प्राणापानलक्षणवायोरभावान्न तत्र चैतन्यमिति चेत् । न, अन्वयव्यतिरेकानुविधायित्वाभावान्न प्राणापानवायोश्चैतन्यं प्रति हेतुता, यतो मरणावस्थायां प्रचुरतरदीर्घश्वासोच्छ्वाससंभवे ऽपि चैतन्यस्यात्यन्तपरिक्षयः । तथा ध्यानस्तिमितलोचनस्य संवृतमनोवाक्कायव्यापारस्य निस्तरङ्गमहोदधिकल्पस्य योगिनो निरुद्धप्राणापानस्यापि परमप्रकर्षप्राप्तचैतन्योपचयः समुपलभ्यते । अथ तेजसो ऽभावान्न मृतावस्थायां चैतन्यमिति चेत्, तर्हि तत्र तेजस्युपनीते सति कथं न चेतनोपलभ्यते । किं च । मृतावस्थायां यदि वायुतेजसोरभावेन चैतन्याभावो ऽभ्युपगम्यते, तर्हि मृतशरीरे कियद्देशानन्तरं समुत्पन्नानां कृम्यादीनां कथं चैतन्यम् । ततो यत्किंचिदेतत् । किं च । न चैतन्यं भूतमात्रकारणम् । तथा सति चैतन्यस्य भूतमात्रजन्यस्वभावत्वात् तेषामपि तज्जननस्वभावत्वात् सर्वदा सर्वत्र घटादौ पुरुषादिष्विव व्यक्तचैतन्योत्पादो भवेत्, निमित्तविशेषात् । एवं च घटादिपुरुषयोरविशेषः स्यात् । ननु कायाकारपरिणामप्राणापानपरिणतवह्नो भूतेभ्यश्चैतन्यमुपलभ्यत इति वचनान्न पूर्वोक्तो ऽतिप्रसङ्गदोषावकाश इति चेत् । तन्न, त्वन्मते कायाकारपरिणामस्यैवानुपपद्यमानत्वात् । तथाहि । स कायाकारपरिणामः किं पृथिव्यादिभूतमात्रनिबन्धन उत वस्त्व-

न्तरनिमित्त उताहेतुक इति त्रयी गतिः । तत्र न तावदाद्यः पक्षः कर्त्तुमीकरणीयः, पृथिव्यादिसत्तायाः सर्वत्र सद्भावात् सर्वत्रापि कायाकारपरिणामप्रसङ्गः । तथाविधसाम्यादिभावसहकारिकारणवैकल्यान्न सर्वत्र तत्प्रसङ्ग इति चेत् । तन्न, यतः सोऽपि साम्यादिभावो न वस्त्वन्तरनिमित्तः, तत्त्वान्तरापत्तिप्रसङ्गात्; किं तु पृथिव्यादिसत्तामात्रनिमित्तः, अतस्तस्यापि सर्वत्राप्यविशेषेण भावप्रसङ्गात् कुतः सहकारिकारणवैकल्यमिति। अथ "वस्त्वन्तरनिमित्तः" इति पक्षस्तदप्ययुक्तं, तथाभ्युपगमे जीवसिद्धिप्रसङ्गात् । अथाहेतुकः, तर्हि सदाभावादिप्रसङ्गः, नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणादिति वचनात् । तन्न तन्मते कायाकारपरिणामः संगच्छते । तदभावे तु दूरोत्सारितमेव प्राणापानपरिग्रहवत्त्वममीषां भूतानामिति चैतन्यं न भूतकार्यमित्यतो जीवगुण एव चेतनेत्यभ्युपगन्तव्यम् । किं च । गुणप्रत्यक्षत्वादात्मापि गुणी प्रत्यक्ष एव । प्रयोगो यथा । प्रत्यक्ष आत्मा, स्मृतिजिज्ञासाचिकीर्षाजिगमिषासंशयादिज्ञानविशेषाणां तद्गुणानां स्वसंवेदनप्रत्यक्षत्वात् । इह यस्य गुणाः प्रत्यक्षाः स प्रत्यक्षो दृष्टः, यथा घट इति । प्रत्यक्षगुणश्च जीवः । तस्मात्प्रत्यक्षः ॥ अत्राह परः । अनैकान्तिको ऽयं हेतुः, यत आकाशगुणः शब्दः प्रत्यक्षः, न पुनराकाशम् । तदयुक्तं, यतो नाकाशगुणः शब्दः किं तु पुद्गलगुणः, ऐन्द्रियकत्वात्, रूपादिवत् । एतच्च पुद्गलविचारे समर्थयिष्यते । अत्राह । ननु भवतु गुणानां प्रत्यक्षत्वात्तदभिन्नत्वाद्गुणिनो ऽपि

प्रत्यक्षत्वम् । किं तु देह एव ज्ञानादयो गुणा उपलभ्यन्ते । अतः स एव तेषां गुणी युक्तः, यथा रूपादीनां घटः । प्रयोगो यथा । ज्ञानादयो देहगुणा एव, तत्रैवोपलभ्यमानत्वात्, गौरकृष्णस्थूलत्वादिवत् । अत्रोच्यते । प्रत्यनुमानबाधितो ऽयं पक्षाभासः । तच्चेदम् । देहस्य गुणा ज्ञानादयो न भवन्ति, तस्य मूर्तत्वाच्चाक्षुषत्वाद्वा, घटवत् । अतः सिद्धो गुणप्रत्यक्षत्वाद्गुणी जीवो ऽपि प्रत्यक्षः । ततश्चाहंप्रत्ययग्राह्यं प्रत्यक्षमात्मानं निह्नुवानस्याश्रावणः शब्द इत्यादिवत् प्रत्यक्षविरुद्धो नाम पक्षाभासः । तथा वक्ष्यमाणात्मास्तित्वानुमानसद्भावात् नित्यः शब्द इत्यादिवदनुमानविरुद्धो ऽपि आबालगोपालाङ्गनादिप्रसिद्धं चात्मानं निराकुर्वतः "नास्ति सूर्यः प्रकाशकर्ता" इत्यादिवल्लोकविरोधः । "अहं नाहं" चेति गदतः "माता मे बन्ध्या" इत्यादिवत् स्ववचनविरोधश्च । तथा प्रतिपादितयुक्त्यात्मनः स्वसंवेदनप्रत्यक्षत्वादत्यन्ताप्रत्यक्षत्वादिति हेतुरप्यसिद्ध इति स्थितम् ॥ तथानुमानगम्यो ऽप्यात्मा । तानि चामूनि । जीवच्छरीरं प्रयत्नवताधिष्ठितं, इच्छानुविधायिक्रियाश्रयत्वात्, रथवत् । १ । श्रोत्रादीन्युपलब्धिसाधनानि कर्त्रधीन्यानि, करणत्वात्, वास्यादिवत् । २ । देहस्यास्ति विधाता, आदिमत्प्रतिनियताकारत्वात्, घटवत् । यत्पुनरकर्त्रकं तदादिमत्प्रतिनियताकारमपि न भवति, यथाभ्रविकारः । यः स्वदेहस्य कर्ता स जीवः । प्रतिनियताकारत्वं मेर्वादीनामप्यस्ति न च तेषां कश्चिद्विधातेति तैरनैकान्तिको हेतुः स्यात् । अतस्तद्व्यवच्छेदार्थमादिम-

त्वविशेषणं द्रष्टव्यम्। ३। तथेन्द्रियाणामस्त्यधिष्ठाता, करणत्वात्, यथा दण्डचक्रादीनां कुलालः। ४। विद्यमानभोक्तृकं शरीरं, भोग्यत्वात्, भोजनवत्। यस्य भोक्ता स जीवः। ५। अथ साध्यविरुद्धसाधकत्वाद्विरुद्धा एवैते हेतवः। तथाहि। घटादीनां कर्त्रादिरूपाः कुम्भकारादयो मूर्ता अनित्यादिस्वभावाश्च दृष्टा इति। अतो जीवोऽप्येवंविध एव सिध्यति। एतद्विपरीतस्य जीव दृष्ट इति। अतः साध्यविरुद्धसाधकत्वाद्विरुद्धत्वं हेतूनामिति चेत्। न, यतः खलु संसारिणो जीवस्याष्टकर्मपुद्गलवेष्टितत्वेन सशरीरत्वात् कथंचिन्मूर्तत्वान्नायं दोषः। तथा रूपादिज्ञानं क्वचिदाश्रितं, गुणत्वात्, रूपादिवत्। ६। तथा ज्ञानसुखादिकमुपादानकारणपूर्वकं, कार्यत्वात्, घटादिवत्। ७। न च शरीरे तदाश्रितत्वस्य तदुपादानत्वस्य चेष्टत्वात्सिद्धसाधनमित्यभिधातव्यं, तच्च तदाश्रितत्वतदुपादानत्वयोः प्राक्प्रतिव्यूढत्वात्। तथा प्रतिपत्तृमानयमजीवशब्दः, व्युत्पत्तिमच्छुद्धपदप्रतिषेधात्। यच्च व्युत्पत्तिमतः शुद्धपदस्य प्रतिषेधो दृश्यते स प्रतिपत्तृमान्। यथाघटो घटप्रतिपत्तृमान्। अत्र ह्यघटप्रयोगे शुद्धस्य व्युत्पत्तिमतश्च घटस्य पदस्य प्रतिषेधः। अतोऽवश्यं घटलक्षणेन प्रतिपत्तृणा भाव्यम्। यस्तु न प्रतिपत्तृमान्, न तत्र व्युत्पत्तिमतः शुद्धपदस्य प्रतिषेधः, यथाखरविषाणशब्द अडित्थ इति वा। अखरविषाणमित्यत्र खरविषाणलक्षणस्याशुद्धस्य सामायिकस्य पदस्य निषेधः। अत्र व्युत्पत्तिमत्त्वे सत्यपि शुद्धपदत्वाभावादिपक्षो नास्ति। अडित्थ

दृत्यत्र तु व्युत्पत्तिमत्त्वाभावात् सत्यपि शुद्धपदत्वे नावश्यं डित्थ-
लक्षणः कश्चित्पदार्थो जीववद्विपक्षभूतो ऽस्तीति। ८। तथा स्वश-
रीरे स्वसंवेदनप्रत्यक्षमात्मानं साधयित्वा परशरीरे ऽपि सामान्य-
तोदृष्टानुमानेन साध्यते। यथा। परशरीरे ऽप्यस्त्यात्मा, दृष्टा-
निष्टयोः प्रवृत्तिनिवृत्तिदर्शनात्, यथा स्वशरीरे। दृश्येते च पर- 5
शरीर दृष्टानिष्टयोः प्रवृत्तिनिवृत्ती। तस्मात्सात्मकं, आत्माभावे
तयोरभावात्, यथा घट इति। एतेन यदुक्तं "न सामान्यतो-
दृष्टानुमानादप्यात्मसिद्धिः" इत्यादि, तदप्यपास्तं द्रष्टव्यम्। ९।
तथा नास्ति जीव इति यो ऽयं जीवनिषेधध्वनिः स जीवास्ति-
त्वेनान्तरीयक एव, निषेधशब्दत्वात्। यथा नास्त्यत्र घट इति 10
शब्दो ऽन्यत्र घटास्तित्वाविनाभाव्येव। प्रयोगश्चात्र। इह यस्य
निषेधः क्रियते तत्कचिदस्त्येव, यथा घटादिकम्। निषिध्यते
च भवता "नास्ति जीवः" इतिवचनात्। तस्मादस्त्येवासौ।
यच्च सर्वथा नास्ति, तस्य निषेधो ऽपि न दृश्यते, यथा पञ्च-
भूतातिरिक्तषष्ठभूतस्येति। नन्वसतो ऽपि खरविषाणादेर्निषेध- 15
दर्शनादनैकान्तिको ऽयं हेतुरिति चेत्। न। इह यत्किमपि
वस्तु निषिध्यते, तस्यान्यत्र सत एव विवक्षितस्थाने संयोग-१-
समवाय-२-सामान्य-३-विशेष-४-लक्षणं चतुष्टयमेव निषि-
ध्यते, न तु सर्वथा तदभावः प्रतिपाद्यते। यथा नास्ति गृहे
देवदत्त इत्यादिषु गृहे देवदत्तादीनां सतामेव संयोगमात्रं 20
निषिध्यते, न तु तेषां सर्वथैवास्तित्वमपाक्रियते। तथा
नास्ति खरविषाणमित्यादिषु खरविषाणादीनां सतामेव सम-

वायमात्रं निराक्रियते । तथा नास्त्यन्यश्चन्द्रमा इत्यादिषु विद्यमानस्यैव चन्द्रमसोऽन्यचन्द्रनिषेधाच्चन्द्रसामान्यमात्रं निषिध्यते न तु सर्वथा चन्द्राभावः प्रतिपाद्यते । तथा न सन्ति घटप्रमाणानि मुक्ताफलानीत्यादिषु घटप्रमाणतामात्ररूपो विशेषो मुक्ताफलानां निषिध्यते, न तु तद्भावः ख्याप्यत इति । एवं नास्त्यात्मेत्यत्रापि विद्यमानस्यैवात्मनो यत्र क्वचन येन केनचित्सह संयोगमात्रमेव त्वया निषेद्धव्यं, यथा नास्त्यात्मास्मिन् वपुषीत्यादि, न तु सर्वथात्मनोऽसत्त्वमिति । अत्राह कश्चित् । ननु यदि यन्निषिध्यते तदस्ति, तर्हि मम त्रिलोकेश्वरताप्यस्तु, युष्मदादिभिर्निषिध्यमानत्वात् । तथा चतुर्णां संयोगादिप्रतिषेधानां पञ्चमोऽपि प्रतिषेधप्रकारोऽस्ति, त्वयैव निषिध्यमानत्वात् । तदयुक्तम् । त्रिलोकेश्वरताविशेषमात्रं भवतो निषिध्यते, यथा घटप्रमाणत्वं मुक्तानां, न तु सर्वथेश्वरता, स्वग्निष्यादीश्वरतायास्त्वयापि विद्यमानत्वात् । तथा प्रतिषेधस्यापि पञ्चसंख्याविशिष्टत्वमविद्यमानमेव निवार्यते । न तु सर्वथा प्रतिषेधस्याभावश्चतुःसंख्याविशिष्टस्य सद्भावात् । न तु सर्वमप्यसंबद्धमिदम् । तथाहि । मन्त्रिलोकेश्वरत्वं तावदस्यैव निषिध्यते प्रतिषेधस्यापि पञ्चसंख्याविशिष्टत्वमपि अविद्यमानमेव निवार्यते । तथा संयोगसमवायसामान्यविशेषाणामपि गृहदेवदत्तखरविषाणादिष्वसतामेव प्रतिषेध इति । अतो यन्निषिध्यते तदस्त्येवेत्येतत्कथं न श्रवत इति । अत्रोच्यते । देवदत्तादीनां संयोगादयो गृहादिष्वेवासंतो निषिध्यन्ते । अर्थान्तरे तु तेषां

ते सन्त्येव। तथाहि। गृहेणैव सह देवदत्तस्य संयोग विद्यते, अर्थान्तरेण वारामादिना वर्तत एव। गृहस्यापि देवदत्तेन सह संयोगो नास्ति, खट्वादिना तु विद्यत एव। एवं विषाणस्यापि खर एव समवायसंयोगो नास्ति, गवादावस्त्येव। सामान्यमपि द्वितीयचन्द्राभावश्चन्द्र एव नास्ति, अर्थांतरे तु घटादावस्त्येव। घटप्रमाणत्वमपि मुक्तासु नास्ति, अन्यत्र विद्यत एव। त्रिलोकेश्वरतापि भवत एव नास्ति, तीर्थकारादावस्त्येव। पञ्चसंख्याविशिष्टत्वमपि प्रतिषेधप्रकारेषु नास्ति, अनुत्तरविमानादावस्त्येवेत्यनया विवक्षया ब्रूमः "यन्निषिध्यते तत्सामान्येन विद्यत एव"। न त्वेवं प्रतिजानीमहे यद्यत्र निषिध्यते तत्तत्रैवास्तीति येन व्यभिचारः स्यादेवं सत एव जीवस्य यत्र क्वापि निषेधः स्यान्न पुनः सर्वत्रेति। तथास्ति देहेन्द्रियातिरिक्त आत्मा, इन्द्रियोपरमेऽपि तदुपलब्धार्थानुस्मरणात्, पञ्चवातायनोपलब्धार्थानुस्मर्तृदेवदत्तवत्। इति सिद्धमनुमानग्राह्य आत्मेति॥ अनुमानग्राह्यत्वे सिद्धे तदन्तर्भूतत्वेनागमोपमानार्थापत्तिग्राह्यतापि सिद्धा॥ किं च "प्रमाणपञ्चकाभावेन" इत्यादि यदप्यवादि, तदपि मदिराप्रमादिविलसितसोदरं, यतो हिमवदुत्पलपरिणामादीनां पिशाचादीनां च प्रमाणपञ्चकाभावेऽपि विद्यमानत्वादिति। अतो यच्च प्रमाणपञ्चकाभावस्तदसदेवेत्यनैकान्तिकम्। इति सिद्धः प्रत्यक्षादिप्रमाणग्राह्य आत्मा। स च विवृत्तिमान्परलोकयायी। तच्च चानुमानमिदम्। तद्यथा जातबालकस्याद्यस्तन्याभिलाषः पूर्वाभिलाषपूर्वकः, अभिलाषत्वात्,

द्वितीयदिनाद्यक्षणाभिलाषवत्। तदिदमनुमानमाद्यक्षणाभिलाषस्याभिलाषान्तरपूर्वकत्वमनुमापयदर्थापत्त्या परलोकगामिनं जीवमाक्षिपति, तज्जन्मन्यभिलाषान्तराभावादिति स्थितम्॥

तथा कूटस्थनित्यताप्यात्मनो न घटते, यतो यथाविधः पूर्वदृग्यायमात्मा, तथाविध एव चेज्ज्ञानोत्पत्तिसमयेऽपि भवेत्, तदा प्रागिव कथमेष पदार्थपरिच्छेदकः स्यात्, प्रतिनियतस्वरूपाप्रच्युतिरूपत्वात्कौटस्थ्यस्य। पदार्थपरिच्छेदे तु प्रागप्रमातुः प्रमातृरूपतया परिणामात्कुतः कौटस्थ्यमिति॥

तथा सांख्याभिमतमकर्तृत्वमप्ययुक्तम्। तथाहि। कर्तात्मा, स्वकर्मफलभोक्तृत्वात्। यः स्वकर्मफलभोक्ता स कर्तापि दृष्टः। यथा क्षपीवलः। तथा सांख्यकल्पितः पुरुषो वस्तु न भवति, अकर्तृकत्वात्, खपुष्पवत्। किं चात्मा भोक्तृत्वीक्रियते स च भुजिक्रियां करोति न वा। यदि करोति तदापराभिः क्रियाभिः किमपराद्धम्। अथ भुजिक्रियामपि न करोति, तर्हि कथं भोक्तेति चिन्त्यम्। प्रयोगश्चात्र। संसार्यात्मा भोक्ता न भवति, अकर्तृत्वात्, मुक्तात्मवत्। अकर्तृभोक्तृत्वाभ्युपगमे च कृतनाशाकृताभ्यागमादिदोषप्रसङ्गः। प्रकृत्या कृतं कर्म न च तस्याः फलेनाभिसंबन्ध इति कृतनाशः। आत्मना च तन्न कृतमथ च तत्फलेनाभिसंबन्ध इत्यकृताभ्यागम इत्यात्मनः कर्तृत्वमङ्गीकर्तव्यम्॥

तथा जडस्वरूपत्वमप्यात्मनो न घटते, तद्बाधकानुमानसद्भावात्। तथाहि। अनुपयोगस्वभाव आत्मा नार्थपरिच्छेदकर्ता,

अचेतनत्वात्, गगनवत्। अथ चेतनासमवायात्परिच्छिनत्तीति चेत्, तर्हि यथात्मनश्चेतनासमवायाज्ज्ञातृत्वं, तथा घटस्यापि ज्ञातृत्वप्रसङ्गः, समवायस्य नित्यस्यैकस्य व्यापिनः सर्वत्राप्यविशेषादित्यत्र बहु वक्तव्यम्। तत्तु नोच्यते, ग्रन्थगौरवभयात्। ततश्चात्मनः पदार्थपरिच्छेदकलमङ्गीकुर्वाणैश्चैतन्यस्वरूपताया गले पादिकान्यायेन प्रतिपत्तव्येति स्थितं चैतन्यलक्षणो जीव इति॥

जीवश्च पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियभेदान्नवविधः। ननु भवतु जीवलक्षणोपेतत्वाद्द्वीन्द्रियादीनां जीवत्वं, पृथिव्यादीनां तु जीवत्वं कथं श्रद्धेयं, व्यक्तलिङ्गस्यानुपलब्धेरिति चेत्। सत्यं; यद्यपि तेषु व्यक्तं जीवलिङ्गं नोपलभ्यते, तथाप्यव्यक्तं तत्समुपलभ्यत एव। यथा हत्पूरव्यतिमिश्रमदिरापानादिभिर्मूर्छितानां व्यक्तलिङ्गाभावेऽपि सजीवत्वमव्यक्तलिङ्गैर्व्यवह्रियते, एवं पृथिव्यादीनामपि सजीवत्वं व्यवहरणीयम्। ननु मूर्छितेषूच्छ्वासादिकमव्यक्तं चेतनालिङ्गमस्ति, न पुनः पृथिव्यादिषु तथाविधं किंचिच्चेतनालिङ्गमस्ति। नैतदेवं, पृथिवीकाये तावत्खरखराकारावस्थितानां लवणविद्रुमोपलादीनां समानजातीयाङ्कुरोत्पत्तिमत्त्वमर्शोमांसाङ्कुरस्येव चेतनाचिह्नमस्त्येव। अव्यक्तचेतनानां हि संभावितैकचेतनालिङ्गानां वनस्पतीनामिव चेतनाभ्युपगन्तव्या। वनस्पतेश्च चैतन्यं विभिष्टर्तुफलप्रदत्वेन स्पष्टमेव। साधयिष्यते च। ततोऽव्यक्तोपयोगादिलक्षणसद्भावात्सचित्ता पृथिवीति स्थितम्। ननु च विद्रुम-

पाषाणादिपृथिव्याः कठिनपुद्गलात्मिकायाः कथं सचेतनत्वमिति चेत्। नैवं। उच्यते। यथास्थि शरीरानुगतं सचेतनं कठिनं च दृष्टं, एवं जीवानुगतं पृथिवीशरीरमपीति। अथवा पृथिव्यप्तेजोवायुवनस्पतयो जीवशरीराणि, छेद्यभेद्योत्क्षेप्यभोग्यप्रेक्षणीयस्पृश्यद्रव्यत्वात्, सास्नाविषाणादिसंघातवत्। न हि पृथिव्यादीनां छेद्यत्वादि दृष्टमपह्नोतुं शक्यम्। न च पृथिव्यादीनां जीवशरीरत्वमनिष्टं साध्यते, सर्वस्य पुद्गलद्रव्यस्य शरीरत्वाभ्युपगमात्। जीवसहितत्वासहितत्वं च विशेषः। अथ शस्त्रोपहतं पृथिव्यादिकं कदाचित्सचेतनं संघातत्वात्, पाणिपादसंघातवत्। तदेवं कदाचित्किंचिदचेतनमपि, शस्त्रोपहतत्वात्, पाण्यादिवदेव; न चात्यन्तं तदचित्तमेवेति॥

अथ नाप्कायो जीवः, तल्लक्षणायोगात्, प्रस्रवणादिवदिति चेत्। नैवं, हेतोरसिद्धत्वात्। यथा हि हस्तिनः शरीरं कललावस्थायामधुनोत्पन्नस्य द्रवं चेतनं च दृष्टं, एवमप्कायोऽपि, यथा वाण्डके रसमात्रसंजातावयवमनभिव्यक्तचक्षुरादिप्रविभागं चेतनावद्दृष्टम्। एषैव चोपमाजीवानामपि। प्रयोगश्चायम्। सचेतना आपः शस्त्रानुपहतत्वे सति द्रवत्वात्, हस्तिशरीरोपादानभूतकललवत्। हेतोर्विशेषणोपादानात् प्रस्रवणादिव्युदासः। १। तथा सात्मकं तोयमनुपहतद्रवत्वात्, अण्डकमध्यस्थितकललवदिति। २। इदं वा प्राग्वज्जीववच्छरीरत्वे सिद्धे सति प्रमाणम्। सचेतना हिमादयः क्वचित्, अप्कायत्वात्, इतरोदकवदिति। तथा क्वचन चेतनावत्य आपः, खातभूमि-

स्वाभाविकसंभवात्, दर्दुरवत् । अथवा सचेतना अन्तरिक्षोद्भवा आपः, अभ्रादिविकारे स्वत एव संभूय पातात्, मत्स्यवदिति । तथा शीतकाले भृशं शीते पतति नद्यादिष्वल्पे ऽल्पो बहौ बहुर्बहुतरे च बहुतरो य ऊष्मा संवेद्यते, स जीवहेतुक एव, अल्पबहुबहुतरमिलितमनुष्यशरीरेष्वल्पबहुबहुतरोष्मवत् । प्रयोगश्चायम् । शीतकाले जलेषूष्म उष्णस्पर्शवस्तुप्रभवः, उष्णस्पर्शत्वात्, मनुष्यशरीरोष्णस्पर्शवत् । न च जलेष्वयमुष्णस्पर्शः सहजः, "अप्सु स्पर्शः शीत एव" इति वैशेषिकादिवचनात् । तथा शीतकाले शीते स्फीते निपतति प्रातस्तटाकादेः पश्चिमायां दिशि स्थित्वा यदा तटाकादिकं विलोक्यते, तदा तज्जलान्निर्गतो वाष्पसंभारो दृश्यते । सो ऽपि जीवहेतुक एव । प्रयोगस्त्वित्थम् । शीतकाले जलेषु बाष्प उष्णस्पर्शवस्तुप्रभवः, वाष्पत्वात्, शीतकाले शीतलजलसिक्तमनुष्यशरीरबाष्पवत् । प्रयोगद्वये ऽपि यदेवोष्णस्पर्शस्य बाष्पस्य च निमित्तमुष्णस्पर्शं वस्तु, तदेव तैजसशरीरोपेतमात्माख्यं वस्तु प्रतिपत्तव्यं, जलेष्वन्यस्योष्णस्पर्शबाष्पयोर्निमित्तस्य वस्तुनो ऽभावात् । न च शीतकाल उत्कुरुडिकावकरतलगतोष्णस्पर्शेन तन्मध्यनिर्गतबाष्पेण च प्रकृतहेतोर्व्यभिचारः शङ्क्यः, तयोरप्यवकरमध्योत्पन्नमृतजीवशरीरनिमित्तत्वाभ्युपगमात् । ननु मृतजीवानां शरीराणि कथमुष्णस्पर्शबाष्पयोर्निमित्तीभवन्तीति चेत् । उच्यते । यथाग्निदग्धपाषाणखण्डिकासु जलप्रक्षेपे विध्यातादप्यग्नेरुष्णस्पर्शबाष्पौ भवेतां, तथा शीतसंयोगे मृत्यूत्तरापीति । एवमन्यत्रापि बाष्पोष्ण-

स्पर्शयोर्निमित्तं सचित्तमचित्तं वा यथासंभवं वक्तव्यम्। इत्थमेव च शीतकाले पर्वतनितम्बस्य निकटे वृक्षादीनामधस्ताच्च य ऊष्मा संवेद्यते, सो ऽपि मनुष्यवपुरूष्मवज्जीवहेतुरेवावगन्तव्यः। एवं ग्रीष्मकाले बाह्यतापेन तैजसशरीररूपाग्नेर्मन्दीभवनात् जलादिषु यः शीतलस्पर्शः, सो ऽपि मानुषशरीरशीतलस्पर्शवज्जीवहेतुको ऽभ्युपगमनीयः। तत एवंविधलक्षणभाक्त्वाज्जीवा भवन्त्याप्कायाः॥ २॥

यथा रात्रौ खद्योतकस्य देहपरिणामो जीवप्रयोगनिर्वृत्तशक्तिराविष्कास्ति, एवमङ्गारादीनामपि प्रतिविशिष्टप्रकाशादिशक्तिरनुमीयते जीवप्रयोगविशेषाविर्भावितेति। यथा वा ज्वरोष्मा जीवप्रयोगं नातिवर्तते, एषैवोपमाग्नेयजन्तूनां, न च मृता ज्वरिणः क्वचिदुपलभ्यन्ते; एवमन्वयव्यतिरेकाभ्यामग्नेः सचित्तता ज्ञेया। प्रयोगश्चात्र। आत्मसंयोगाविर्भूतोऽङ्गारादीनां प्रकाशपरिणामः, शरीरस्थत्वात्, खद्योतदेहपरिणामवत्।१। तथात्मसंयोगपूर्वको ऽङ्गारादीनामूष्मा, शरीरस्थत्वात्, ज्वरोष्मवत्। न चादित्यादिभिरनेकान्तः, सर्वेषामुष्णस्पर्शस्यात्मसंयोगपूर्वकत्वात्।२। तथा सचेतनं तेजः, यथायोग्याहारोपादानेन वृद्ध्यादिविकारोपलम्भात्, पुरुषवपुर्वत्। एवमादिलक्षणैराग्नेयजन्तवोऽवसेयाः॥ ३॥

यथा देवस्य स्वशक्तिप्रभावान्मनुष्याणां चाञ्जनविद्यामन्त्रैरन्तर्धाने शरीरं चक्षुषानुपलभ्यमानमपि विद्यमानं चेतनावच्चाध्यवसीयते, एवं वायावपि चक्षुर्ग्राह्यं रूपं न भवति, सूक्ष्म-

परिणामात्, परमाणोरिव वह्निदग्धपाषाणखण्डिकागताचित्ताग्नेरिव वा। प्रयोगश्चायम्। चेतनावान् वायुः, अपरप्रेरिततिर्यगनियमितदिग्गतिमत्त्वात्, गवाश्वादिवत्। तिर्यगेव गमननियमादनियमितविशेषणोपादानाच्च परमाणुना न व्यभिचारः, तस्य नियमितगतिमत्त्वात्, जीवपुद्गलयोरनुश्रेणिरिति वचनात्। एवं वायुरग्रस्तोपहतस्वेतनावानवगन्तव्यः॥ ४॥

बकुलाशोकचम्पकाद्यनेकविधवनस्पतीनामेतानि शरीराणि न जीवव्यापारमन्तरेण मनुष्यशरीरसमानधर्मभाञ्जि भवन्ति। तथाहि। यथा पुरुषशरीरं बालकुमारयुववृद्धतापरिणामविशेषवत्त्वाच्चेतनावदधिष्ठितं प्रस्पष्टचेतनाकमुपलभ्यते, तथेदं वनस्पतिशरीरम्। यतो जातः केतकतरुर्बालको युवा वृद्धश्च संदृश्त इति, अतः पुरुषशरीरतुल्यत्वात् सचेतनो वनस्पतिरिति। तथा, यथेदं मनुष्यशरीरमनवरतं बालकुमारयुवाद्यवस्थाविशेषैः प्रतिनियतं वर्धते, तथेदमपि वनस्पतिशरीरमङ्कुरकिसलयशाखाप्रशाखादिभिर्विशेषैः प्रतिनियतं वर्धत इति। तथा, यथा मनुष्यशरीरं ज्ञानेनानुगतं, एवं वनस्पतिशरीरमपि, यतः शमीप्रपुन्नाटबिल्वेसरकासुन्दकबप्पूलागस्त्यामलकीकडिप्रभृतीनां स्वापविबोधतस्तद्भावः। तथाधोनिखातद्रविणराशेः स्वप्ररोहेणावेष्टनम्। तथा वटपिप्पलनिम्बादीनां प्रावृड्जलधरनिनादग्निशिखावायुसंस्पर्शादङ्कुरोद्भेदः। तथा मत्तकामिनीसनूपुरसुकुमारचरणताडनादशोकतरोः पल्लवकुसुमोद्भेदः। तथा युवत्यालिङ्गनात् पनसस्य। तथा सुरभिसुरा-

गण्डूषसेकाद्वकुलस्य। तथा सुरभिनिर्मलजलसेकाच्चम्पकस्य। तथा कटाक्षवीक्षणात्तिलकस्य। तथा पञ्चमस्वरोद्गाराच्छिरीषस्य विरहकस्य च पुष्पविकिरणम्। तथा पद्मादीनां प्रातर्विकसनं, घोषातक्यादिपुष्पाणां च संध्यायां, कुमुदादीनां तु चन्द्रोदये। तथासन्नमेघप्रवृष्टौ भ्रम्या अवक्षरणम्। तथा वल्लीनां वृत्त्याद्याश्रयोपसर्पणम्। तथा लज्जालूप्रभृतीनां हस्तादिसंस्पर्शात्पत्रसंकोचादिका परिस्फुटा क्रियोपलभ्यते। अथवा सर्ववनस्पतेर्विभिष्टर्तुष्वेव फलप्रदानं, न चैतदनन्तराभिहितं तरुसंबन्धि क्रियाजातं ज्ञानमन्तरेण घटते। तस्मात्सिद्धं चेतनावत्त्वं वनस्पतेरिति। तथा, यथा मनुष्यशरीरं हस्तादिच्छिन्नं शुष्यति, तथा तरुशरीरमपि पल्लवकुसुमादिच्छिन्नं विशेषमुपगच्छदृष्टम्। न चाचेतनानामयं धर्म इति। तथा, यथा मनुष्यशरीरं स्तनक्षीरव्यञ्जनौदनाद्याहाराभ्यवहारादाहारकं, एवं वनस्पतिशरीरमपि भूजलाद्याहाराभ्यवहारादाहारकम्। न चैतदाहारकत्वमचेतनानां दृष्टम्। अतस्तत्सद्भावात्सचेतनत्वमिति। तथा, यथा मनुष्यशरीरं नियतायुष्कं, तथा वनस्पतिशरीरमपि नियतायुष्कम्। तथाह्यस्य दशवर्षसहस्राण्युत्कृष्टमायुः। तथा, यथा मनुष्यशरीरमिष्टानिष्टाहारादिप्राप्त्या वृद्धिहान्यात्मकं, तथा वनस्पतिशरीरमपि। तथा, यथा मनुष्यशरीरस्य तत्तद्रोगसंपर्काद्रोगपाण्डुत्वोदरवृद्धिशोफकृशत्वाङ्गुलिनासिकानिम्नीभवनविगलनादि, तथा वनस्पतिशरीरस्यापि तथाविधरोगोद्भवात्पुष्पफलपत्रत्वगाद्यन्यथाभवनपतनादि। तथा, यथा

मनुष्यशरीरस्यौषधप्रयोगाद्वृद्धिहानिचतभुग्नसंरोहणानि, तथा वनस्पतिशरीरस्यापि । तथा, यथा मनुष्यशरीरस्य रसायनस्नेहाद्युपयोगादिग्निष्टकान्तिरसाबलोपचयादि, तथा वनस्पतिशरीरस्यापि विग्निष्टेष्टनभोजलादिसेकादिग्निष्टरसवीर्यस्निग्धत्वादि । तथा, यथा स्त्रीशरीरस्य तथाविधदौहृदपूरणात्पुत्रादिप्रसवनं, तथा वनस्पतिशरीरस्यापि तत्पूरणात्पुष्पफलादिप्रसवनमित्यादि । तथा च प्रयोगः । वनस्पतयः सचेना बालकुमारवृद्धावस्था-१-प्रतिनियतवृद्धि-२-स्वापप्रबोधस्वप्नादिहेतुकोत्सासमंकोचाश्रयोपसर्पणादिविग्निष्टानेककिया-३-छिन्नावयवस्वानि-४-प्रतिनियतप्रदेशाहारग्रहण-५-वृक्षायुर्वेदाभिहितायुष्केष्टानिष्टाहारादिनिमित्तकवृद्धिहानि-[६-] ७-आयुर्वेदोदितनत्तद्रोग-८-विग्निष्टौषधप्रयोगसंपादितप्रवृद्धिहानिचतभुग्नसंरोहण-९-प्रतिनियतविग्निष्टशरीररसवीर्यस्निग्धवरूक्षत्व-१०-विग्निष्टदौहृदा-११-दिमत्त्वान्यथानुपपत्तेः, विग्निष्टस्त्रीशरीरवत् । अथवैते हेतवः प्रत्येकं पक्षेण सह प्रयोक्तव्या अयं वा संगृहीतोक्तार्थः प्रयोगः । सचेतना वनस्पतयो जन्मजरामरणरोगादीनां समुदितानां सद्भावात्, स्त्रीवत् । अत्र समुदितानां जन्मादीनां ग्रहणात् "जातं तद्दधि" इत्यादिव्यपदेशदर्शनाद्दध्यादिभिरचेतनैर्न व्यभिचारः शङ्क्यः । तदेवं पृथिव्यादीनां सचेतनत्वं सिद्धम् । आप्तवचनाद्वा सर्वेषां सात्मकत्वसिद्धिः ॥

द्वीन्द्रियादिषु च कृमिपिपीलिकाभ्रमरमनुष्यजलचरस्थलचरखचरपश्वादिषु न केषांचित्सात्मकत्वे विगानमिति । ये तु

तत्रापि विप्रतिपद्यन्ते, तान् प्रतीदमभिधीयते। इन्द्रियेभ्यो व्यतिरिक्त आत्मा, इन्द्रियव्युपरमे ऽपि तदुपलब्धार्थानुस्मरणात्। प्रयोगो ऽत्र। इह यो यदुपरमे यदुपलब्धानामर्थानामनुस्मर्ता, स तेभ्यो व्यतिरिक्तः, यथा गवाक्षैरुपलब्धानामर्थानां गवाक्षोपरमे ऽपि देवदत्तः। अनुस्मरति चायमात्मान्धबधिरत्वादिकाले ऽपीन्द्रियोपलब्धानर्थान्। अतः स तेभ्यो ऽर्थान्तरमिति। अथवेन्द्रियेभ्यो व्यतिरिक्त आत्मा, इन्द्रियव्यापावपि कदाचिदनुपयुक्तावस्थायां वस्त्वनुपलम्भात्। प्रयोगश्च। इन्द्रियेभ्यो व्यतिरिक्त आत्मा, तद्व्यापारे ऽप्यर्थानुपलम्भात्। इह यो यद्व्यापारे ऽपि यैरुपलभ्यानर्थान्नोपलभते, स तेभ्यो भिन्नो दृष्टः, यथास्खलितगवाक्षे ऽप्यन्यमनस्कतयानुपयुक्तो ऽपश्यंस्तेभ्यो देवदत्त इति। अथवेदमनुमानम्। समस्तेन्द्रियेभ्यो भिन्नो जीवो ऽन्येनोपलभ्यान्येन विकारग्रहणात्। इह योऽन्येनोपलभ्यान्येन विकारं प्रतिपद्यते, स तस्माद्भिन्नो दृष्टः, यथा प्रवरप्रासादो परिपूर्ववातायनेन रमणीमवलोक्यापरवातायनेन समायातायास्तस्याः करादिना कुचस्पर्शादिविकारमुपदर्शयन्देवदत्तः। तथा चायमात्मा चक्षुषाङ्गीकामश्नन्तं दृष्ट्वा रसनेन ह्लालसलालास्रवणादिकं विकारं प्रतिपद्यते। तस्मात्तयोर्भिन्न इति। अथवेन्द्रियेभ्यो व्यतिरिक्त आत्मा अन्येनोपलभ्यान्येन ग्रहणात्। इह यो घटादिकमन्येनोपलभ्यान्येन गृह्णाति, स ताभ्यां भेदवान् दृष्टः, यथा पूर्ववातायनेन घटमुपलभ्यापरवातायनेन गृह्णानस्ताभ्यां देवदत्तः। गृह्णाति च चक्षुषोपलभ्यं घटादिकमर्थं

ह्लादिना जीवः; ततस्ताभ्यां भिन्न इति। एवमचानेकान्यनुमानानि नैकाश्च युक्तयो विशेषावश्यकटीकादिभ्यः स्वयं कर्तव्यानीति। प्रोक्तं विस्तरेण प्रथमं जीवतत्त्वम्॥

अजीवतत्त्वं व्याचिख्यासुराह "यश्चैतद्विपरीतवान्" इत्यादि। यश्चैतस्मादिपरीतानि विशेषणानि विद्यन्ते यस्मादसावेतद्विपरीतवान्, सो ऽजीवः समाख्यातः। "यश्चैतद्वैपरीत्यवान्" इति पाठे तु। यः पुनस्तस्माज्जीवाद्वैपरीत्यमन्यथात्वं तद्वानजीवः स समाख्यातः। अज्ञानादिधर्मेभ्यो रूपरसगन्धस्पर्शादिभ्यो भिन्नाभिन्नो नरामरादिभवान्तरानुयायी ज्ञानावरणादिकर्मणामकर्ता तत्फलस्य चाभोक्ता जडस्वरूपश्चाजीव इत्यर्थः। स च धर्माधर्माकाशकालपुद्गलभेदात्पञ्चविधो ऽभिधीयते। तत्र धर्मो लोकव्यापी नित्यो ऽवस्थितो ऽरूपी द्रव्यमस्तिकायो ऽसंख्यप्रदेशो गत्युपग्रहकारी च भवति। अत्र नित्यशब्देन स्वभावाद्प्रच्युत आख्यायते। अवस्थितशब्देनान्यूनाधिक आविर्भाव्यते। अन्यूनाधिकस्यानादिनिधनते यत्ताभ्यां न स्वतत्त्वं व्यभिचरति। तथारूपिग्रहणादमूर्त उच्यते। अमूर्तस्य रूपरसगन्धस्पर्शपरिणामवाच्यवर्त्यभिधीयते। न खलु मूर्तिं स्पर्शादयो व्यभिचरन्ति, सहचारित्वात्। यत्र हि रूपपरिणामस्तत्र स्पर्शरसगन्धैरपि भाव्यम्। अतः सहचरमेतच्चतुष्टयमन्ततः परमाणावपि विद्यते। तथा द्रव्यग्रहणाद्गुणपर्यायवान् प्रोच्यते, गुणपर्यायवद्द्रव्यमिति वचनात्। तथास्तयः प्रदेशाः प्रच्छन्ना देशाः प्रदेशा निर्विभागानि खण्डानीत्यर्थः। तेषां कायः समुदायः कथ्यते। तथा

लोकव्यापीतिवचनेनासंख्यप्रदेशवचनेन च लोकाकाशप्रदेश-प्रमाणप्रदेशो निर्दिश्यते। तथा स्वत एव गतेः परिणतानां जीवपुद्गलानामुपकारकरो ऽपेक्षाकारणमित्यर्थः। कारणं हि त्रिविधमुच्यते, यथा घटस्य मृत्परिणामिकारणं १, दण्डादयो ग्राहकास्च निमित्तकारणं २, कुम्भकारो निर्वर्तकं कारणम् ३। तदुक्तम्।

निर्वर्तकं निमित्तं परिणामं च त्रिधेष्यते हेतुः।
कुम्भस्य कुम्भकारो धर्ता मृच्चेति समसंख्यम्॥

निमित्तकारणं च द्वेधा निमित्तकारणमपेक्षाकारणं च। यत्र दण्डादिषु प्रायोगिकी वैस्रसिकी च क्रिया भवति तानि दण्डादीनि निमित्तकारणम्। यत्र तु धर्मादिद्रव्येषु वैस्रसिक्येव क्रिया तानि निमित्तकारणान्यपि विशेषकारणताज्ञापनार्थ-मपेक्षाकारणान्युच्यन्ते। धर्मादिद्रव्यगतक्रियापरिणाममपेक्षमाणं जीवादिकं गत्यादिक्रियापरिणतिं पुष्णातीति कृत्वा ततो ऽत्र धर्मो ऽपेक्षाकारणम् १। एवमधर्मो ऽपि लोकव्यापितादिसकल-विशेषणविशिष्टो धर्मवत्रिर्विशेषं मन्तव्यः, नवरं स्थित्युपग्रह-कारी स्वत एव स्थितिपरिणतानां जीवपुद्गलानां स्थितिविषये ऽपेक्षाकारणं वक्तव्यः २। एवमाकाशमपि लोकालोकव्यापक-मनन्तप्रदेशं नित्यमवस्थितमरूपि द्रव्यमस्तिकायो ऽवगाहोप-कारकं च वक्तव्यं, नवरं लोकालोकव्यापकमिति। ये केचना-चार्याः कालं द्रव्यं नाभ्युपयन्ति किंतु धर्मादिद्रव्याणां पर्यायमेव, तन्मते धर्माधर्माकाशपुद्गलजीवाख्यपञ्चास्तिकायात्मको लोकः।

ये तु कालं द्रव्यमिच्छन्ति, तन्मते षड्द्रव्यात्मको लोकः, पञ्चानां धर्मादिद्रव्याणां कालद्रव्यस्य च तत्र सद्भावात् । आकाशद्रव्यमेकमेवास्ति यत्र यो ऽलोकः लोकालोकयोर्व्यापकमवगाहोपकारकमिति खत एवावगाह्यमानानां द्रव्याणामवगाहदायि भवति न पुनरनवगाह्यमानं पुद्गलादि बलादवगाहयति । अतो निमित्तकारणमाकाशमम्बुवन्मत्स्यकरादीनामिति । अलोकाकाशं कथमवगाहोपकारकं, अनवगाह्यत्वादिति चेत् । उच्यते । तद्धि व्याप्रियेतैवावकाशदानेन, यदि गतिस्थितिहेतू धर्माधर्मास्तिकायौ तत्र स्यातां; न च तौ तत्र स्तः, तद्भावाच्च विद्यमानो ऽप्यवगाहनगुणोऽनाभिव्यज्यते किमलोकाकाशस्येति ॥ २ ॥

कालो ऽर्धतृतीयद्वीपान्तर्वर्ती परमसूक्ष्मो निर्विभाग एकः समयः । स चास्तिकायो न भण्यते, एकसमयरूपस्य तस्य निःप्रदेशत्वात् । आह च ।

तस्मान्मानुषलोकव्यापी कालो ऽस्ति समय एक इह ।
एकत्वाच्च स कायो न भवति कायो हि समुदायः ॥ १ ॥

स च सूर्यादिग्रहनक्षत्रोदयास्तादिक्रियाभिव्यङ्ग्य एकीयमतेन द्रव्यमभिधीयते । स चैकसमयो द्रव्यपर्यायोभयात्मैव, द्रव्यार्थरूपेण प्रतिपर्यायमुत्पादव्ययधर्मापि स्वरूपानन्यभूतक्रमाक्रमभाव्यनाद्यपर्यवसानानन्तसंख्यपरिमाणः, अत एव च स स्वपर्यायप्रवाहव्यापी द्रव्यात्मना नित्यो ऽभिधीयते । अतीतानागतवर्तमानावस्थास्वपि कालः काल इत्यविशेषश्रुतेः । यथा लोकः परमाणुः पर्यायैरनित्यो ऽपि द्रव्यतेन सदा सन्नेव न कदाचि-

द्रव्यत्वं भजते, तथैकः समयोऽपीति । अयं च कालो न निर्वर्तककारणं नापि परिणामिकारणं, किं तु स्वयं संभवतां भावानामस्मिन् काले भवितव्यं नान्यदेत्यपेक्षाकारणम् । कालकृता वर्तनाद्या वस्तूनामुपकाराः । अथवा वर्तनाद्या उपकाराः कालस्य लिङ्गानि, ततस्तानाह "वर्तना परिणामः क्रियापरत्वापरत्वे च" [तत्त्वार्थाधिगमः ५, २२] । तत्र वर्तन्ते स्वयं पदार्थाः, तेषां वर्तमानानां प्रयोजिकाकालाश्रया वृत्तिर्वर्त्तना, प्रथमसमयाश्रया स्थितिरित्यर्थः । १ । परिणामो द्रव्यस्य स्वजात्यपरित्यागेन परिस्पन्देतरप्रयोगजपर्यायस्वभावः परिणामः । तद्यथा । वृक्षस्याङ्कुरमूलाद्यवस्थाः परिणामः, आसीदङ्कुरः सम्प्रति स्कन्धवानेषमः पुष्पिष्यतीति । पुरुषद्रव्यस्य बालकुमारयुवाद्यवस्थाः परिणामः । एवमन्यत्रापि । परिणामो द्विविधः, अनादिरमूर्तेषु धर्मादिषु, मूर्तेषु तु सादिरभ्रेन्द्रधनुरादिषु स्तम्भकुम्भाम्भोरुहादिषु च । ऋतुविभागकृतो वेलाविभागकृतश्च परिणामस्तुल्यजातीयानां वनस्पत्यादीनामेकस्मिन्काले विचित्रो भवति २ । प्रयोगविस्रसाभ्यां जनितो जीवानां परिणामेन व्यापारकरणं क्रिया, तस्या अनुग्राहकः कालः । तद्यथा । नष्टो घटः, सूर्यं पश्यामि, भविष्यति वृष्टिरित्यादिका अतीतादिव्यपदेशाः परस्परासंकीर्णा यदपेक्षया वर्तन्ते, स कालः ३ । इदं परमिदमपरमितिप्रत्ययाभिधाने कालनिमित्ते ४ । तदेवं वर्तनाद्युपकारानुमेयः कालो द्रव्यं मानुषक्षेत्रे । मनुष्यलोकाद्बहिः कालद्रव्यं नास्ति । यस्मो हि भावास्तत्र स्वयमेवोत्पद्यन्ते व्यय-

न्यवतिष्ठन्ते च। अस्तित्वं च भावानां स्वत एव, न तु कालापेक्षम्। न च तत्रत्याः प्राणापाननिमेषोन्मेषायुःप्रमाणादिवृत्तयः कालापेक्षाः, तुल्यजातीयानां सर्वेषां युगपदभवनात्। कालापेक्षा ह्यर्थास्तुल्यजातीयानामेकस्मिन्काले भवन्ति, न विजातीयानाम्। तास्च प्राणादिवृत्तयस्तद्वतां नैकस्मिन्काले भवन्त्युपरमन्ति चेति। तस्मान्न कालापेक्षास्ताः। परत्वापरत्वे अपि तच्चिरस्थित्यपेक्षे, स्थितिश्चास्तित्वापेक्षा, अस्तित्वं च स्वत एवेति। ये तु कालं द्रव्यं न मन्यन्ते, तन्मते सर्वेषां द्रव्याणां वर्तनादयः पर्याया एव सन्ति, न त्वपेक्षाकरणं कस्यन कालद्रति ॥ ४ ॥

अथ पुद्गलाः। "स्पर्शरसगन्धवर्णवन्तः पुद्गलाः" [तत्त्वार्थाधिगम° ५, २३]। अत्र स्पर्शग्रहणमादौ स्पर्शे सति रसादिसद्भावज्ञापनार्थम्। ततो ऽबादीनि चतुर्गुणानि स्पर्शित्वात्, पृथिवीवत्; तथा मनः स्पर्शादिमत्, अमूर्तद्रव्यत्वात्, पार्थिवाणुवदिति प्रयोगौ सिद्धौ। तच्च स्पर्शा हि मृदुकठिनगुरुलघुशीतोष्णस्निग्धरूक्षाः। अत्र च स्निग्धरूक्षशीतोष्णास्त्वार एवाणुषु संभवन्ति। स्कन्धेष्वष्टावपि यथासंभवमभिधानीयाः। रसास्तिक्तकटुकषायाम्लमधुराः। लवणो मधुरान्तर्गत इत्येके, संसर्गज इत्यपरे। गन्धौ सुरभ्यसुरभी। कृष्णादयो वर्णाः। तद्वन्तः पुद्गला इति। न केवलं पुद्गलानां स्पर्शादयो धर्माः, शब्दादयश्चेति दर्श्यते। "शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च" [तत्त्वार्थाधिगम° ५, २४] पुद्गलाः। अत्र पुद्गल-

परिणामाविष्कारे मतुप्रत्ययो नित्ययोगार्थं विहितः । तच्च शब्दो ध्वनिः १ । बन्धः परस्परश्लेषलक्षणः प्रयोगविस्रसादिजनित औदारिकादिशरीरेषु जतुकाष्ठादिश्लेषवत् परमाणुसंयोगवद्वेति २ । सौक्ष्म्यं सूक्ष्मता ३ । स्थौल्यं स्थूलता ४ । संस्थानमाकृतिः ५ । भेदः खण्डशो भवनं ६ । तमश्छायादयः प्रतीताः । सर्व एवैते स्पर्शादयः शब्दादयश्च पुद्गलेष्वेव भवन्तीति ॥

पुद्गला द्वेधा, परमाणवः स्कन्धाश्च । तत्र परमाणोर्लक्षणमिदम् ।

कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसवर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥ १ ॥

व्याख्या ॥ सकलभेदपर्यन्तवर्तित्वादन्त्यं तदेव कारणं न पुनरन्यद्द्व्यणुकादि । तदेव किमित्याह । सूक्ष्म आगमगम्यः, अस्मदादीन्द्रियव्यापारातीतत्वात् । नित्यश्चेति द्रव्यार्थिकनयापेक्षया ध्रुवः । पर्यायार्थिकनयापेक्षया तु नीलादिभिराकारैरनित्य एवेति । न ततः परमणीयो द्रव्यमस्ति, तेन परमाणुः । तथा पञ्चानां रसानां द्वयोर्गन्धयोः पञ्चविधस्य वर्णस्यैकेन रसादिना युक्तः । तथा चतुर्णां स्पर्शानां मध्ये द्वावविरुद्धौ यौ स्पर्शौ स्निग्धोष्णौ स्निग्धशीतौ रूक्षशीतौ रूक्षोष्णौ वा, ताभ्यां युक्तः । तथा कार्यं द्व्यणुकाद्यचित्तमहास्कन्धपर्यन्तं तस्य लिङ्गमिति । एवंविधलक्षणा निरवयवाः परस्परेणासंयुक्ताः परमाणवः । स्कन्धाः पुनर्द्व्यणुकादयोऽनन्ताणुकपर्यन्ताः सावयवाः प्रायोग्रहणादानादिव्यापारसमर्थाः परमाणुसंघाता इति । एते धर्मा-

धर्माकाशकालपुद्गला जीवैः सह षड्द्रव्याणि। एष्वाद्यानि चत्वार्येकद्रव्याणि, जीवाः पुद्गलाश्चानेकद्रव्याणि, पुद्गलरहितानि पञ्चामूर्तानि, पुद्गलास्तु मूर्ता एवेति॥

ननु जीवद्रव्यस्याऽरूपिणोऽनुपयोगस्वभावत्वेन स्वसंवेदनसंवेद्यत्वादस्तित्वं श्रद्धानपथमवतारयितुं शक्यम्। धर्माधर्मास्तिकायादीनां तु न जातुचिदपि स्वसंवेदनसंवेद्यत्वं समस्ति, अचेतनत्वात्। नापि परसंवेदनवेद्यता, नित्यरूपित्वेन। तत्कथं तेषां धर्मास्तिकायादीनां सतां सत्ता श्रद्धेया स्यादिति चेत्। उच्यते। प्रत्यक्षेण योऽर्थो नोपलभ्यते स सर्वथा नास्त्येव, यथा शशविषाणमित्येकान्तेन न मन्तव्यं; यत इह लोके द्विविधानुपलब्धिर्भवति। तत्रैकासतो वस्तुनोऽनुपलब्धिः, यथा तुरङ्गमोत्तमाङ्गसंसर्गानुषङ्गिपृष्ठाङ्गस्य; द्वितीया तु सतामप्यर्थानामनुपलब्धिर्भवति। या च सत्स्वभावानामपि भावानामनुपलब्धिः, सा चाष्टधा भिद्यते। तथाहि। अतिदूरात् १, अतिसामीप्यात् २, इन्द्रियघातात् ३, मनसोऽनवस्थानात् ४, सौक्ष्म्यात् ५, आवरणात् ६, अभिभवात् ७. समानाभिहाराच्चेति ८। तत्रातिदूराद्देशकालस्वभावविप्रकर्षात्त्रिविधानुपलब्धिः। तत्र देशविप्रकर्षात्। यथा। कश्चित् देवदत्तो ग्रामान्तरं गतो न दृश्यते। तत्कथं स नास्ति। सोऽस्त्येव, देशविप्रकर्षान्नोपलब्धिः। एवं समुद्रस्य परतटं मेर्वादिकं वा सदपि नोपलभ्यते। तथा कालविप्रकर्षाद्भूता निजपूर्वजादयो भविष्या वा पद्मनाभादयो जिना वा नोपलभ्यन्ते, अभूवन्

भविष्यन्ति च ते। तथा स्वभावविप्रकर्षान्नभोजीवपिशाचादयो नोपलभ्यन्ते, न च ते न सन्ति।१। तथातिसामीप्यात्। यथा। नेत्रकज्जलं नोपलभ्यते। तत्कथं तन्नास्ति। तदस्त्येव, पुनरतिसामीप्यान्नोपलभ्यते।२। तथेन्द्रियघातात्। यथा। अन्धबधिरादयो रूपशब्दादीन्नोपलभन्ते। तत्कथं रूपादयो न सन्ति। सन्त्येव ते, पुनरिन्द्रियघातान्नोपलभ्यन्ते।३। तथा मनोनवस्थानात्। यथा। अनवस्थितचेता न पश्यति। उक्तं च।

दृषुकारनरः कश्चिद्राजानं सपरिच्छदम्।
न जानाति पुरो यान्तं यथा ध्यानं समाचरेत्॥१॥

तत्किं राजा न गतः। स गत एव, पुनरनवस्थितचेतस्कत्वान्न दृष्टवान्। नष्टचेतसां वा मतोऽपि भावस्यानुपलब्धिः।४। तथा सौक्ष्म्यात्। यथा। जालकान्तरगतधूमोष्मनीहारादीनां चरेणवो नोपलभ्यन्ते, परमाणुद्व्यणुकादयो वा सूक्ष्मनिगोदादयो नोपलभ्यन्त। तत्किं न सन्ति। सन्त्येव ते, पुनः सौक्ष्म्यान्नोपलब्धिः।५। तथावरणात्। कुड्यादिव्यवधानाज्ज्ञानाद्यावरणाद्वानुपलब्धिः। तत्र व्यवधानात्। यथा। कुड्यान्तरे व्यवस्थितं वस्तु नोपलभ्यते। तत्किं नास्ति। किं तु तदस्त्येव, पुनर्व्यवधानान्नोपलब्धिः। एवं स्वकर्णकन्धरामस्तकपृष्ठानि नोपलभ्यन्ते चन्द्रमण्डलस्य च सन्नपि परभागो न दृश्यते, अर्वाग्भागेन व्यवहितत्वात्। ज्ञानाद्यावरणाच्चानुपलब्धिः। यथा। मतिमान्द्यात्सतामपि शास्त्रसूक्ष्मार्थविशेषाणामनुपलब्धिः, मतोऽपि वा जलधिजलपलप्रमाणस्यानुपलब्धिः। विस्मृतेर्वा, पूर्वोपलब्धस्य वस्तुनो

ऽनुपलब्धिः। मोहात्, सतामपि तत्त्वानां जीवादीनामनुपलब्धिरित्यादि। ६। तथाभिभवात्, सूर्यादितेजसाभिभूतानि ग्रहनक्षत्राणि नोपलभ्यन्ते। तत्कथं तेषामभावः। किं तु तानि सन्त्येव, पुनरभिभवान्न दृश्यन्ते। एवमन्धकारे ऽपि घटादयो नोपलभ्यन्ते। ७। समानाभिहाराच्च, यथा मुद्गराशौ मुद्गमुष्टिः तिलराशौ तिलमुष्टिर्वा क्षिप्ता सती सूपलक्षितापि नोपलभ्यते, जले क्षिप्तानि लवणादीनि वा नोपलभ्यन्ते। तत्कथं तेषामभावः। तानि सन्त्येव, पुनः समानाभिहारान्नोपलब्धिः।८। तथा चोक्तं सांख्यसप्ततौ [७]॥

अतिदूरात्सामीप्यादिन्द्रियघातान्मनोनवस्थानात्।
सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च॥१॥ इति॥

एवमष्टधापि सत्स्वभावानामपि भावानां यथानुपलब्धी ऽभिहितः, एवं धर्मास्तिकायादयो ऽपि विद्यमाना अपि स्वभावविप्रकर्षान्नोपलभ्यन्त इति मन्तव्यम्॥

आह परः। ये ऽत्र देशान्तरगतदेवदत्तादयो दर्शिताः, तेऽत्रास्माकमप्रत्यक्षा अपि देशान्तरगतलोकानां केषांचित्प्रत्यक्षा एव सन्ति। तेन तेषां सत्त्वं प्रतीयते। धर्मास्तिकायादयस्तु कैश्चिदपि कदापि नोपलभ्यन्ते। तत्कथं तेषां सत्ता निश्चीयत इति। अत्रोच्यते। यथा देवदत्तादयः केषांचित्प्रत्यक्षत्वात्सन्तो निश्चीयन्ते, तथा धर्मास्तिकायादयो ऽपि केवलिनां प्रत्यक्षत्वात्किं न सन्तः प्रतीयन्ताम्। यथा वा परमाणवो नित्यमप्रत्यक्षा अपि स्वकार्यानुमेयाः स्युः, तथा धर्मास्तिकाया-

दयो ऽपि किं न स्वकार्यानुमेया भवेयुः । धर्मास्तिकायादीनां कार्याणि चामूनि। तत्र धर्मो गत्युपग्रहकार्यानुमेयः, अधर्मः स्थित्युपग्रहकार्यानुमेयः, अवगाहोपकारानुमेयमाकाशं, वर्तनाद्युपकारानुमेयः कालः, प्रत्यक्षानुमानावसेयाश्च पुद्गलाः। नन्वाकाशादयः स्वकार्यानुमेया भवन्तु, धर्माधर्मौ तु कथम् । अत्रोच्यते युक्तिः । धर्माधर्मौ हि स्वत एव गतिस्थितिपरिणतानां द्रव्याणामुपगृह्णाते ऽपेक्षाकारणतया, आकाशकालादिवत्; न पुनर्निर्वर्तककारणतया । निर्वर्तकं हि कारणं तदेव जीवद्रव्यं पुद्गलद्रव्यं वा गतिस्थितिक्रियाविशिष्टं, धर्माधर्मौ पुनर्गतिस्थितिक्रियाविशिष्टानां द्रव्याणामुपकारकावेव न पुनर्बलाद्गतिस्थितिनिर्वर्तकौ । यथा च सरित्तटाकह्रदसमुद्रेषु वेगवाहित्वे सति मत्स्यस्य स्वयमेव संजातजिगमिषस्योपग्राहकं जलं निमित्ततयोपकरोति, दण्डादिवत्कुम्भकारे कर्तरि मृदः परिणामिन्याः, नभोवद्वा नभश्चरतां नभश्चराणामपेक्षाकारणं; न पुनस्तज्जलं गतेः कारणभावं बिभ्राणमगच्छन्तमपि मत्स्यं बलात्प्रेर्य गमयति, क्षितिर्वा स्वयमेव तिष्ठतो द्रव्यस्य स्थानभूयमापनीपद्यते न पुनरतिष्ठद्द्रव्यं बलादवनिरवस्थापयति। व्योम वावगाहमानस्य स्वत एव द्रव्यस्य हेतुतामुपेत्यवगाहं प्रति न पुनरनवगाहमानमवगाहयति स्वावष्टम्भात्। स्वयमेव कृषीवलानां कृष्यारम्भमनुतिष्ठतां वर्षमपेक्षाकारणं दृष्टं न च पुनः कुर्वतस्तांस्तदर्थमारम्भयद्वर्षवारि प्रतीतम्। प्रावृषि वा नवाम्भोधरध्वनिश्रवणनिमित्तोपाधीयमानगर्भा स्वत एव प्रसूते बलाका न चाप्र-

सूयमानां तामभिनवजलधरनिनादः प्रसभं प्रसावयति। प्रतिबुध्य वा पुरुषः प्रतिबोधनिमित्तामवद्यादिरतिमातिष्ठमानो दृष्टो न च पुमांसमविरतं विरमयति बलात्प्रतिबोधः। न च गत्युपकारोऽवगाहलक्षणाकाशस्योपपद्यते किं तर्हि धर्मस्यैवोपकारः स दृष्टः। स्थित्युपकारश्चाधर्मस्य नावगाहलक्षणस्य योग्यः। अवश्यमेव हि द्रव्यस्य द्रव्यान्तरादसाधारणः कश्चिद्गुणोऽभ्युपेयः। द्रव्यान्तरत्वं च युक्तेरागमाद्वा निश्चेयम्। युक्तिरनन्तरमेवाग्रतो वक्ष्यते। आगमस्त्वयम्। "कइणं भंते दव्वा पण्णत्ता गोयमा छ दव्वा पण्णत्ता। तं जहा। धम्मत्थिकाए, अधम्मत्थिकाए, आगासत्थिकाए, पुग्गलत्थिकाए, जीवत्थिकाए, अद्धासमए" ॥

ननु धर्मद्रव्योपकारनिरपेक्षमेव शकुनेरुत्पतनमग्नेरूर्ध्वज्वलनं मरुतश्च तिर्यक्पवनं स्वभावादेवानादिकालीनादिति। उच्यते। प्रतिज्ञामात्रमिदं, नार्हन्तं प्रति हेतुदृष्टान्तावनवद्यौ स्तः। स्वाभाविक्या गतेर्धर्मद्रव्योपकारनिरपेक्षायास्तं प्रत्यसिद्धत्वात्, यतः सर्वेषामेव जीवपुद्गलानामासादितगतिपरिणतीनामुपग्राहकं धर्ममनुरुध्यन्तेऽनेकान्तवादिनः स्थितिपरिणामभाजां वाधर्मः; आभ्यां च न गतिस्थिती क्रियेते, केवलं साचिव्यमात्रेणोपकारकत्वं, यथा भिक्षा वासयति कारीषोऽग्निरध्यापयतीति। ननु तवापि लोकालोकव्यापिधर्माधर्मद्रव्यास्तित्ववादिनः संज्ञामात्रमेव "तदुपकारौ गतिस्थित्युपग्रहौ" इति [तत्त्वार्थाधिगम० ५, १०]। अत्र जागर्त्ति युक्तिः। अवधत्तां भवान्। गतिस्थिती ये जीवानां पुद्गलानां च ते स्वतःपरिणामवि-

भावात् परिणामिकर्तृनिमित्तकारणत्वव्यतिरिक्तोदासीनकारणान्तरसापेक्षात्मलाभे, अस्वाभाविकपर्यायत्वे सति कदाचिद्भावात्, उदासीनकारणपानीयापेक्षात्मलाभभ्रमणगतिवत्। इति धर्माधर्मयोः सिद्धिः। २। अवगाहिनां धर्मादीनामवकाशदायित्वेनोपकारेणाकाशमनुमीयते। अवकाशदायित्वं चोपकारोऽवगाहः। स चात्मभूतोऽस्य लक्षणमुच्यते। मकरादिगत्युपकारकारिजलादिदृष्टान्ता अत्राप्यनुवर्तनीयाः। नन्वयमवगाहो पुद्गलादिसंबन्धी व्योमसंबन्धी च। ततः स उभयोर्धर्मः। कथमाकाशस्यैव लक्षणं, उभयजन्यत्वात्, द्वयङ्गुलसंयोगवत्। न खलु द्रव्यद्वयजनितः संयोगो द्रव्येणैकेन व्यपदेष्टुं पार्यते, लक्षणं चैकस्य भवितुमर्हतीति। सत्यमेतत्। सत्यपि संयोगजन्यत्वे लक्ष्यमाकाशं प्रधानम्। ततोऽवगाहनमनुप्रवेशो यच, तदाकाशमवगाह्यमवगाहलक्षणं विवक्षितं, इतरत्तु पुद्गलादिकमवगाहकम्। यस्माद्व्योमैवासाधारणकारणतयावगाह्यत्वेनोपकरोति, अतो द्रव्यान्तरासंभविना स्वेनोपकारेणातीन्द्रियमपि व्योमानुमेयं, आत्मवत्, धर्मादिवद्वा। यथा पुरुषहस्तदण्डसंयोगभेर्यादिकारणः शब्दो भेरीशब्दो व्यपदिश्यते, भूजलानिलत्वयवादिकारणस्त्वङ्कुरो यवाङ्कुरो ऽभिधीयते, असाधारणकारणत्वात्, एवमवगाहोऽप्यम्बरस्य प्रतिपत्तव्यः। वैशेषिकास्तु शब्दलिङ्गमाकाशं संगिरन्ते, गुणगुणिभावेन व्यवस्थानादिति। तदयुक्तं, रूपादिमत्त्वाच्छब्दस्य, रूपादिमत्ता च प्रतिघाताभिभवाभ्यां विनिश्चेया ३। कालस्तु वर्तनादिभिर्लिङ्गैरनुमीयते।

यतो वर्तना प्रतिद्रव्यपर्यायमन्तर्णीतैकसमयस्वसत्तानुभूतिलक्षणा सा च सकलवस्त्वाश्रया कालमन्तरेण प्रतिसमयमनुपपन्ना, अतो ऽस्ति कार्यानुमेयः कालः पदार्थपरिणतिहेतुः। लोकप्रसिद्धाश्च कालद्रव्याभिधायिनः शब्दाः सन्ति, न तु सूर्यक्रियामात्राभिधायिनः। यथाह । 5

युगपद्युगपत्क्षिप्रं चिरं चिरेण परमपरमिदमिति च।
वर्त्स्यति नैतद्वर्त्स्यति वृत्तं तत्तन्न वृत्तमपि ॥१॥
वर्तत इदं न वर्तत इति कालापेक्षमेवाप्ता यत्।
सर्वे ब्रुवन्ति तस्मान्ननु सर्वेषां मतः कालः ॥२॥
ह्यः श्वोऽद्य संप्रति परुत्परारि नक्तं दिवैषमः प्रातः । 10
सायमिति कालवचनानि कथं युक्तान्यसति काले ॥३॥

परिणामो ऽपि सजातीयानां वृक्षादिवस्तूनामेकस्मिन्काल ऋतुविभागकृतो वेलानियमकृतश्च विचित्रः कारणं नियामकमन्तरेणानुपपन्नः। ततः समस्ति तत्कारणं काल इत्यवसीयते। तथा विनष्टो विनश्यति विनंक्ष्यति च घट इत्यादिक्रियाव्यपदेशा अतीतवर्तमानानागतकालत्रयविभागनिमित्ताः परस्परासंकीर्णाः संव्यवहारानुगुणाः कालमन्तरेण न भवेयुः। ततो ऽस्ति कालः। तथेदं परमिदमपरमिति यन्निमित्ते प्रत्ययाभिधाने, स समस्ति काल इति ॥४॥ 15

पुद्गलाः प्रत्यक्षानुमानागमावसेयाः। तत्र कटघटपटलकुटशकटादयो ऽध्यक्षसिद्धाः। अनुमानगम्या इत्थम्। स्थूलवस्त्वन्यथानुपपत्त्या सूक्ष्मपरमाणुद्व्यणुकादीनां सत्तावसीयते। आगम- 20

गम्यता चवं "पुग्गलत्थिकाए" इत्यादि। तथा परमाणवः सर्वेऽप्येकरूपा एव विद्यन्ते, न पुनर्वैशेषिकाभिमतचतुस्त्रिद्व्येकगुणकस्पर्शादिगुणवतां पार्थिवाप्यतैजसवायवीयपरमाणूनां जातिभेदाच्चतूरूपाः। यथा लवणहिंगुनी स्पर्शनचक्षूरसनघ्राणयोग्येऽपि जले विलीने सति लोचनस्पर्शनाभ्यां ग्रहीतुं न शक्ये परिणामविशेषवत्त्वात्, एवं पार्थिवादिपरमाणवोऽप्येकजातीया एव परिणतिविशेषवत्त्वात् न सर्वेन्द्रियग्राह्या भवन्ति, न पुनस्तज्जातिभेदादिति। शब्दादीनां तु पौद्गलिकतैवं ज्ञेया। शब्दः पुद्गलद्रव्यपरिणामः, तत्परिणामता चास्य मूर्तत्वात्, मूर्तता चोरःकण्ठशिरोजिह्वामूलदन्तादिद्रव्यान्तरविक्रियापादनसामर्थ्यात्, पिप्पल्यादिवत्। तथा ताड्यमानपटहभेरीझल्लरितलस्थकिलिञ्चादिप्रकम्पनात्, तथा शङ्खादिशब्दानामतिमात्रप्रवृद्धानां श्रवणबधिरीकरणसामर्थ्यम्। तच्चाकाशादावमूर्ते नास्ति। अतो न तद्गुणः शब्दः। तथा प्रतीपयायित्वात्, पर्वतप्रतिहतप्रस्तरवत्। तथा शब्दो नाभरगुणः, द्वारानुविधायित्वात्, आतपवत्। तस्मिन्नेव पक्षे सति दर्शनसाधनपञ्चकं प्रपद्यते। यथा शब्दो ऽम्बरगुणो न भवति, संहारसामर्थ्यात्, अगुरुधूपवत्; तथा वायुना प्रेर्यमाणत्वात्, तृणपर्णादिवत्; सर्वदिग्ग्राह्यत्वात्, प्रदीपवत्; अभिभवनीयत्वात्, तारासमूहादिवत्; अभिभावकत्वात्, सवितृमण्डलप्रकाशवत्। महता हि शब्देनाल्पीयानभिभूयते शब्द इति प्रतीतमेव। तस्मात्पुद्गलपरिणामः शब्दः। अथ शङ्खे तद्विनाशे तदीयखण्डेषु च यथा

पौद्गलिकत्वाद्रूपमुपलभ्यते, तथा शब्देऽपि कुतो नेति चेत्। उच्यते। सूक्ष्मत्वात्, विध्यातप्रदीपशिखारूपादिवत् गन्धपरमाणुव्यवस्थितरूपादिवदेति। गन्धादीनां तु पुद्गलपरिणामता प्रसिद्धैव। तमश्छायादीनां त्वेवम्। तमः पुद्गलपरिणामो, दृष्टिप्रतिबन्धकारित्वात्, कुड्यादिवत्; आवारकत्वात्, पटादिवत्। छायापि स्निग्धत्वात्, आप्यायकत्वात्, जलवातादिवत्। छायाकारेण परिणममाणं प्रतिबिम्बमपि पौद्गलिकं, साकारत्वात्। अथ कथं कठिनमादर्शं प्रतिभिद्य मुखतो निर्गताः पुद्गलाः प्रतिबिम्बमाजिघ्रत इति चेत्। उच्यते। तत्प्रतिभेदः कठिनस्निग्धातलपरिस्रुतजलेनायस्पिण्डे ऽग्निपुद्गलप्रवेशेन शरीरात्प्रस्वेदवारिलेशनिर्गमनेन च व्याख्येयः। आतपो ऽपि द्रव्यं, तापकत्वात्, स्वेदहेतुत्वात्, उष्णत्वात्, अग्निवत्। उद्योतश्च चन्द्रिकादिद्रव्यं, आह्लादकत्वात्, जलवत्; प्रकाशकत्वात्, अग्निवत्। तथा पद्मरागादीनामनुष्णाशीत उद्योतः। अतो मूर्तद्रव्यविकारस्तमश्छायादिः। इति सिद्धाः पुद्गलाः। इति सुस्थितमजीवतत्त्वम्॥

अथ पुण्यतत्त्वमभिधत्ते "पुण्यं सत्कर्मपुद्गलाः" इति पुण्यं सन्तस्तीर्थकरत्वस्वर्गादिफलनिर्वर्तकत्वात्प्रशस्ताः कर्मणां पुद्गला जीवसंबद्धाः कर्मवर्गणाः॥ अथ पापास्रवतत्त्वं व्याख्याति।

पापं तद्विपरीतं तु मिथ्यात्वाद्यास्तु हेतवः।
ये बन्धस्य स विज्ञेय आस्रवो जिनशासने॥५०॥

तुर्भिन्नक्रमे। पापं तु तस्मात्पुण्याद्विपरीतम्। नरकादि-

फलनिर्वर्तकत्वादप्रशस्ता जीवसंबद्धाः कर्मपुद्गलाः पापमित्यर्थः। इह च वक्ष्यमाणबन्धतत्त्वान्तर्भूतयोरपि पुण्यपापयोः पृथग्निर्देशः पुण्यपापविषयनानाविधपरमतभेदनिरासार्थः। परमतानि चामूनि। केषांचित्तीर्थिकानामयं प्रवादः। पुण्यमेवैकमस्ति, न पापम्। अन्ये त्वाहुः। पापमेवैकमस्ति, न पुण्यम्। अपरे तु वदन्ति। उभयमप्यन्योन्यानुविद्धस्वरूपं मेचकमणिकल्पं तन्मिश्रसुखदुःखाख्यफलहेतुः साधारणं पुण्यपापाख्यमेकं वस्त्विति। अन्ये पुनराहुः। मूलतः कर्मैव नास्ति स्वभावसिद्धः सर्वोऽप्ययं जगत्प्रपञ्च इति। तदेतानि निखिलानि मतानि न सम्यगिति मन्तव्यानि, यत सुखदुःखे विविक्ते एवोभे सर्वैरनुभूयेते। ततस्तत्कारणभूते पुण्यपापे अपि स्वतन्त्रे एवोभे अङ्गीकर्तव्ये, न पुनरेकतरं तद्द्वयं वा तन्मिश्रमिति। अथ कर्माभाववादिनो नास्तिका वेदान्तिनश्च वदन्ति। ननु पुण्यपापे नभोम्भोजनिभे एव मन्तव्ये, न पुनः सद्भूते; कुतः पुनस्तयोः फलभोगस्थाने स्वर्गनरकाविति चेत्। उच्यते। पुण्यपापयोरभावे सुखदुःखयोर्निर्हेतुकत्वादनुत्पाद एव स्यात्। स च प्रत्यक्षविरुद्धः। तथाहि। मनुजत्वे समानेऽपि दृश्यन्ते केचन स्वामित्वमनुभवन्तो, अपरे पुनस्तत्प्रेष्यभावमाबिभ्राणाः। एके च लक्षकुक्षिंभरयः, अन्ये तु स्वोदरदरीपूरणेऽप्यनिपुणाः, एके देवा इव निरन्तरं सरसविलाससुखशालिनः, इतरे पुनर्नारका इवोन्निद्रदुःखविद्राणचित्तवृत्तय इति। अतोऽनुभूयमानसुखदुःखनिबन्धने पुण्यपापे स्वीकर्तव्ये। तदङ्गीकरणे च

विशिष्टयोस्तत्फलयोर्भोगस्थाने स्वर्गनरकावपि प्रतिपत्तव्यौ, अन्यथार्धजरतीयन्यायप्रसङ्गः स्यात्। प्रयोगश्चात्र। सुखदुःखे कारणपूर्वके, कार्यत्वात्, अङ्कुरवत्। ये च तयोः कारणे, ते पुण्यपापे मन्तव्ये, यथाङ्कुरस्य बीजम्। अथ नीलादिकं मूर्तं वस्तु यथा स्वप्रतिभासिज्ञानस्यामूर्तस्य कारणं भवति, तथान्नस्रक्-चन्दनादिकं मूर्तं दृश्यमानमेव सुखस्यामूर्तस्य कारणं भविष्यति, अहिविषकण्टकादिकं च दुःखस्य। ततः किमदृष्टाभ्यां पुण्यपापाभ्यां परिकल्पिताभ्यां प्रयोजनमिति चेत्। तदयुक्तं, व्यभिचारात्। तथाहि। तुल्यान्नस्रगादिसाधनयोरपि द्वयोः पुरुषयोः सुखदुःखलक्षणे फले महाभेदो दृश्यते। तुल्येऽपि ह्यन्नादिके भुक्ते कस्याप्याह्लादो दृश्यते, अपरस्य तु रोगाद्युत्पत्तिः। अयं च फलभेदोऽवश्यमेव सकारणः, निःकारणत्वे नित्यं सत्त्वासत्त्वप्रसङ्गात्। यच्च तत्कारणं, तददृष्टं पुण्यपापरूपं कर्मेति। तदुक्तम्।

जो तुल्लसाहणेणं फले विसेसो न सो विणा हेउं।
कज्जत्तणओ गोयम घडो व्व हेऊ अ सो कम्मं॥ इति।

अथवा कारणानुमानात्कार्यानुमानाच्चैवं पुण्यपापे गम्येते। तच्च कारणानुमानमिदम्। दानादिशुभक्रियाणां हिंसाद्यशुभक्रियाणां वास्ति फलभूतं कार्यं, कारणत्वात्, कृष्यादिक्रियावत्। यच्चासां फलभूतं कार्यं तत्पुण्यं पापं चावगन्तव्यं, यथा कृष्यादिक्रियाणां शालियवगोधूमादिकम्। ननु यथा कृष्यादिक्रिया दृष्टशाल्यादिफलमात्रेणैवावसितप्रयोजना भवन्ति, तथा दानादिकाः पशुहिंसादिकाश्च सर्वा अपि क्रियाः स्वर्गादिना

मांसभक्षणादिना च दृष्टफलमात्रेणैवावसितप्रयोजना भवन्तु, किमदृष्टधर्माधर्मफलकल्पनेन। लोको हि प्रायेण सर्वोऽपि दृष्टमात्रफलास्वेव कृषिवाणिज्यहिंसादिक्रियासु प्रवर्तते। अदृष्टफलासु पुनर्दानादिक्रियास्वत्यल्प एव लोकः प्रवर्तते, न बहुः। ततश्च कृषिहिंसाद्यशुभक्रियाणामदृष्टफलाभावाद्दानादिशुभक्रियाणामप्यदृष्टफलाभावो भविष्यतीति चेत्। न। यत एव कृष्याद्यशुभक्रियासु दृष्टफलासु बहवः प्रवर्तन्ते, अदृष्टफलासु पुनर्दानादिशुभक्रियास्वत्यल्प एव लोकः प्रवर्तते, तत एव कृषिहिंसादिका दृष्टफलाः क्रिया अदृष्टपापरूपफला अपि प्रतिपत्तव्याः, अनन्तसंसारिजीवसन्तान्यथानुपपत्तेः। ते हि कृषिहिंसादिक्रियानिमित्तमनभिलषितमप्यदृष्टं पापलक्षणं फलं बद्ध्वा अनन्तसंसारं परिभ्रमन्तोऽनन्ता इह तिष्ठन्ति। यदि हि कृषिहिंसाद्यशुभक्रियाणामदृष्टं पापरूपं फलं नाभ्युपगम्यते, तदा तत्कर्तारोऽदृष्टफलाभावान्मरणानन्तरमेव सर्वेऽप्ययत्नेन मुक्तिं गच्छेयुः। ततः प्रायः शून्य एव संसारः स्यात्। ततश्च संसारे दुःखी कोऽपि नोपलभ्येत। दानादिशुभक्रियानुष्ठातारः शुभतत्फलविपाकानुभवितार एव च केवलाः सर्वत्रोपलभ्येरन्। दुःखिनश्चाच बहवो दृश्यन्ते, सुखिनस्त्वल्पाः। तेन ज्ञायते। कृषिवाणिज्यहिंसादिक्रियानिबन्धनो ऽदृष्टपापरूपफलविपाको दुःखिनां, इतरेषां तु दानादिक्रियाहेतुको ऽदृष्टधर्मरूपफलविपाक इति। व्यत्ययः कस्मान्न भवतीति चेत्। उच्यते। अशुभक्रियारम्भिणामेव च बहुत्वात् शुभक्रियानुष्ठातृणामेव च

स्वल्पत्वादिति कारणानुमानम्॥ अथ कार्यानुमानम्। जीवानामात्मत्वावशेषेऽपि नरपश्वादिषु देहादिवैचित्र्यस्य कारणमस्ति, कार्यत्वात्, यथा घटस्य मृद्दण्डचक्रचीवरादिसामग्रीकलितः कुलालः। न च दृष्ट एव मातापितादिकस्तस्य हेतुरिति कर्तव्यं, दृष्टहेतुसाम्येऽपि, सुरूपेतरादिभावेन देहादीनां वैचित्र्यदर्शनात्, तस्य चादृष्टशुभाशुभकर्माख्यहेतुमन्तरेणाभावात्। अत एव शुभदेहादीनां पुण्यकार्यत्वं, इतरेषां तु पापकार्यत्वमिति कार्यानुमानम्॥ सर्वज्ञवचनप्रामाण्याद्वा पुण्यपापयोरुभयोः सत्ता प्रतिपत्तव्या। विशेषार्थिना तु विशेषावश्यकटीकावलोकनीयेति॥

अथास्रवमाह। "मिथ्यात्वाद्यास्तु हेतवः" इत्यादि। असद्देवगुरुधर्मेषु सद्देवादिबुद्धिर्मिथ्यात्वम्। हिंसाद्यनिवृत्तिरविरतिः। प्रमादो मद्यविषयादिः। कषायाः क्रुधादयः। योगा मनोवाक्कायव्यापाराः। अत्रैवमक्षरघटना। मिथ्यात्वाविरत्यादिकाः पुनर्बन्धस्य ज्ञानावरणीयादिकर्मबन्धस्य ये हेतवः, स आस्रवो जिनशासने विज्ञेयः। आस्रवति कर्मभ्यः स आस्रवः। ततो मिथ्यात्वादिविषया मनोवाक्कायव्यापारा एव शुभाशुभकर्मबन्धहेतुत्वादास्रव इत्यर्थः॥ अथ बन्धाभावे कथमास्रवस्योपपत्तिः, आस्रवात् प्राग्बन्धसद्भावे वा तस्य बन्धहेतुता, प्रागपि बन्धस्य सद्भावात्। न हि, यद्धेतुकं तत्तदभावेऽपि भवति, अतिप्रसङ्गात्। असदेतत्, यत आस्रवस्य पूर्वबन्धापेक्षया कार्यत्वमिष्यते, उत्तरबन्धापेक्षया च कारणत्वम्। एवं बन्धस्यापि पूर्वोत्तरास्रवापेक्षया कार्यत्वं कारणत्वं च ज्ञातव्यं, बीजाङ्कुरयोरिव

बन्धास्रवयोरन्योन्यं कार्यकारणभावनियमात्। न चैवमितरेतराश्रयदोषः, प्रवाहापेक्षयानादित्वात्। अयं चास्रवः पुण्यापुण्यबन्धहेतुतया द्विविधः। द्विविधोऽप्ययं मिथ्यात्वाद्युत्तरभेदापेक्षयोत्कर्षापकर्षभेदापेक्षया वानेकप्रकारः। अस्य च शुभाशुभमनोवाक्कायव्यापाररूपस्यास्रवस्य सिद्धिः स्वात्मनि स्वसंवेदनाद्यध्यक्षतः परस्मिंश्च वाक्कायव्यापारस्य कस्यचित्प्रत्यक्षतः शेषस्य च तत्कार्यप्रभवानुमानतश्चावसेया, आगमाच्च॥

अथ संवरबन्धौ विवृणोति।

संवरस्तन्निरोधस्तु बन्धो जीवस्य कर्मणः।
अन्योन्यानुगमात्मा तु यः संबन्धो द्वयोरपि॥५१॥

व्याख्या॥ तेषां मिथ्यात्वविरतिकषाययोगानामास्रवाणां सम्यग्दर्शनविरतिप्रमादपरिहारक्षमादिगुप्तिचयधर्मानुप्रेक्षाभिर्निरोधो निवारणं स्थगनं संवरः; पर्यायकथनेन व्याख्या। आत्मनः कर्मोपादानहेतुभूतपरिणामाभावः संवर इत्यभिप्रायः। स च देशसर्वभेदाद्द्वेधा। तत्र बादरसूक्ष्मयोगनिरोधकाले सर्वसंवरः। शेषकाले चरणप्रतिपत्तेरारभ्य देशसंवरः॥

अथ बन्धतत्त्वमाह। "बन्धो जीवस्य कर्मणः" इत्यादि। तत्र बन्धः परस्परश्लेषो जीवप्रदेशपुद्गलानां क्षीरनीरवत्। अथवा बध्यते येनात्मा पारतन्त्र्यमापद्यते ज्ञानावरणादिना संबन्धः पुद्गलपरिणामः। ननु जीवकर्मणोः संबन्धः किं गोष्ठामाहिलपरिकल्पितकञ्चुकिकञ्चुकसंयोगकल्प उतान्यः कश्चिदित्या-

शंक्याह "द्वयोरपि" कर्मवर्गणायोग्यस्कन्धानां जीवस्य चान्यो-न्यानुगमात्मान्योन्यानुगतिस्वरूपः परस्परानुप्रवेशरूप इत्यर्थः । अयमत्र भावः । वज्रायस्पिण्डसंबन्धवत् क्षीरोदकसंपर्कवद्वा जीवकर्मणोर्मिथोऽनुप्रवेशात्मक एव संबन्धो बन्धो बोद्धव्यो, न पुनः कञ्चुकिकञ्चुकसंयोगकल्पोऽन्यो वेति । अत्राह । कथम-मूर्तस्यात्मनो हस्ताद्यसंभवे सत्यादानशक्तिविरहात्कर्मग्रहणमुच्यत इति चेत् । उच्यते । इयमेव तावदस्यानारेका प्रक्रिया भवतो ऽनभिज्ञतां ज्ञापयति, यतः केनामूर्तताभ्युपेतात्मनः कर्मजीव-संबन्धस्यानादित्वादेकत्वपरिणामे सति क्षीरोदकवन्मूर्त एव कर्मग्रहणे व्याप्रियते । न च हस्तादिव्यापारादेयं कर्म, किं तु पौद्गलमपि सदध्यवसायविशेषाद्रागद्वेषमोहपरिणामाभ्यञ्जन-लक्षणादात्मनः कर्मयोग्यपुद्गलजालश्लेषणमादानं स्नेहाभ्यक्तव-पुषो रजोलगनवदिति । प्रतिप्रदेशानन्तपरमाणुसंश्लेषाज्जीवस्य कर्मणा सह क्षीरीभावात्कथंचिन्मूर्तत्वमपि संसारावस्थायामभ्युप-गम्यत एव स्याद्वादवादिभिरिति । स च प्रशस्ताप्रशस्तभेदाद् द्वेधा । प्रकृतिस्थित्यनुभागप्रदेशभेदाच्च चतुर्विधा । प्रकृतिः स्वभावो यथा ज्ञानावरणं ज्ञानाच्छादनस्वभावमित्यादि । स्थितिरध्यवसायकृतः कालविभागः । अनुभागो रसः । प्रदेशः कर्मदलसंचय इति । पुनरपि मूलप्रकृतिभेदादष्टधा ज्ञानावर-णादिकः । उत्तरप्रकृतिभेदादष्टपञ्चाशद्धिकशतभेदः । सोऽपि तीव्रतीव्रतरमन्दमन्दतरादिभेदादनेकविध इत्यादि कर्मग्रन्था-दवसेयम् । उक्तं बन्धतत्त्वम् ॥

निर्जरातत्त्वमाह।

बद्धस्य कर्मणः साटो यस्तु सा निर्जरा मता।
आत्यन्तिको वियोगस्तु देहादेर्मोक्ष उच्यते ॥५२॥

यस्तु बद्धस्य जीवेन संबद्धस्य कर्मणो ज्ञानावरणादेः साटः सटनं द्वादशविधेन तपसा विचटनं, सा निर्जरा मता संमता। सा च द्विधा, सकामाकामभेदात्। तत्राद्या चारित्रिणां दुष्करतरतपश्चरणकायोत्सर्गकरणद्वाविंशतिपरीषहपराणां लोचादिकायक्लेशकारिणामष्टादशशीलाङ्गधारिणां बाह्याभ्यन्तरसर्वपरिग्रहपरिहारिणां निःप्रतिकर्मशरीरिणां भवति। द्वितीया त्वन्यशरीरिणां तीव्रतरशरीरमानसानेककटुकदुःखशतसहस्रसहनतो भवति॥

अथोत्तरार्धेन मोक्षतत्त्वमाह "आत्यन्तिकः" इत्यादि। देहादेः शरीरपञ्चकेन्द्रियायुरादिबाह्यप्राणपुण्यापुण्यवर्णगन्धरसस्पर्शपुनर्जन्मग्रहणवेदचयकषायादिसङ्गाज्ञानासिद्धत्वादेवात्यन्तिको वियोगो विरहः पुनर्मोक्ष इष्यते। यो हि प्रश्लक्ष्यति न पुनः कदाचिन्न भवति, स आत्यन्तिकः। अत्र पर आह। ननु भवतु देहस्यात्यन्तिको वियोगः, तस्य सादित्वात्। परं रागादिभिः सहात्यन्तिको वियोगो ऽसंभवी, प्रमाणबाधनात्। प्रमाणं चेदम्। यदनादिमत्, न तदिनाशमाविशति, यथाकाशम्। अनादिमन्तश्च रागादय इति। उच्यते। यद्यपि रागादयो दोषा जन्तोरनादिमन्तः, तथापि कस्यचिद्यथावस्थितस्त्रीशरीरादिवस्तुतत्त्वावगमेन तेषां रागादीनां प्रतिपक्षभावनातः

प्रतिक्षणमपचयो दृश्यते। ततः संभाव्यते विशिष्टकालादिसामग्रीसद्भावे भावनाप्रकर्षतो निर्मूलमपि क्षयः, निर्मूलक्षयानभ्युपगमे ऽपचयस्याप्यसिद्धेः। यथा हि प्रीतस्वर्गसंपाद्या रोमहर्षादयः प्रीतप्रतिपक्षस्य च वह्नेर्मन्दतायां मन्दा उपलभ्या उत्कर्षे च निरन्वयविनाशिताः, एवमन्यत्रापि मन्दतासद्भावे निरन्वयविनाशोऽवश्यमेष्टव्यः। अथ यथा ज्ञानावरणीयकर्मोदये ज्ञानस्य मन्दता भवति तत्प्रकर्षे च ज्ञानस्य न निरन्वयो विनाशः, एवं प्रतिपक्षभावनोत्कर्षे ऽपि न रागादीनामत्यन्तमुच्छेदो भविष्यतीति। तदयुक्तम्। द्विविधं हि बाध्यं, सहभूस्वभावं सहकारिसंपाद्यस्वभावं च। तत्र यत्सहभूस्वभावं, तन्न बाधकोत्कर्षे कदाचिदपि निरन्वयं विनाशमाविशति। ज्ञानं चात्मनः सहभूस्वभावम्। आत्मा च परिणामिनित्यः। ततो ऽत्यन्तप्रकर्षवत्यपि ज्ञानावरणीयकर्मोदये ज्ञानस्य न निरन्वयो विनाशः। रागादयस्तु लोभादिकर्मविपाकोदयसंपादितसत्ताकाः। ततः कर्मणो निर्मूलमपगमे ते ऽपि निर्मूलमपगच्छन्ति। प्रयोगश्चात्र। ये सहकारिसंपाद्या यदुपधानादपकर्षिणः, ते तदत्यन्तवृद्धौ निरन्वयविनाशधर्माणः, यथा रोमहर्षादयो वह्निवृद्धौ। भावनोपधानादपकर्षिणश्च सहकारिकर्मसंपाद्या रागादय इति। अत्र "सहकारिसंपाद्या" इति विशेषणं सहभूस्वभावज्ञानादिव्यवच्छेदार्थम्। यदपि च प्रागुपन्यस्तं प्रमाणं "यदनादिमत्, न तद्विनाशमाविशति" इति, तदप्यप्रमाणं, प्रागभावेन हेतोर्व्यभिचारात्। प्रागभावो ह्यनादिमानपि विनाशमाविशति,

अन्यथा कार्यानुत्पत्तेः। काञ्चनोपलयोः संयोगेन च हेतुरनैकान्तिकः। तत्संयोगोऽपि ह्यनादिसंततिगतोऽपि चारसत्युटपाकादिनोपायेन विघटमानो दृष्ट इति। अथ रागाद्यो धर्मा धर्मिण आत्मनो भिन्नाश्चेत्, तदा सर्वेषां वीतरागत्वसिद्धप्रसङ्गः, रागादिभ्यो भिन्नत्वात्, मुक्तात्मवत्। अभिन्नाश्चेत्, तदा तेषां क्षये धर्मिणोऽपि क्षय इति। तदयुक्तं, भेदाभेदपक्षस्य जात्यन्तरस्याभ्युपगमात्। कथमिति चेत्। उच्यते। धर्मिधर्माणां न भेद एव, अभेदस्यापि सत्त्वात्; नाप्यभेद एव, भेदस्यापि सद्भावात्। ततो नोक्तदोषावकाश इति। अथ कार्मणशरीरादेः सर्वथावियोगे कथं जीवस्योर्ध्वमा लोकान्तं गतिरिति चेत्। पूर्वप्रयोगादिभिस्तस्योर्ध्वं गतिरिति ब्रूमः। तदुक्तं तत्त्वार्थभाष्ये।

तदनन्तरमेवोर्ध्वमा लोकान्तात् स गच्छति।
पूर्वयोगासङ्गबन्धच्छेदोर्ध्वगौरवैः॥ १॥
कुलालचक्रं दोलायामिषौ चापि यथेष्यते।
पूर्वप्रयोगात्तद्वच्च तथा सिद्धगतिः स्मृता॥ २॥
म्लेपसङ्गनिर्मोक्षाद्यथा दृष्टाप्सु लाबुनः।
कर्मसङ्गविनिर्मोक्षात्तथा सिद्धगतिः स्मृता॥ ३॥
एरण्डस्युटदेलासु बन्धच्छेदाद्यथा गतिः।
कर्मबन्धनविच्छेदाज्जीवस्यापि तथेष्यते॥ ४॥
ऊर्ध्वगौरवधर्माणो जीवा इति जिनोत्तमैः।
अधोगौरवधर्माणः पुद्गला इति चोदितम्॥ ५॥

यथाधस्तिर्यगूर्ध्वं च लोष्टवाय्वग्निवीचयः ।
स्वभावतः प्रवर्तन्ते तथोर्ध्वगतिरात्मनः ॥ ६ ॥
अधस्तिर्यक् तथोर्ध्वं च जीवानां कर्मजा गतिः ।
ऊर्ध्वमेव स्वभावेन भवति क्षीणकर्मणाम् ॥ ७ ॥
ततो ऽप्यूर्ध्वगतिस्तेषां कस्मान्नास्तीति चेन्मतिः । 5
धर्मास्तिकायस्याभावात्स हि हेतुर्गतेः परम् ॥ ८ ॥

धर्मास्तिकायस्य गतिहेतुत्वं पुरापि व्यवस्थापितमेवेति । ननु भवतु कर्मणामभावे ऽपि पूर्वप्रयोगादिभिर्जीवस्योर्ध्वं गतिः, तथापि सर्वथा शरीरेन्द्रियादिप्राणानामभावान्मोक्षे जीवस्याजीवत्वप्रसङ्गः । यतो जीवनं प्राणधारणमुच्यते ; तच्चे- 10 ह नास्ति, तदा जीवस्य जीवनाभावादजीवः स्यात्, अजीवस्य च मोक्षाभाव इति चेत् । न, अभिप्रायापरिज्ञानात् । प्राणा हि द्विविधाः, द्रव्यप्राणा भावप्राणाश्च । मोक्षे च द्रव्यप्राणानामेवाभावः, न पुनर्भावप्राणानाम् । भावप्राणाश्च मुक्तावस्थायामपि सन्त्येव । यदुक्तम् । 15

यस्मात्क्षायिकसम्यक्त्ववीर्यदर्शनज्ञानैः ।
आत्यन्तिकैः स युक्तो निर्द्वन्द्वेनापि च सुखेन ॥ १ ॥
ज्ञानाद्यस्तु भावप्राणा मुक्तो ऽपि जीवति स तेर्हि ।
तस्मात्तज्जीवत्वं नित्यं सर्वस्य जीवस्य ॥ २ ॥

ततश्चानन्तज्ञानानन्तदर्शनानन्तवीर्यानन्तसुखलक्षणं जीवनं 20 सिद्धानामपि भवतीत्यर्थः । सुखं च सिद्धानां सर्वसंसारसुखविलक्षणं परमानन्दरूपं ज्ञातव्यम् । उक्तं च ।

न वि अत्थि मनुस्साणं तं सुक्खं नेव सव्वदेवाणं।
जं सिद्धाणं सुक्खं अव्वाबाहं उवगयाणं ॥ १ ॥
सुरगणसुहं समग्गं सव्वद्धा पिण्डियं अनन्तगुणं।
न वि पावइ मुत्तिसुहं णन्ताहिं वग्गवग्गूहिं ॥ २ ॥
सिद्धस्स सुहो रासी सव्वद्धा पिण्डिओ जइ हविज्जा।
सो ऽणन्तवग्गभइओ सव्वागासे न माइज्जा ॥ ३ ॥

तथा योगशास्त्रे ऽप्युक्तम्।

सुरासुरनरेन्द्राणां यत्सुखं भुवनत्रये।
तत्स्यादनन्तभागे ऽपि न मोक्षसुखसंपदः ॥ १ ॥
स्वभावजमत्यक्षं यस्मिन्वै शाश्वतं सुखम्।
चतुर्वर्गाग्रणीत्वेन तेन मोक्षः प्रकीर्तितः ॥ २ ॥

अत्र सिद्धानां सुखमयत्वे त्रयो विप्रतिपद्यन्ते। तथाहि। आत्मनो मुक्तौ बुद्ध्याद्यशेषगुणोच्छेदात्कथं सुखमयत्वमिति वैशेषिकाः १। अत्यन्तचित्तसन्तानोच्छेदत आत्मन एवासंभवादिति सौगताः २। अभोक्तृत्वात्कथमात्मनो मुक्तौ सुखमयत्वमिति सांख्याः ३॥ अत्रादौ वैशेषिकाः स्वशेषुधीं विशेषयन्ति। ननु मोक्षे विशुद्धज्ञानादिस्वभावतात्मनो ऽनुपपन्ना, बुद्ध्यादिविशेषगुणोच्छेदरूपत्वान्मोक्षस्य। तथाहि। प्रत्यक्षादिप्रमाणप्रतिपन्ने जीवस्वरूपे परिपाकं प्राप्ते तत्त्वज्ञाने नवानां जीवविशेषगुणानामत्यन्तोच्छेदे स्वरूपेणात्मनो ऽवस्थानं मोक्षः। तदुच्छेदे च प्रमाणमिदं। यथा। नवानामात्मविशेषगुणानां संतानो ऽत्यन्तमुच्छिद्यते, संतानत्वात्, प्रदीपादिसंतानवत्। न चायम-

सिद्धो हेतुः, पक्षे वर्तमानत्वात् । नापि विरुद्धः, सपक्षे प्रदीपादौ सत्त्वात् । नाप्यनैकान्तिकः, केवलपरमाण्वादावप्रवृत्तेः । नापि कालात्ययापदिष्टः, विपरीतार्थस्थापकयोः प्रत्यक्षानुमानयोरत्राऽसंभवात् । ननु संतानोच्छेदहेतुर्वक्तव्य इति चेत् । उच्यते । निरन्तराभ्यासात्कस्यचित्पुंसस्तत्त्वज्ञानं जायते, तेन च मिथ्याज्ञाननिवृत्तिर्विधीयते, तस्य निवृत्तौ तत्कार्यभूता रागादयो निवर्तन्ते, तदभावे तत्कार्या मनोवाक्कायप्रवृत्तिर्व्यावर्तते, तन्निवृत्तौ च धर्माधर्मयोरनुत्पत्तिः । आरब्धशरीरेन्द्रियकार्ययोस्तु सुखादिफलोपभोगात्प्रक्षयः । अनारब्धशरीरादिकार्ययोरप्यवस्थितयोस्तत्फलोपभोगादेव प्रक्षयः । ततश्च सर्वसंतानोच्छेदान्मोक्ष इति स्थितम् ॥

अत्र प्रतिविधीयते । यत्तावदुक्तं "संतानत्वात्" इत्यादि, तदसमीचीनं, यत आत्मनः सर्वथा भिन्नानां बुद्ध्यादिगुणानां संतानस्योच्छेदः साध्यते ऽभिन्नानां वा कथंचिद्भिन्नानां वा । आद्यपक्षे आश्रयासिद्धो हेतुः, संतानिभ्यो ऽत्यन्तं भिन्नस्य सन्तानस्यासत्कल्पत्वात् । द्वितीयपक्षे तु सर्वथाभिन्नानां तेषामुच्छेदसाधने संतानवत् संतानिनो ऽप्युच्छेदप्रसङ्गः । ततश्च कस्यासौ मोक्षः । भिन्नाभिन्नपक्षाभ्युपगमे चापसिद्धान्तः । किं च॥ विरुद्धश्चायं हेतुः, कार्यकारणभूतक्षणप्रवाहलक्षणसंतानत्वस्य नित्यानित्यैकान्तयोरसंभवात् । अर्थक्रियाकारित्वस्यात एव प्रतिपादिष्यमाणत्वात् । साध्यविकलश्च दृष्टान्तः, प्रदीपादेरत्यन्तोच्छेदासंभवात्, तैजसपरमाणूनां भास्वररूपपरित्यागेनान्धकार-

रूपतयावस्थानात्। प्रयोगश्चात्र। पूर्वापरस्वभावपरिहारास्वीकारस्थितिलक्षणपरिणामवान्प्रदीपः, सत्त्वात्, पटादिवदिति। अत्र बहु वक्तव्यं, तत्त्वभिधास्यते विस्तरेणानेकान्तप्रघट्टके। किं च। इन्द्रियजानां बुद्ध्यादिगुणानामुच्छेदः साध्यमानोऽस्युतातीन्द्रियाणाम्। तत्राद्यपक्षे सिद्धसाधनं, अस्माभिरपि तत्र तदुच्छेदाभ्युपगमात्। द्वितीयविकल्पे मुक्तौ कस्यचिदपि प्रवृत्त्यनुपपत्तेः। मोक्षार्थी हि सर्वोऽपि निरतिशयसुखज्ञानादिप्राप्त्यभिलाषेणैव प्रवर्तते, न पुनः शिलाशकलकल्पमपगतसकलसुखसंवेदनमात्मानमुपपादयितुं यतते। यदि मोक्षावस्थायामपि पाषाणकल्पोऽपगतसुखसंवेदनालेशः पुरुषः संपद्यते, तदा कृतं मोक्षेण, संसार एव गरीयान्, यत्र मान्तरापि सुखलेशप्रतिपत्तिरस्ति। अतो न वैशेषिकोपकल्पिते मोक्षे कस्यचिदपि तन्तुमिच्छा। उक्तं च।

वरं वृन्दावने वासः शृगालैश्च सहोषितम्।
न तु वैशेषिकीं मुक्तिं गौतमो गन्तुमिच्छति॥ १॥

एतेन यदूचुर्मीमांसका अपि

यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः।
तावदात्यन्तिकी दुःखव्यावृत्तिर्नावकल्पते॥ १॥
धर्माधर्मनिमित्तो हि संभवः सुखदुःखयोः।
मूलभूतौ च तावेव स्तम्भौ संसारसद्मनः॥ २॥
तदुच्छेदे च तत्कार्यशरीराद्यनुपप्लवात्।
नात्मनः सुखदुःखे स्त इत्यसौ मुक्त उच्यते॥ ३॥

ननु तस्यामवस्थायां कीदृगात्मावशिष्यते ।
स्वरूपैकप्रतिष्ठानः परित्यक्तो ऽखिलैर्गुणैः ॥ ४ ॥
ऊर्मिषड्भातिगं रूपं तदस्याऊर्मनीषिणः ।
संसारबन्धनाधीनदुःखक्लेशाद्यदूषितम् ॥ ५ ॥

(ऊर्मयः कामक्रोधमदगर्वलोभदम्भाः। न हि वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत इत्यादि), तदप्यपास्तं द्रष्टव्यम् । यतः किं शुभकर्मपरिपाकप्रभवाणि भवसंभवानि सुखानि मुक्तौ निषिध्यमानानि मन्यत सर्वथा तदभावः । आद्ये सिद्धसाधनम् । द्वितीये ऽसिद्धेः, आत्मनः सुखस्वरूपत्वात् । न च पदार्थानां स्वरूपमत्यन्तमुच्छिद्यते, अतिप्रसङ्गात् । न च सुखस्वभावत्वमेवासिद्धं, तत्सद्भावे प्रमाणसद्भावात् । तथाहि आत्मा सुखस्वभावः, अत्यन्तप्रियबुद्धिविषयत्वात् अनन्यपरतयोपादीयमानत्वाच्च, वैषयिकसुखवत् । यथा सुखार्थी मुमुक्षुप्रयत्नः, प्रेक्षापूर्वकारिप्रयत्नत्वात्, क्षुधीवलप्रयत्नवदिति । तच्च सुखं मुक्तौ परमातिशयप्राप्तं, सा चास्यानुमानात्प्रसिद्धा ; यथा, सुखतारतम्यं क्वचिद्विश्रान्तं, तरतमशब्दवाच्यत्वात्, परिमाणतारतम्यवत् । तथा ।

आनन्दं ब्रह्मणो रूपं तच्च मोक्षे ऽभिव्यज्यते ।
यदा दृष्ट्वा परं ब्रह्म सर्वं त्यजति बन्धनम् ॥
तदा तन्नित्यमानन्दं मुक्तः स्वात्मनि विन्दति ।

इति श्रुतिसद्भावात् । तथा ।

सुखमात्यन्तिकं यत्तद्बुद्ध्यग्राह्यमतीन्द्रियम् ।

तं वै मोक्षं विजानीयाद्दुःखप्रापमकृतात्मभिः ॥ १ ॥

इति स्मृतिवचनाच्च मोक्षस्य सुखमयत्वं प्रतिपत्तव्यमिति स्थितम् ॥

अत्र सांख्या ब्रुवते। इह शुद्धचैतन्यस्वरूपोऽयं पुरुषः, तृणस्य कुञ्जीकरणेऽप्यशक्तत्वादकर्ता, साक्षाद्भोक्ता, जडां प्रकृतिं सक्रियामाश्रितः। अज्ञानतमश्छन्नतया प्रकृतिस्थमपि सुखादिफलमात्मनि प्रतिबिम्बितं चेतयमानो मोदते मोद्-मानश्च प्रकृतिं सुखस्वभावां मोहान्मन्यमानः संसारमधिवसति। यदा तु ज्ञानमस्याविर्भवति "दुःखहेतुरियं न ममानया सह संसर्गो युक्तः" इति, तदा विवेकख्यातेर्न तत्संपादितं कर्मफलं भुङ्क्ते। सापि च "विज्ञातविरूपाहं न मदीयं कर्मफलमनेन भोक्तव्यम्" इति मत्वा कुष्ठिनी स्त्रीवद्दूरादपसर्पति। तत उपरतायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानं मोक्षः स्वरूपं च चेतनाशक्तिरपरिणामिन्यप्रतिसंक्रमाप्रतिदर्शितविषयानन्ता च। अतस्तदात्मक एव मुक्तात्मा न पुनरानन्दादिस्वभावः, तस्य प्रकृतिकार्यत्वात्, तस्याश्च जीवनाशं नष्टत्वात् ॥

अत्र वयं ब्रूमः। यत्तावदुक्तं "संसार्यात्मा अज्ञानतमश्छन्न-तया" इत्यादि, तदसुन्दरं, यतः किमज्ञानमेव तम उताज्ञानं च तमश्चेति। प्रथमपक्षे मुक्तात्मापि सुखादिफलं किं नात्मस्थं मन्येत, ज्ञानस्य बुद्धिधर्मत्वाद्बुद्धेश्च प्रकृत्या समसुपरतत्वात्, मुक्तात्मनोऽपि ज्ञानाभावेनाज्ञानतमश्छन्नत्वाविशेषात्। द्वितीय-पक्षे तु किमिदमज्ञानादन्यत्तमो नाम रागादिकमिति चेत्,

तन्न, तस्यात्मनो ऽत्यन्तार्थान्तरभूतप्रकृतिधर्मतयात्माच्छादकत्वानुपपत्तेः । आच्छादकत्वे वा मुक्तात्मनो ऽप्याच्छादनं स्यात्, अविशेषात् । किं च संसार्यात्मनो ऽकर्तुरपि भोक्तृत्वे ऽङ्गीक्रियमाणे कृतनाशाकृतागमादयो दोषाः प्रसज्यन्ते । किं च । प्रकृतिपुरुषयोः संयोगः केन कृतः । किं प्रकृत्योतात्मना वा । न तावत्प्रकृत्या, तस्याः सर्वगतत्वान्मुक्तात्मनो ऽपि तत्संयोगप्रसङ्गः । अथात्मना, तर्हि स आत्मा शुद्धचैतन्यस्वरूपः सन् किमर्थं प्रकृतिमादत्ते । तत्र को ऽपि हेतुरस्ति न वेति वक्तव्यम् । अस्ति चेत्, तर्हि स हेतुः प्रकृतिर्वा स्यादात्मा वा, अन्यस्य कस्याप्यनभ्युपगमात् । आद्यपक्षे यथा सा प्रकृतिस्तस्यात्मनः प्रकृतिसंयोगे हेतुः स्यात्, तथा मुक्तात्मनः किं न स्यात्, प्रकृतिसंयोगात्पूर्वं शुद्धचैतन्यस्वरूपत्वेनोभयोरप्यविशेषात् नियामकाभावाच्च । द्वितीयपक्षे स आत्मा प्रकृत्यात्मनोः संयोगे हेतुत्वं प्रतिपद्यमानः किं स्वयं प्रकृतिसहकृतः सन् हेतुर्भवति तद्वियुक्तो वा । आद्ये तस्यापि प्रकृतिसंयोगः कथमित्यनवस्था । द्वितीये पुनः स प्रकृतिरहित आत्मा शुद्धचैतन्यस्वरूपः सन् किमर्थं प्रकृत्यात्मनोः संयोगे हेतुत्वं प्रतिपद्यते । तत्र को ऽपि हेतुर्विलोक्य इति तदेवावर्तत इत्यनवस्था । इति सहेतुकः प्रकृत्यात्मन संयोगो निरस्तः । अथ निर्हेतुकः, तर्हि मुक्तात्मनो ऽपि प्रकृतिसंयोगप्रसङ्गः । किं च अथमात्मा प्रकृतिमुपाददानः पूर्वावस्थां जह्यान्न वा । आद्ये ऽनित्यत्वापत्तिः । द्वितीये तदुपादानमेव दुर्घटम् । न हि बाल्यावस्थामत्यजन् देवदत्तस्तरु-

णत्वं प्रतिपद्यते। तत्र कथमपि सांख्यमते प्रकृतिसंयोगो घटते ततश्च संयोगाभावाद्वियोगो ऽपि दुर्घट एव, संयोगपूर्वकत्वाद्वियोगस्य॥ किं च। यदुक्तं "विवेकख्यातेः" इत्यादि, तदविचारितरमणीयम्। तत्र केयं ख्यातिर्नाम। प्रकृतिपुरुषयोः स्वेन स्वेन रूपेणावस्थितयोर्भेदेन प्रतिभासनमिति चेत्। सा कस्य, प्रकृतेः पुरुषस्य वा। न प्रकृतेः, तस्या असंवेद्यपर्वणि स्थितत्वादचेतनत्वादनभ्युपगमाच्च। नाप्यात्मनः, तस्याप्यसंवेद्यपर्वणि स्थितत्वात्। तथा यदपि "विज्ञातविरूपाहं" इत्याद्युक्तं, तदप्यसमीचिताभिधानं, प्रकृतेर्जडतयेत्थं विज्ञानानुपपत्तेः। किं च विज्ञातापि प्रकृतिः संसारदशावन्मोक्षे ऽप्यात्मनो भोगाय स्वभावतो वायुवत्प्रवर्तेतां, तत्स्वभावस्य नित्यतया तदापि सत्त्वात्। न हि प्रवृत्तिस्वभावो वायुर्विरूपतया येन ज्ञातस्वं प्रति तत्स्वभावादुपरमत इति; कुतो मोक्षः स्यात्। तदा तदसत्त्वे वा प्रकृतेर्नित्यैकरूपताहानिः, पूर्वभावत्यागेनोत्तरस्वभावोपादानस्य नित्यैकरूपतायां विरोधात्, परिणामिनि नित्य एव तद्विरोधात्। प्रकृतेश्च परिणामिनित्यत्वाभ्युपगम आत्मनो ऽपि तदङ्गीकर्तव्यं, तस्यापि प्राक्तनसुखोपभोक्तृस्वभावपरिहारेण मोक्षे तदभोक्तृस्वभावस्वीकारात्, असुक्तादिस्वभावत्यागेन मुक्तत्वादिस्वभावोपादानाच्च। सिद्धे चास्य परिणामिनित्यत्वे सुखादिपरिणामैरपि परिणामित्वमस्याभ्युपगन्तव्यं, अन्यथा मोक्षाभावप्रसङ्गः। ततश्च न कथमपि सांख्यपरिकल्पितो मोक्षो घटत इति यथोक्तस्वरूप एवानन्तसुखादिस्वरूपो ऽभ्युपगन्तव्यः॥